नं: ६५ - घ

शब्दकौस्तुभः

पत्राणि १३६ - १-का
२८५

नं० ६५-घ
शब्दकौस्तुभः
पत्राणि १३६-१-क
२८५

नं. ८२५ – १० .
शब्दकौस्तुभः
(व्या.)
२८५ पत्राणि
१४३-१-क
कम्पलीट
भट्टोजिदीक्षितः
कर्ता–
लिपिसं. १५ ८ १

व्याकरण

Folio
175

नं. ७५

शब्दकौस्तुभ सिद्धान्त...
कौस्तुभन वाह्लिकसमर्थ ... कौस्तुभ

३०००
१४००
———
४४००

श्रीगणेशायनमः॥श्रीसिद्धेश्वर्यैनमः॥श्रीरस्तु॥विश्वेशंसच्चिदानंदंवंदेहंयोखिलंज
गत्।चरीकर्त्तिबरीभर्त्तिसंजरीहर्त्तिलीलया॥१॥नमस्कुर्वेजगद्वंद्यंपाणिन्यादिमुनि
त्रयम्।श्रीभर्तृहरिमुख्यांश्चसिद्धांतस्थापकान्बुधान्॥२॥नत्वालक्ष्मीधरंतातंसु
मनोवृंदवंदितं।फणिभाषितभाष्याब्धेःशब्दकौस्तुभमुद्धरे॥३॥परिभाव्यबहून्ग्रंथान्
योर्थःक्लेशेनलभ्यते।तमशेषमनायासादितोगृह्णंतुसज्जनाः॥४॥समर्प्योलक्ष्मी
रमणेभक्त्याश्रीशब्दकौस्तुभं।भट्टोजिभट्टोजनुषःसाफल्यंलब्धुमीहते॥५॥प्रेक्षा
वत्प्रवृत्तयेव्याकरणस्यविषयंभगवान्भाष्यकारःप्रादर्शयत्॥अथशब्दानुशास राम
नमिति॥अथशब्दःआरंभस्यद्योतकः।नतुवाचकः।निपातत्वात्उपसर्गवत्।

नवते पि वाच्यकारत्वेति वाच्यं । उपास्यते गुरुरनुभूयते सुखमित्यादौ धातोः सकर्मकक्रियापरत्वं
विना कर्मणि लकारायोगेन वाचकत्वे स्थिते उपसर्गाणां द्योतकत्वस्यैव युक्तत्वात् । ननूक्तयुक्त्याऽ
स्तूपसर्गाणां द्योतकता निपातानां तर्हि तु वाचकमेवेति चेत् । साक्षात्क्रियते नमस्क्रियते ऽलंक्रियते उ
रीक्रियत इत्यादौ कर्मणि लकारेण कर्मीभूतस्य गुर्वादेरभिधानासिद्धये धात्वर्थे प्रति कर्मत्वस्य वाच्यत्वा
त् । उपसर्गत्वापेक्षया निपातत्वस्याधिकव्याप्तितया तदवच्छेदेनैव द्योतकताकल्पनाद्वा सामान्ये प्रमाणा
नां पक्षपातात् निपातत्वं वा स्वं ङोपाधिरूपं जातिरूपं शब्दस्वरूपमेव वेति पक्षत्रयेपि प्रादिचादिसाधा
रणमेव । प्रत्वादिप्रत्येकपर्यवसन्नं तदिति पक्षेपि प्रादीनां चादिभ्यो वैलक्षण्यानिरूपणे । केवलो नाम प्रयोगे
णऽन्यपेलभ्यतापि तु स्यैवं विज्ञायत इत्यत्र ध्यातोर्विशिष्य ज्ञयद्वयघटत्वेत्यत्र प्रसमुच्चितघटे घटत्वस्या

श ८१

पि लक्षणायाः संभवात्। किंच। वादीनां वाचकत्वे समानाधिकरणप्रातिपदिकार्थयोरभेदान्वय इति
व्युत्पत्तेर्निपातेतरविषयकतया विनाप्रमाणं संकोचनीयः स्यात्। स्योंसमुच्चयादिशब्दयोग इव चा सूर २
दियोगेपि घटादेः षष्ठी। किंच। समुच्चयादिपदैरुपस्थिते यथा विशेषणसंबंधस्तथा चादिभिरुपस्थिते
ल्व४ पि स्यात्। द्योतकपक्षे तु पदार्थैकदेशत्वान्न तत्र विशेषणान्वयः। अपि च। शरैरुस्रैरिवोदीच्यानुद्धरिष्यन्र द
स४ सानिवेत्यादौ न स्यात् उस्रैः शरैरसस्दृशानुदीच्यानुद्धरिष्यन्नित्यादिरर्थः सर्वजनस्यादिशब्दानां तत्सदृशप
रत्वे इवशब्दस्य च तात्पर्यग्राहकत्वे सत्येव लभते। अन्यथा प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकता
पि भज्येत। इवशब्दस्तु तत्तीयादुर्लभां असत्त्वार्थकतया कारकविभक्त्ययोगात्। एवमप्युस्रादिभ्यस्तृ
तीयाया अनन्वयस्यानुद्धरणत्वान्न्वेवं नन्तत्तु रुषस्योत्तरपदार्थप्राधान्यमित्यादि सिद्धान्तभङ्गेर प्राम २

न्नितिचेन्न। पूर्वपदद्योत्यं प्रतिष्ठान्यमिति तदर्थत्वं। द्योत्यार्थेनैवार्थवत्त्वेति प्रातिपदिकत्वसिद्धिः। अतए
व येषां द्योत्योप्यर्थो नास्ति तुहि च स्म ह वै पादपूरणे इत्यमरकोशात्कमामिद्धिति पादपूरणार्था इति निरुक
त्तदर्थं निपातस्यानर्थकस्येति वार्त्तिकारंभ इत्यवध्येयं स्फुटं चेदं कैयटादिग्रंथेषु। अत एवाकृत्यधि
करणे भट्टैरुक्तं चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः क्रियते संभाव्योत्पत्तेर्नोपसर्गनिपातयोः। तयोरर्था
भिधाने हि व्यापारो नैव विद्यते। यदर्थद्योतकौ तौ तु वाचकः स विचार्यत इति। यत्तु अर्थवत्सूत्रे अधीत इत्या
दौ धातोरनर्थकता उपसर्गविशिष्टस्य वाचकतेति कैश्चिदुक्तं तदभ्युपगममात्रं। सर्वस्य द्वे इति सूत्रे कैयटा
दिग्रंथोप्येवमेवं पूर्वोत्तरमीमांसयोस्तु तत्र नञः पर्युदासे लक्षणेति ग्रंथा अप्येवमेवं उक्तप्रयुक्तेः। अस्तु
वा मतांतरं निपाता वाचका इति। सर्वथापि प्रादयो द्योतका चादयस्तु वाचका इत्येवंरूपमर्द्धजरतीयं नैयायि

काभ्युपगतमप्रमाणकमेवेतिदिक्। अनुपूर्वकः शास्तिर्विविच्य ज्ञापने दृष्टः। तद्यथा। अक्षेत्रवित्क्षेत्रवि-
दं ह्यप्राट् स प्रैति क्षेत्रविदानुशिष्टः। यथा वाँसं पृषन्विदुषा नययो ऽञ्जसानुशासति। य एवेदमिति ब्रुवतां त्र-
न२ त्रहि गुणत्रयोपेतैं सङ्कुरुणान्स्मान्नृशिस्वयेति पृष्ट्वा प्रार्थ्यते तत्र ऽञ्जसेति शेष्यमुक्तं। अनुशासतीति विवि-
च्य बोध्यकत्वं बकुलं छुंदसीति शापोलुक्। इदमित्थमेवेति यो ब्रूयादिति प्रमेयनिष्कर्ष उक्तः। ब्रवदित्यत्र जे-
टोडागमविल्यदृत्तेऽप्यावशिष्यंते विविच्य ऽसाधुभ्यः विभज्य बोध्यंते येनेति करणे ल्युट्। ततः शास्त्रानामिति
कर्मणि षष्ठी तदंतेन समासः। न च कर्मणि चेति सूत्रेण समासनिषेधः शंक्यः। तत्र चशब्दस्य इति शब्दार्थ-
कतया कर्मणीति शब्दवता उभयप्राप्ताविति सूत्रेण षष्ठी तदंतं न समस्यत इत्यर्थात्। इयं तु कर्तृकर्मणो- राम
रिति विहिता षष्ठी। न तूभयप्राप्ताविति। आचार्यस्य कर्तुर्वस्तुतः सत्वेपीहानुपादानात् विवक्षं गवां दोहे २

अगोपेनेत्यत्र हि । शास्त्रार्थं प्रतिपाद्यं तत्त्वपयश्छिक्षितो दोग्धा । दुर्दोहा गावश्च दोग्धव्या अतस्तदेव निर्वहति न त्वन्यथा ।
अतः कर्तृकर्मणोर्विशिष्टोपादानादस्तु भयप्राप्तिः । इह तु शब्दानामिदमनुशासनं न त्वर्थानामिति । अर्थनिवृत्ति
परं वाक्यं न तु कर्तृविशेषनिवृत्तिपरं अतो नास्त्युभयप्राप्तिः । अस्तु वा यथाकथंचिदुभयप्राप्तिः तथापि न क्ष
तिः । उभयप्राप्ताविति सूत्रे अविशेषेण विभाषेति पक्षस्यापि वक्ष्यमाणत्वात् नियमाप्रवृत्तिपक्षे आचार्य
स्य शब्दानुशासनमिति प्रयोगसंभवात् । शेषलक्षणा षष्ठीति वास्तु । तस्माद्वैदिका लौकिकाश्च साध्यवः श
ब्दा इह विषय इति स्थितं । वेदे भवा वैदिकाः अग्न्यात्मादिस्त्वाहुम् । एवं लोके भवा लौकिकाः । यद्वा लोके विदिता
लौकिकाः । तत्र विदित इति वर्त्तमाने लोकसर्वलोकाट्ठञ् । प्रातिशाख्येष्विव न वैदिकैकदेशमात्रमिह विषयः न वा
व्याकरणान्तरेष्विव छान्दसपरित्याग इति सूचयितुमुभयोपादानं ॥ इति विषयनिरूपणं ॥ स्यादेतत् । गोरि

स्यादिः शब्द इह विषयः तत्र गकार औकारो विसर्गश्च घटकः व्युत्पाद्यते तु डो प्रत्ययस्तु प्रत्ययवर्णादेः शब्दादिकं।
न चैतत् ओ इति बोध्ये भासते तथा वार्थांतरता। गौरित्यनेन परिनिष्ठितेन सह ऊ प्रभृतीनां संबंधाविशेषस्त
त्र्यति पत्युपयोगिता वास्तीति तद्व्युत्पादनमिति चेन्न। शब्दांतरव्यावृत्तस्य संबंधस्योपयोगस्य च दुर्वचत्वात्
द्रव्यगुणादिपदार्थानमिह व्युत्पाद्यतापत्तेश्च। अस्ति हि तेषां गौरित्यनेन वाच्यवाचकताभावादिः संबंधः।
अत एव शब्दे बोध्ये गवि समवायेन गोत्वमिव शब्दत्वाच्य संबंधेन शब्दो विशेषणतया भासते वा क्षुषबोधेपि
व्यक्त्यास्मादितः शब्दो विशेषणमित्यभ्युपगमः। आह च न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते। अनुवि
द्धमिव ज्ञानं सर्वं शब्देन भासते। ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा तथैव सर्वशब्दानामेते पृथगवस्थिते
इति। पसंज्ञास्मरणं तत्र न तदप्यन्यहेतुकं। पिंड एव हि दृष्टः सन् संज्ञां स्मारयितुं क्षम इति वा। पुरुकं चैतत्वाग

हातशक्तिकं प्रतिशब्दे नापि स्येवार्थे न शब्दस्यापि स्मारकैबाध्यकाभावात्। अत एव गोत्वस्येव गो
शब्दस्यापि व्यक्तिविशेषणस्याविशेषासंसर्गोपि तादात्म्यमेवास्तु। एवं गोगुणादिभिरपि। तदभिन्नाभिन्नस्य तद
भेदादित्याशयेनाप्यगौरित्यत्र कः शब्द इति प्रश्ने द्रव्यगुणकर्मसामान्यैः सह शब्दस्याभेदो भाष्यकृद्भिः शं
कयानिराकृतः। तत्र निराकरणग्रंथस्यायमाशयः समसत्ताकभेदाभेदौ विरुद्धावेव। अन्यथा त्वदुक्तरीत्या सत्ता
गुणत्वाद्यभेदात्सुखदुःखस्वर्गनरकादेरप्यभेदापत्तौ प्रवृत्तिनिवृत्तिव्यवस्थानस्यात्। न स्याद्वा भेदग्रहः भ्रमनि
वृत्तिः जातिव्यक्त्यादिसंबंधस्त्वतिरिक्त एवेति। एवमेव शब्देनापि सह स्येव संबंधो द्रव्यादीनामिति स्थितं। अस्ति
वद्द्रव्यादिव्युत्पादनस्य प्रकृते उपयोगोपि। अस्मिन्नर्थेऽयं साधुरित्यर्थविशेषं पुरस्कृत्यैव साधुत्वस्य वक्तव्य
त्वात्। अत एव वाजिनि दरिद्रे च क्रमेण अश्वशब्दे अस्वशब्दस्य साधुर्व्युत्क्रमेण त्वसाधुरिति सिद्धांतः। ननु य

श० कौ०

५

5

यावैशेषिकादीनां च तच्छास्त्रसिद्धमेव प्रकृतिप्रत्ययादिविभागमुपजीव्य पदार्थव्युत्पादनाय प्रवृत्तिः प्रकृति
प्रत्ययादिविचारस्तु क्वाचित्कः प्रासंगिकः। तथेहापि लोकप्रसिद्धं दर्शनांतरसिद्धं च पदार्थजातमुपजीव्य श
ब्दमात्रव्युत्पादनं न विरुध्यत इति चेत्। अस्तु तावदेवं तथापि डित्थप्रभृतिव्युत्पादनं निष्फलमेवेति चेत्। अ
त्रोच्यते। गौस्तिष्ठति देवदत्तः पचतीत्यादयं शृंगग्राहिकया तावज्जन्मसहस्रेणापि बोधयितुं बोद्धुं वाशक्याः।
आनंत्यात्। अतः प्रकृतिप्रत्ययविभागकल्पनारूपो लघुभूत उपायः समाश्रीयते॥ लिपिवत्। आरोपित
एव च तत्र संबंधः। प्रसिद्धो हि स्थूलारुंधतीशाखाचंद्रादिन्यायो लोके। पंचकोशविवरणन्यायश्चोत्तरमीमां
सायां। तात्पर्यविषयाबाध्यात्प्रामाण्यं। एषैव ह्यर्थवादेष्वपि गतिः। आत्मवपोत्खेदनप्रभृतीनां बाध्येऽपि ता
त्पर्यविषयीभूतस्य प्राशस्त्यस्याबाधितत्वात्। उक्तं च हरिणा। उपायाः शिक्षमाणानां बालानामुपलालनाः। राम ५

ऽस्त्येव तस्मिन्निश्चितत्वात् ततः सत्यं समीहत इति । अपेर प्रतिपत्त्यर्थं उपाया अव्यवस्थिता इति वा । अत एव हि केचि
त्सुप्रत्ययं विदध्यति । अपरे त्विति । तथा स्मृ अरोत्यापादितमित्यत्र इतप्रत्ययः । भाष्यकारोऽस्मात प्रत्ययः । स्मृ अरोत्याता वानि
ति वल्लुप् । उणव तावर्थवैशेष्यादिति वार्त्तिके कररोत्याउणवत्व द्विति दिक् । एतेन पचतीत्यादौ आदेशैः स्मार्यमाणाण्णजडाद
यो बोधका इति वदन्तः परास्ताः । तथा हि । वृद्धव्यवहाराच्छक्तिग्रह इति निर्विवादं । ततश्च प्रयोगसमवायिनामेव तिप्रभृ
तीनां शक्तिः सिध्यति । न त्वलौकिकानां णादीनां । एवं तु पचष् कन्न् इत्यादि प्रकृतयो विवृद्धिवादिप्रत्ययाश्च न शक्ताः
किं तु अपाक्षीत्यपाच पापच्यते करोतिव कार वर्करीतीत्यादि प्रयोगसमवायिनः अर्पकृ पपाच इत्यादय एव । अश्रूय
माणे ननु पचष् प्रभृतीनां स्मारणं तेनार्थबोध इति चेन्न । णाघवाद्यवस्थितत्वाच्च अश्रूयमाणानामेवार्थसंबन्ध
कल्पनाल्लाघवात् । अलक्षेक्षकस्य स्मरणकल्पने गौरवात् अव्यवस्थापत्तेश्च । पचति देवदत्तः पचन्तं पश्येतिति पूर्वतम्या

धा०को०
६

स्याहितस्य जट एव बोधकत्वे एकत्र ऽऽधाराधेयभावेन संसर्गेण देवदत्ते ऽऽख्यातार्थो यत्नो विशेषणं द्र
तरत्र त्वभेदेन संसर्गेण कृदर्थः वृत्तौ विशेषणमिति त्वसिद्धान्तभंगापत्तेश्च एतेन कर्त्रधिकरणे ऽऽख्याता
र्थत्वं कर्तुर्निरस्यजं जभ्यमानाधिकरणे श्यानजर्थत्वं स्वीकुर्वतो मीमांसका अपि परास्ताः । यत्तु तैरेवोक्तं श्या
नजं शे कर्तरि कृदिति व्याकरणं शक्तिग्राहकमस्तीति तदप्यापाततः कृद्वाक्यशेषोयमनिर्दिष्टार्थेषु ल्युडादि
३४ ष्वुपतिष्ठते न तु श्यानादिषु स्वान्यथेन निराकांक्षत्वादिति वक्ष्यमाणत्वात् । आकांक्षितविधानं न्याय इति न्यायात् ।
अन्यथा क्रियमाण इति कर्मणि श्यानवोदौर्नभ्यापत्तेश्च किं च कर्तरि कृदिति यत्र कर्तृग्रहणं तदेव जः कर्म
णि इत्यत्रापि अनुवर्तते तत्कथं कृतां तडां च वैलक्षण्यं । अन्यलभ्यत्वादेरुभयत्र साम्यात् । नामार्थयोरभेद
एव संसर्ग इति हि श्यानजादौ कर्ता वाच्य इत्युक्तं तत्तु पचति कल्पं पचति रूपं देवदत्त इत्यादावनुरोधात्तिह्न ध्वपि राम
६

तुल्यो। तस्मात्स्वरेरीतानकश्चिछत्रं तान्तिङ्ः तेषु वैषम्यहेतुः। अस्मदृत्यात्तु भावप्रधानमाख्यातं सत्वप्रधा
नानि नामानीति निरुक्तकारोक्तेः प्रत्ययार्थप्राधान्यमौत्सर्गिकं तिङः क्षुत्यज्यते। प्रधानप्रत्ययार्थवचनमर्थस्या
न्यप्रमाणत्वादिति सूत्राद्वा। भूतश्यानज्जिज्ञौरूपविज्ञौवभाव्योपिस्फुटमेतत्पावको व्रजतीति वत्पचति
व्रजतीति प्रयोगो प्यत एवनापद्यतेपवक्ति भवती त्यादिद्वोपपद्यतेन वतो रूपं पचन्ति रूपमित्यादौ रूपवाच्ये
तेद्विवचनादिचनभवति तस्मात्तिङः क्षुकस्तु वविशेषणविशेष्यभावव्यत्यासमात्रमस्तीति वक्ष्यते। यत्तु भट्टै रुक्तं
कर्त्तरि यदेकत्वं तत्रापि प्रद्युतिः। नादिविध्येर्द्वकयोरित्यस्यैकवाक्यता। न च तत्र कर्त्तरीत्यस्ति यद्वित्वादिविशेषणं
तया कथं विधीयेत। नविधिति वादिविध्योरप्येकवाक्यतास्तीति चे सत्यं वा कवाक्यतानुसानत्तु पदैकवाक्यता।
आदेशविधेर्निविधिर्नभ्यनकारानुवाद्येन च आदेश एव शरारणीकर्त्तव्याः एवं णनादौ तिवादिद्वारकं लिङ्

रिस्यादेश्चैकवाक्यतयाव्याख्यानान्नकर्तुर्वाच्यतास्त्रारायातीति तिन दृष्यापातनः। द्विवचनादिसंज्ञा ह्यादेशानिष्टा। ततश्च तदादिविधिना द्व्येकयोः

दिस्मरणं कल्प्यमिति महदेव गौरवं। न च परासंबंधेन शैत्यबोधकः। वृत्तिशून्यत्वात्। अत एवापभ्रंशा
नामप्युस्मारकतामुपगम्य शक्तता वापीति दिक्। तस्मात्सर्वत्रासिद्धिमित्यादेः यथाऽऽहार्यारोपेणैव व्याख्यानं स
र्वसंमतं। तथा शास्त्रीयप्रक्रियायां सर्वत्र वस्तुतस्तु वाचकता स्फोटैकनिष्ठा॥ तत्र वाष्टौ पक्षाः॥ वर्णस्फोटः १
पदस्फोटः २ वाक्यस्फोटः ३ अखंडपदस्फोटः ४ तादृग्वाक्यस्फोटः ५ इत्थं पंच व्यक्तिस्फोटाः वर्णपदवाक्य
भेदेन त्रिविधो जातिस्फोट इत्यष्टौ तथाहि। किंचिद्वर्णव्यत्यासादिना शक्ततावच्छेदकानुपूर्वीभंगस्य प्रतिपदमोस
र्गिकत्वात्तत्र च केनचित् धकं वित्प्रथमं शक्तिग्रहस्तेन कस्य स्मारणं तद्धविमित्यत्र विनिगमनाविरहात् वृषभो
वृषः इत्यादाविव ककारकुरुककरइत्यादीनां प्रयोगसमवायिनां सर्वेषामेव वर्णानां तत्तदानुपूर्व्यवच्छिन्नानां
वाचकतेति वर्णस्फोटपक्षः। कस्तर्हि तयोर्वाचकानवेति विप्रतिपत्तिश्चेदिदं। रामं रामेण रामाय हरये हरौ हरानित्या

दौ परिनिष्ठिते रूपे क्रियानंद्रव्यादिवाचकः क्रियां स्वकर्मत्वादेरित्यस्य विनिगंतुमशक्यतया शमनमित्यादिप
रिनिष्ठितपदमेव वाचकं कर्मत्वादिविशिष्टस्येति पदस्फोटपक्षः॥ यादध्वीदं हरेव विकल्पे वेत्यादावपि विनिग
मनाविरहतोऽत्याद्वाक्यमेव विशिष्टार्थशक्तमिति वाक्यस्फोटः॥ एकः पद इति वदेकं पदं वाक्यं वेत्यबा
धितप्रतीते वर्णातिरिक्तमेव पदं वाक्यं वा अखण्डं वर्णव्यंग्यमेकत्वप्रतीतिरौपाधिकीति चेत्सटेपितथात्वा
पत्तेः॥ कः पदार्थोस्माविति चेत् भावः भावादिशेषु क्वांतर्भवतीति चेत्। त्वत्परिभाषिते द्रव्यादिष्वंतर्भूतत्वान्नहि
तावता प्रमाणसिद्धं प्रत्याख्यातुं शक्यते अभिमतपदार्थवादे गौरवमिति चेत्। व्यक्त्यजातवापि नास्ति उपा
धीयत्वात्तु सर्वैः स्वत्वाभावत्वाभावत्वाभ्यां नित्यत्वानित्यत्वादिना वा विभजनात् भावविभाजकोपाध्ययस्तु
पटविभाजकोपाधिवदेवानावश्यकः॥ अस्मिंश्च पक्षद्वये वर्णा अपि अनावश्यकाः॥ नन्वनुभवसिद्धास्त इति

वेत्। व्यंजकध्वनिविशेषोपहितः स्फोट एव ककाराद्यात्मना व्यवह्रियत इति अभ्युपगमात्। भाट्टमते नाद्यो
मंदो गकार इतिवदद्वैतसिद्धांते विषयसंबंधजन्यवृत्तिवैचित्र्येण व्यंग्यस्वरूपस्य स्वैवैचित्र्यवत्त्वात्। अत
एव वाचस्पतिमिश्राः। तत्वबिंदौ वस्तुतः ककादतिरिच्यमानमस्तैंगकारस्याभावादिति स्फोटवादिमतं।
न्यास्यनूयपावा अखंडेष्वपि लकारादिषु वर्णेषु वर्णांतरसमानाकारैकदेशावभासः तथा च पक्षे
वभासोपि न विध्यति। उक्तं च बोपदेवेन। प्राकृतत्वादवशक्तत्वे जातेऽपि न मीक्षितो। उपाधिको वा भेदो
वा वर्णानां तारमंदवदितो भर्तृहरिरप्याह। पदेन वर्णा विद्यंते वर्णेष्ववयवा न च। वाक्यात्पदानामत्यंतं प्रवि
वेको न कश्चनेति। तस्मादखंडपदवाक्यं वेति पंचापि व्यक्तिस्फोटा तदभेदाः॥५॥ जातिस्फोटवादिनस्तु।
घोतरत्यादिकं शक्ततावच्छेदकतया आपेपक्षत्रयेपि यथायथं वाच्यां अन्यथा सरो रस इत्यादावर्ण

विशेषप्रतीत्यनापत्तेः। तस्माद् उपाधिरूपं उपाधिस्वपरं परासंबद्धा जातिर्वा। सा च सर्गाधिष्ठानब्रह्मस्वरू
पात्मिका। तथा च शक्यांशद्वयशक्तांशे धीन्यायसामान्येनाकृत्यधिकरणरीत्या ब्रह्मतत्त्वमेव तत्तदुप
हितं वाच्यं वाचकं वा। अविद्या वा आश्रितविषयकधर्मविशेषो वा जातिरिति पक्षे तु सैव वाचिकास्त्वित्याकूतः।
स्वरूपस्य वाच्यत्वेऽपि तत्पक्षाः सिद्धान्तग्रन्थेषु तत्रोपनिबद्धाः। तथा हि। स्थानिवत्सूत्रे सर्वे सर्वपदादेशा इति भाष्यग्रन्थः। पद्य
तेऽर्थोऽनेनेति अर्थविदिह पदं न तु सुप्तिङन्तमेव। तथा च ब्रूहि इत्यस्य तेऽस्तु इत्यर्थ इति टीकाग्रंथस्य वर्णस्फोटेऽनु
कूलः। तथा स्फोटान्यथानुपपत्त्या न सम्पर्कस्यैवादेशत्वमिति स्फोटनैतत्तमपरिभाषयैव तस्यास्य मिथ्यात्वाद्दि
निर्वाहात् तदर्थे यथासंख्यसूत्रे नारब्धव्यमिति भाष्यमपि पदस्फोटे वाक्यस्फोटे तु इहैव ब्रूपरहेकेयेनो ब्रा
तेनेति भाष्यप्रतीकमुपादाय कैयटेन भाष्यार्थतया वर्णितौ वर्णव्यतिरिक्तस्य वाक्यस्येति वदता तयोः स्वं

पदस्य १

शा० कौ०
९

उताप्युक्तानित्येषु शब्देषु कूटस्थैरविचालिभिर्वर्णैर्भवितव्यमिति तत्र तत्र भाष्ये स्वरवं उतोक्ता। मायानिस्व
त्ययंत्रेषु कैतवान्ततराशिषु। अयोघनेषौ जस्थंगे सीरांगे कूटमस्त्रियामित्यमरः। पस्पशायामेव प्रपञ्च
कांतरे किंपुनरित्यादि भाष्यमुपादाय केचिद्वर्णस्फोटः अपरे पदस्फोटं वाक्यस्फोटं वाऽऽहुरिति वदता कैयटे
न अइउण् इत्यत्र व्यक्तिस्फोटजातिस्फोटयोर्वलावलं विंतयता प्रत्याहाराह्निकांते अक्षरं न क्षरं विद्या
दिति भाष्यव्याख्यावसरे व्यवहारनित्यतात्तु वर्णपदवाक्यस्फोटानां नित्यत्वं तु जातिस्फोटस्येति प्रतिपादय
ता अनुपदमेव ब्रह्मतत्वमेव हि शब्दरूपतया प्रतिभातीत्यर्थ इति व्याचक्षाणेन सर्वे पक्षाः सूचिता एवायस्
तु अविद्येव जातिरिति पक्षस्तदभिप्रायेण जातिस्फोटस्यापि व्यवहारनित्यतेति अक्षरं न क्षरं विद्यादित्यस्य
कैयटीयपाठांतं। आद्यंतौ टकिताविति सूत्रेव भाष्य एव वर्णस्फोटपदस्फोटावुक्तौ। असत्यमेव प्रकृतिप्र राम
त्ययविभागं तदर्थं वाश्रित्य रेखागवयन्याये न सत्यस्य पदस्फोटस्य व्युत्पादनमभिप्रेतमिति तत्रैव कै ९

पटः। अर्थवद्धातुः। स्वंरूपं शब्दस्य। तपरस्तत्कालस्येत्यादिसूत्रेष्वपि स्पष्टमिदं भाष्यकैयटादावित्यलं ब
हुना। जाते स्वब्रह्मात्मकत्वमुक्तं हरिणा। संबंधिभेदात्सत्तैव भिद्यमाना गवादिषु। जातिरित्युच्यते तस्यां
सर्वे शब्दाः व्यवस्थिताः। तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते। सा नित्या सा महानात्मा तामाहुस्त्वतलादय इति।
जातेः स्फोटत्वमपि प्रपञ्चहृत्कारे स एवाह। अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता। कैश्चिद्व्यक्तय एवास्या
ध्वनित्वेन प्रकल्पिता इति। यद्यपीहाष्टौ पक्षा उक्तास्तथापि वाक्यस्फोटपक्षे तात्पर्यं ग्रंथकृतां। तत्रापि जातिस्फो
टः। तत्त्वव्येयं पूर्वपूर्वोपमर्देनैवोत्तरोत्तरोपन्यासात्। तथा च प्रथममव्युत्पत्तेः। व्यवहारप्रधानतया संपूर्णस्य वा
क्यस्य विशिष्टे प्राथमिकः शक्तिग्रह इति निर्विवादं। सत्वावापोद्धाराभ्यां अवयवानां शक्तिः स्थितिः न्यायोपष्टंभेन त्य
ज्यत इति दर्शनांतराणां पंथाः। एकादेशादि सूत्रेऽव्यक्तरीत्या विनिगमनाविरहेण कैश्चित्स्वरूपादिसूत्रे पूर्व

लोपाद्यभ्युपगमेन वैयाकरणानां कलहे सति अवयवशक्तेर्दुरूपपादतया प्राथमिकशक्तिग्रह एव प्रमा
रूप इति तु सैद्धान्तिकः पन्थाः। उक्तं च हरिणा। तत्र यन्मुख्यमेकेषां तत्रैतेषां विपर्यय इति। ब्राह्मणार्थोऽपि नास्ति
कश्चिद्ब्राह्मणकं बजो देवदत्तादयो वाक्ये तथैव स्युरनर्थका इति वा। एवं स्थिते निपाता द्योतका विकरणेऽन
र्थका इत्यादिविचारोऽपि प्रक्रियादशायामेव। आहुर्वा। उआदीनां व्यवस्थार्थं द्योतकत्वेन प्रकल्पनं। आतपसर्ग
योः शास्त्रे व्यात्तुरेव तुतात् श्र इति। तादृशो ऽरवं इ इत्यर्थः। एवं च नामार्थयोरभेद एव संसर्गः प्रत्ययार्थः प्रधा
नमित्यादिव्युत्पत्तयोऽपि प्रक्रियाश्रया एव। उक्तं च किं गर्भजन्ये किं गर्भकादम्भातीति नो मते। विचारः फलितः
सर्वत्र कृतिप्रत्ययाश्रय इति। आरोपितस्यापि पारमार्थिकेऽनुपायता न विरुद्धा। लिपिस्थजातं स्पतीशास्त्रवाचं दृ
दीनां लौकिकदृष्टान्तानां अर्थवादवाक्यपञ्चकोशावतरणादीनां तत्त्वान्तरसिद्धानां पूर्वआसिद्धादीनां वैतथ्या

स्त्र स्थितानां प्रागेव दर्शितत्वात्। तदेवं पक्षे भेदेनाविद्यैव ब्रह्मैव वा स्फुरत्यर्थोऽस्मादिति व्युत्पत्त्या स्फोट इ
ति स्थितं। ...ह वा। शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते इति। सम्भारं भवस्तु भावानामनादिब्रह्मत्वग्र
तमिति च तदेवं वररुचिकान्वेषणेऽपि प्रवृत्तानां भिन्नामलिंजब्रुवानिति वासिष्ठरामायणे काकभुशुण्डाख्या
येन शब्दविवादाय प्रवृत्तः सन् प्रसंगाद्द्वैतेऽप्यौपनिषदे ब्रह्मण्यपि व्युत्पन्नतामित्यभिप्रायेणेऽभग
वान् भर्तृहरिर्विवर्तवादादिकमपि प्रसंगाद्व्युत्पादयत्। अनन्तं वान्तरे स्फुटं प्रकृते नातिवोपयुक्तेवे
ति नेह तन्यते। इति स्फोटस्वरूपव्युत्पादनं। स्यादेतत्। वर्णा एव वाचकास्तु इति इत्यादिव्यवहारात्तल्लिपा
वेव शब्दभ्रममवतां तत्रैव वाचकाभिमानं तु यथा वा। नानापुस्तकमुपयुज्यते यथा तथैव भेदग्रहवतामपि नि
वस्तुस्थितिः। एवमिहापि प्रकृत्यादिविभागे पारमार्थिकताभिमानवतामपि युज्यत एव शास्त्रान्तरं किमर्थं

शा० कौ०

११ ॥ तथास्ति२ सत्यमूा२

कल्पनाव्युत्पादनक्लेशः। अत एव हि भाष्यकारेणापि शब्दोऽनित्यो नित्यो वेति विकल्प्योभयथापि व्याकरणे

निष्प्रत्यू२ रंभस्यं हत्वा यथास्तु दासिध्यत इति वेत्रां व्युत्पत्त्यर्थं वस्तुस्थितिः कथिता। पक्षभेदेषु हि गौणमुख्येषु

व्युत्पादितेषु तत्र तत्र परस्परविरुद्धतया [illegible] ना अपि सिद्धांतग्रंथाव्यवस्थापयितुं शक्यते। स्वार्थ

द्रव्यादीनां पंचानां क्रमेण भानमित्यादि वक्ष्यमाणमपि कल्पनयैवोपपादयितुं शक्यत इति दिक्। ननु वस्तुस्था

स्थु शब्दो विषयः। अस्तु वा प्रकृतिप्रत्ययादिकल्पनया तद्व्युत्पादनोपपत्तिः। तथापि व्याकरणाध्ययनस्यानु

ष्ठापकं किमिति चेत्। नित्याध्ययनविधिरिति गृहाण। श्रूयते हि। ब्राह्मणेन निष्कारणो धर्मः षडंगो वेदोऽध्ये

योज्ञेय इत्यन्वयः। तथा च सांगवेदाध्ययनतदर्थज्ञानरूपोयं धर्मो नित्यः संध्योपासनादिवदित्यर्थः। राम

श्रुतिरेषेति हरदत्तादयः। स्मृतिरिति भट्टाचार्याः। तत्र यदि स्मृतिरेवेति प्रामाणिकं तर्हि आगमः खल्व ११

२ इति। निष्कारणो दृष्टकारणनिरपेक्षो नित्य इति यावत्। कार्यं तेनुष्ठाप्यते नेनेति कारणं फलं। ब्राह्मणेन षडंगो वेदोध्येयो ज्ञेय ×२

ष्टि

वीति साङ्ख्येप्यागममूलकत्वादागमः स्मृतिरेवेति व्याख्येयं। अङ्गत्वं चाङ्गत्वेन संस्तवात्। उक्तं हि शिक्षायां मुखं
व्याकरणं तस्य ज्योतिषं नेत्रमुच्यते। निरुक्तं श्रोत्रमुद्दिष्टं छन्दसां विचितिः पदे। शिक्षा घ्राणं तु वेदस्य ह
स्तौ कल्पोऽत्र वक्ष्यत इति। उपकारकतयाप्यङ्गत्वं। व्याकरणं हि अर्थविशेषमाश्रित्य स्वरविशेषादीन्विदधत्
तदर्थविशेषनिर्णये उपयुज्यते। ज्योतिषमपि स्वाध्यायोपयोगिनं अनुष्ठानोपयोगिनं च कालविशेषं प्रतिपादय
ति। निरुक्तं तु व्याकरणस्यैव परिशिष्टप्रायं। बाहुलकादिसाध्यानां लोपागमविकारादीनां प्रायशस्तत्र संग्रह
त्। छन्दोविचितिरपि गायत्र्यादिलक्षणेन गायत्र्या यजतीत्यादिविध्यर्थनिर्णये उपयुज्यते। शिक्षापि वर्णो
च्चारणप्रकारं दर्शयति। कल्पसूत्राण्यपि प्रकरणं तत्र पठितस्य न्यायलभ्यस्य शेषस्य वा तत्रापठितस्य वाङ्गजा
तस्योपसंहारेण प्रयोगं दर्शयन्ति। तस्मात्षडप्यङ्गानि। तेष्वपि प्रधानं व्याकरणं। पदपदार्थावगमस्य व्याकर

णाधीनत्वात्। वाक्यार्थज्ञानस्य तन्मूलकत्वात्। अत एव तस्य शिक्षायां मुख्यत्वेन निरूपणं कृतं। मन्वादिस्मृ
तिष्वपि अंगाध्ययनविषयः प्रसिद्ध एव। तथा वाध्ययनविधिर्व्याकरणाध्ययनस्यानुष्ठापक इति स्थितं।
तथा च संध्योपासनादेरभावे प्रत्यवायो ऽनुष्ठाने च पापक्षय इति यथाभ्युपेयते तथा व्याकरणाध्ययनस्या
प्यननुष्ठाने न वबोध्यं। रक्षा प्रतीति फलानि तदा एवापि संति। तथा च भाष्यं। कानि पुनरस्य प्रयोजनानि रक्षोह
गमलघ्वसंदेहाः प्रयोजनमिति। अत्र प्रयुज्यते प्रवर्त्यते ऽनेनेति करणव्युत्पत्तेः। प्रयोजयतीति कर्तृव्युत्पत्त्या
वा कुलकाल कर्तृव्युत्पत्तौ वा उभयथापि प्रवर्त्तकविधिपरः पुल्लिंगः प्रयोजनशब्द एकः। फलपरः क्लीबोप
रः। उभयोर्नपुंसकमनपुंसकेनेति नपुंसकैकशेषे एकवद्भावस्य वैकल्पिकतया प्रश्ने बहुवचनं उत्तरे एकव
चनं च बोध्यं। तत्रागमः प्रवर्त्तकः रक्षोहलोपवासंदेहास्तु फलानि इति विवेकः। तत्र प्रवर्त्तक आगमो व्या

रव्याताः। फलानि व्याख्यायंते। तत्र रक्षावेदसंरक्षणं। तथाहि। नाणायामदृष्टा लोपागमवर्णविकारज्ञोऽसि २१
दश्यंते। ते केवलप्रयोगशरणैः ग्रामादिकाः संमाव्येरन्। वैयाकरणस्तु लक्षणं दर्शितदेवरूपं स्थापय
ति। तत्र लोपोदाहरणं। त्मनादेवेषु विविदे मितद्रुः। त्मनात्मनेत्यर्थः। मंत्रेष्वाड्यादेरात्मन इत्याकारलोपः।
आगमो यथा। देवासः आसेरसुक्। अजसेरसुगित्यसुगागमः। लोपागमो यथा। देवा जुहुर्वा जुहुर्हुतेल रु४
र्थः। दुहेर्लङो रुस्थाद्देशे कृते लोपस्तस्त आत्मनेपदेष्विति तलोपः। बहुलं छन्दसीति रुडागमः। एतेन नाभि
रं दुहे। बिभ्याद्दत्तेधेन वो दुहे इत्यादि लङुंतमपि व्याख्यातं। वर्णविकारो यथा। गृभ्णामि ते सौभगत्वाय। हृ
ग्रहोर्भश्छन्दसि हस्येति वक्तव्यमिति भकारः। प्रत्ययोपि छन्दसोक्तः। यथा। ज्रह्मा भंव नियामं वे ति। जदिय
हृ इति स्कन्धे ज्रह्माम नियामो व छन्दसि स्तुयुध्रमनतिपातनयो इति ववनादुन्निदूर्वाति हेर्धेसू। तत्र ज्वर

ग०कौ०
१३
13

ऊ३

र्वाऽस्तु तेऽग्न्येजोके पि विशिष्ठाधस्तु निपूर्वा लवार्त्तिकोक्तः छंदस्येव। संनिवेशविशेषयुक्तः पात्रविशेषाः स्रुचः
द्रहत्वनुद्रूपमतो देवस्नहत्वोऽग्नावेति। नुहूस्नुपभृतेति निशानं वेस्तुपभृतं निपृष्ठतीव वचनात्। मकाय
सं३ देशः प्राग्वत्। ऊहे पि प्रयोजनं तथाहि। यत्राङ्गजातं पूर्णमुपदिष्टं सा प्रकृतिः। यथा दर्शपूर्णमासौ। यत्र नोपदिष्ट पूर्णरू
पं सा विकृतिः। यथा सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकाम इति विहितो यागः। तत्र वैकृतस्यूर्ध्वविषयभूतायां भाव विधेः
नायां करणीभूते यागे उपकाराकाङ्क्षायां तन्मुखेन प्राकृतमङ्गजातं प्राप्यते। वैदिके करणे तादृशानामे
वाङ्गानामपेक्षितत्वात्। ते चामे व प्रकृतौ कॢप्तसामर्थ्यत्वात्। तद्विशेषस्य चैकदेवतत्वादिनाश्यकत्वानत्वा
त्। तस्मात् प्रकृतिवद्विकृतिः कर्तव्येति पूर्वमीमांसायां स्थितं। तत्र यस्याङ्गस्य प्रकृतौ यदुपकारः कॢप्तस्त
स्य विकृतावसंभवे निवृत्तिः। यथा प्रकृतावबघातस्य वैतुष्यमुपकारः यान्तरतां तस्य कृष्णलेष्वसंभवाद् राम १३

वै[redacted]निवृत्तिः। मंत्राः अप्रयंगा। तेषां चानुक्तेयार्थप्रकाशनं कार्यं। तत्र प्रकृतौ यस्य मंत्रस्य यदभिधेयं त
द्विकृतौ सा कल्पेन नास्ति तदा कृतस्त स्य मंत्रस्य निवृत्तिः। यथा। ध्रुव रक्षो दिवः सपत्नं वध्यास मित्यव
घातमंत्रस्य कृत्स्नलेषु। यस्य त्वेकदेशस्याभिधेयं नास्ति तस्य तावन्मात्रं निवर्त्तते। यथा। अग्नये त्वा जुष्टं
निर्वपामीत्यस्य मंत्रस्यावयवभूतं देवताभिधायिपदं अपाय्य द्रव्यकत्वे नैकदेवताकत्वेन वाग्नेयविकारम
ते सौर्ये निवर्त्तते। अग्निशब्दे च लुप्त द्वारकतया निवर्त्तमाने एकारोपि निवर्त्तते। अकारांते तेतर प्रकृति संनिधा रां ४
त्वं ३ नेनैव हि एकारस्य संप्रदानैवाच्यां। अकारांतात् तु यथा शब्दस्य। ततश्चतुर्थ्यं तं तस्यायेत्याधुदात्तं। अग्नयद्रत्यस्य
मध्योदात्तस्य स्थाने अह्ना। सोयं प्रकृत्यूहः। लिंगस्य तु विदूहः। यथा। देवीरापः शुद्धाः स्थेत्यस्य विनियुक्तो मंत्रः।
तस्यान्येन हः। देवाः स्थ शुद्धमस्मीति। प्रत्ययमात्रस्य तु विदूहः। यथा। मा मेर्मा संविक्था इति पुरोडाशे वदन मंत्रः।

धा०कौ०
१४
14

तस्य धानाम् इहः। मा भैष्ट मा सं वि जिघ्रम् इत्यादि रि(ति१) इह रदन्तादयः। यातिकास्तु सं विग्ध्वमित्यूहमाहुः। युक्तं चैतत्

प्रकृतावनिष्कृतया विजिर् एव पञ्चावद्यस्य प्रयोगो न तु ३ विजी भयचलनयोरित्यस्यैत्यवधारणेन्द्राजा

तद् एवमपि प्रयोजनं। आहि। अध्यापनं ब्राह्मणस्य वृत्तिः। तन्निर्वाहश्च वैदुष्याधीनः। वैदुष्यं च साध्वसाधु

विवेकः। स च न प्रतिपदपाठादिना संभवति शब्दानामानन्त्यात्। तस्मादुत्सर्गापवादरूपलक्षणद्वारा तद्बोध

नेनाप्येवं अन्यथानुगौरवं। ननु देहेपि प्रयोजनं। तथाहि। स्थूलपृषतीमनड्वाहीमालभेतेति श्रूयते। तत्र सं

देहः। कर्मधारयो यं बहुव्रीहिर्वेति। तत्र कर्मधारयपक्षे पृषतीशब्देन मत्वर्थलक्षणया पृषत्वती बिंदुमती गौरे

वाभिधीयते। स्थूलापि सैव। बिंदूनां स्थौल्यं तानवं वा यथाप्रस्तावस्तु। बहुव्रीहौ तु स्थौल्यं पृषतानामेवेति। सोयं संदे राम

लो कृपावेत्यत्रानादरेदः। तत्र लकारककारे उदात्तत्वं दृष्ट्वा पूर्वपदप्रकृतिस्वरेण बहुव्रीहिं वैयाकरणो निश्चिनो १४

ति। ततश्च निश्चयेन प्रतिबंध्या संशयानुत्पादः॥ स एवासंदेहः॥ अर्थाभावे अव्ययीभावो संदेहमिति स्यादिति चेन्ना
पर्यायेण अव्ययीभावतत्पुरुषसंज्ञाद्वयमपीह भवतीति द्वितीये उपपादयिष्यमाणत्वात्॥ अत एवोभयथाप्यनु
नियोगः॥ अद्भुतायाम् असंहितमिति॥ अथासंदेहितयेति वा एवं द्वंद्वपीतस्योपहूतस्योपहूतो भक्षयामी
त्यादावपि स्वरेणैव बहुव्रीहिनिर्णये द्वंद्वपीतापि करणे अवैयाकरणान् प्रति सार्थकं। कृत्वाचिंतान्यायेन
वा नेयमिति दिक्॥ तदेवं रक्षोहागमलघ्वसंदेहाख्यानि चत्वारि फलानि व्याख्यातानि॥ आगमस्तु प्रवर्तक इत्युक्तं।
भाष्ये तु संदर्भशुद्धये फलं वक्तुं यस्य प्राक्पश्चाद्वा प्रवर्तके वक्तव्ये मध्ये तदुत्पापफलेन संदर्शनेन नित्यानाम
पि फलपर्यवसानमस्तीति सूचितं। फलं तु पापक्षयः। प्रत्यवायानुत्पत्तिर्वा। धर्मेण पापमपनुदति। विहित
स्याननुष्ठानान्निंदितस्य च सेवनात्। अनिग्रहाच्चेंद्रियाणां नरः पतनमृच्छतीत्यादिवचनानीह साधकानीति

व१ हेलयो१

दिक्। इमानि च भूय इत्यादि भाष्येण प्रवर्त्तकं वचनांतराणि उदाहृत्य व्याख्यातानि। तच्चाप्यातेषु गृहे ल यदि
कुर्वतः परावभूवुस्तस्माद्ब्राह्मणेन न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्द इति ब्राह्मणं। अत्र
न म्लेच्छितवा एतस्य विवरणं नापभाषितवै इति। उभयत्रापि कृत्यार्थे तवैकेन्केन्यत्वन तवे प्रत्ययः। धातू नइतिर
नामनेकार्थतया निंदावचनान्म्लेच्छधातोः कर्मणि यत् तेनापशब्दसामानाधिकरण्यं न विरुध्यते। अत्र
न म्लेच्छितव्यमिति निषेधस्य तेऽसुरा इत्यादिरर्थवादः। न चेह रात्रिसत्रन्यायेन अर्थवादिकं फलमस्त्विति वा त्र४
च्यं। द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवादः स्यादिति न्यायेन अपापश्लोकश्रवणवच्छास्त्र
मात्रपरत्वात्। प्रकरणाल्लेकं वं गांस्यं निषेध इति पर्वाणि त्वर्वाणो नामेत्यादावुत्तरग्रंथे भाष्यकारैरेव रगम
स्फुटीकरिष्यते। अत एव इहापि परान्भूतामामन्भूमेत्य प्येयं व्याकरणमिति नोपसंहृतं किंतु म्लेच्छमामन्भूमे १५

त्येव म्लेच्छा निंद्याः। शास्त्रबोधितविपरीतानुष्ठानादिति भावः। अत्र हैहेप्रयोगे हैहयोरिति प्लुते प्लुतत्वप्रयुक्ते
प्रकृतिभाव एव कर्त्तव्ये तदकरणं म्लेच्छनमित्येके। ननु सर्वः प्लुतः साहसमनिच्छता विभाषा कर्त्तव्य इति भा
ष्यकृता वक्ष्यमाणत्वान्नैष दोष इति चेत्। सत्यं। अत एवापरितोषाद्वाक्यद्विर्वचनं म्लेच्छनमित्यपरे व्या
ख्यातं। सर्वस्य द्वे इत्यत्र पदस्य ग्रहणस्य बोधितत्वादिति तेषां भावः। ननु नेदं शास्त्रीयं द्विर्वचनं। किंतु तात्पर्य द्योतनार्थमेव लौकिकः पुनः प्रयोगः।
ऽसन्नावृत्तिः शास्त्रादनावृत्तिः शास्त्रादितिवदिति चेत्। तर्ह्याम्रेडितस्वरानुपपत्तिः। यदि तु तत्राम्रेडितस्वरवि
निर्मुक्त एव पाठस्तर्हि। अरिशब्दे रेफस्य लत्वमपशब्द इत्यवधेयं। इदं च भाष्यादिषु प्रसिद्धं श्रुतिपाठम
नुसृत्य व्याख्यातं। अयं च पाठः क्वचिच्छाखायामन्वेषणीयः। माध्यंदिनानां शतपथब्राह्मणे तु हेलवो
हेलव इति वदंत इति पठित्वा तस्माद्ब्राह्मणेन म्लेच्छेदिति पठ्यते। तत्र यकारस्थाने वकारोऽपशब्द इति स्पष्ट

मेव॥ तथा शिक्षायामुपपठ्यते॥ मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह। स वाग्वज्रो यजमा
नं हिनस्ति यथेंद्रशत्रुः स्वरतोपराधादिति। स्वरेणो स्वरतः। हीयमान पापयोगा इति तत्सिः। मिथ्याप्रयु
क्तः। यदर्थप्रतिपादनाय प्रयुक्तस्ततोर्थांतरं स्वरवर्णदोषात्प्रतिपादयन्। अतएव तमर्थं नाहेत्यर्थः। वा
गेव वज्रः। हिंसकत्वात्। यजमानं हिनस्तीति यथाध्वर्युकृताद्दोषाद्यजमाने धर्मोत्पत्तिः। एवमध्वर्यु
कृतादपशब्दप्रयोगाद्यजमाने प्रत्यवाय इत्यर्थः। यथेत्युदाहरणे। इंद्रशत्रुः। इंद्रशत्रुशब्दः। पुरा किल
विश्वरूपाख्ये त्वष्टुः पुत्रे इंद्रेण हते सति कुपितस्त्वष्टा इंद्रस्य हंतारं वृत्राख्यं पुत्रांतरमुत्पिपादयिषु
रभिचारिकं यागं कृतवान्। तत्र च इंद्रस्य शातयिता शत्रुः। हिंसक इति यावत्। तथाभूतः सन् वर्द्धस्वेति
प्रतिपादयितुं इंद्रशत्रुर्वर्द्धस्वेति प्रयुक्तं। एवं ताच्छदेरौणादिकः क्रुन्प्रत्ययः। प्रज्ञादिगणे निपाताद्ध्रस्वत्वं।

इंद्रशत्रुत्वस्य विधेयत्वान्न संबोधनविभक्तिः। तस्या अनुवाद्यविषयकत्वात्। अत एव राजन्युध्यस्व
राजा भव युध्यस्वेत्यनयोर्व्यवस्थयैव प्रयोगः। राजत्वस्य सिद्धत्वे संबोधनविभक्तिर्न तु विधेयत्वेपीति। एवं
स्थिते इंद्रशत्रुशब्दे तत्पुरुषसमासप्रयुक्तेंतोदात्ते वक्तव्ये प्रमादादाद्युदात्तः कि जोक्तः। तथा च पूर्वपदप्र
कृतिस्वरेण बहुव्रीहिलक्षणो जज्ञः। इंद्रे हिंस्याता शेषादिके स्वर्जैं इंद्रेत्यादिना रन्प्रत्यये कृते इंद्रशब्द आद्युदात्तो
वृत्त्यादितः तेनेंद्र एवास्य हिंसकः संपन्न इति श्रुतीतिहासपुराणादिषु प्रसिद्धं। तदिहोदाहरणं तयोक्तं। स्या
देतत्। यज्ञकर्मण्यत्येकश्रुत्येह भवितव्यं। स्याच्च तत्पुरुषबहुव्रीह्योर्विशिष्टेति॥ अत आह॥ जपादिपर्युदा
सेन मंत्रेष्वेव एकश्रुतिर्विधीयते। स्वेच्छया प्रयुज्यमानस्य मंत्रो न भवति। तदुक्तं भेदलक्षणे जैमिनिना। अ
नाम्नातेषु मंत्रत्वमिति। आपस्तंबश्चाह। अनाम्नाता अमंत्रा यथा प्रवरोहनामधेयग्रहणमीति। अत एव

श०कौ०
७
17

मंत्रो हीनः इति पाठस्य शिक्षायां प्रसिद्धत्वेपि त्रस्यमानस्या मंत्रतया यथेंद्रशत्रुरिति वाक्यशेषोऽसंगतः स्या
दतो मंत्रशब्द इह शब्दमात्रपर इत्याशयेन भाष्ये दुष्टः शब्द इति पठितं। ननु स्वाहेंद्रशत्रुर्वर्द्धस्वेतीति वेदे पठ्यत
एवेति चेत्। सत्यं। न हि तं पदं भूतं अनुकार्यं तदनुकरणपाठेपि अर्थपरस्यानुकार्यस्य लौकिकत्वानपायात्।
नन्विंद्रशत्रुशब्दस्य लौकिकत्वे कथं स्वरप्रयुक्तयोर्गुणदोषयोः प्रसक्तिः। स्वरस्य वेदमात्रविषयकत्वादिति
चेन्न। स्वरविधौ छंदोधिकाराभावात् एतावानेव हि भेदः। यच्छंदसि त्रैस्वर्यमेकश्रुतिर्व्यवस्थया आश्रीयते। लो
के त्वैच्छिको विकल्पः। अत एव एकश्रुत्या तत्र पाठस्त्रैस्वर्येण वेति पक्षद्वयमपि तत्र तत्रोपन्यस्तमिति वक्ष्यामः।
नन्वेवं उच्चैस्तरां वेति सूत्रात्विकल्पानुवृत्त्यैव सिद्धौ विभाषाछंदसीत्यत्र विभाषाग्रहणं व्यर्थं स्यात्। प्रसज्यप्र
तिषेधे तु नायं दोषः। यत्र कर्मणीत्यस्य निवृत्तये पुनर्विभाषाग्रहणात्। न च पर्युदासपक्षेप्येवमेवास्त्विति वा

राम
१७

थ्यं। नित्यविकल्पविध्योर्विषयभेदस्यावश्यकतया ऽऽरम्भसामर्थ्याद्देवतन्निवृत्तिसिद्धेः। प्रसज्यप्रतिषेधे तु
नारम्भसामर्थ्यं। ऊहादिषु मन्त्रेषु चरितार्थस्य पूर्वविधेरुत्तरेण छन्दोमात्रविषयकेण बाधसम्भवात्। न चोहा
दीनां छन्दस्त्वमस्ति। मन्त्रब्राह्मणेतरत्वात्। तस्मादसमर्थसमासमाश्रित्यापि प्रसज्यप्रतिषेध एवागत्याऽऽस्था
कर्त्तुमुचित इति चेन्न। पर्युदासपक्षेपि मन्त्रे नित्यं ब्राह्मणे वेति विषयविभागसम्भवेन यद्वा कर्मनिवृत्तये वि
भाषाग्रहणसम्भवात्। उक्तापत्तितोपादेवल्लौके विज्ञपादिषु प्रसज्यप्रतिषेधमाश्रित्येदं ह्येकश्रुतेः प्राप्तो
स्त्यां तदकरणं बहुव्रीहिस्वरकरणं च स्वरतो पराध्यादित्यस्यार्थ इत्याहुः॥ अपतेव॥ यदधीतमविज्ञातं निग
देनैव शब्द्यते। अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। निगदेन पाठमात्रेण। शुष्कैध इति। सांतेन नञो वे
नरप्यः शब्देन ऽप्रकाशं तेन वा पुल्लिङ्गेन निर्वाह्यं। न ज्वलति न प्रकाशते निष्फलं भवतीत्यर्थः। निरुक्ते तु। अपापि

ज्ञानप्रशंसा भवत्यज्ञाननिंदा चेत्युपक्रम्य। स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थं।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मेति मंत्रमुदाहृत्य यदधीतमविज्ञातमित्यादि पठितं।
तत्रापि गृहीतं शब्दतः। अविज्ञातं त्वर्थतः प्रकृतिप्रत्ययादिविभागेनेत्यादि शेषं प्राग्वत्॥ अन्यत्रापि स्मर्
यते। एकः शब्दः सम्यग्ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके कामधुग्भवतीति। एतच्च एकः पूर्वपरयोरिति सूत्रे भा
ष्यके द्रक्ष्यति। एतन्मूलकमेव कात्यायनप्रणीतेषु भ्राजाख्येषु श्लोकेषु स्मर्यते। यस्तु प्रयुंक्ते कुशलो विशे
षेण शब्दान्यथावद्व्यवहारकाले। सोऽनंतमाप्नोति जयं परत्र वाग्योगविद्दुष्यति चापशब्दैरिति। दुष्यति चापश
ब्दैरित्यत्र अवैयाकरणः कर्त्तास्मामपर्याद्व्यः। तथा। अविद्वांसः प्रत्यभिवादे नाम्नो ये न प्लुतिं विदुः। कामं तेषु
विप्रोष्य स्त्रीष्विवायमहं वदेत्। अयमहमित्यस्य अनुकरणं वानितिपरमिति गतिसंज्ञा। ततो गतिसमासे

पिः प्रस्य वामीयमित्यादाविवानुकरणत्वादेवविभक्तेर्लुक्॥ याज्ञिकाः पठंति। प्रयाजाः सविभक्तिकाः कार्या
इति। यद्यपि प्रकृतौ प्रयाजमंत्राः सविभक्तिका एव पठ्यंते तथापि यद्याध्यानादनंतरं यजमानउदरव्यथा
वान्स्याद्यदि वा संवत्सरमध्ये तस्य महती विपत्स्यात्तदा नैमित्तिकीं पुनराधेयेष्टिं विधायतत्रेदमाम्नातं प्रया
जाः सविभक्तिका इति। तत्र केवलविभक्तेः प्रयोगानर्हत्वात्प्रकृतिराक्षिप्यते। सा चाग्निशब्दरूपा। ननु याज्ञिकावि
त्। निरुक्ते देवताकांडे अथ किं देवताः प्रयाजानुयाजा इति प्रश्नमवतार्य मंत्रवर्णादानुदाहृत्य आग्नेया इति तु
स्थितिरित्युपसंहारात्। तस्मादादित्यवत्सर्वेषु प्रयाजेषु चतस्रो विभक्तयोऽग्निशब्दप्रकृतिकाः पठ्यंते इत्यादि श्रौत
ग्रंथेषु द्रष्टव्यं॥ तथान्यत्रापि॥ यो वा इमां पदशः स्वरशोऽक्षरशो वाचं विदध्याति स आर्त्विजीन इति पदं पदमिति संबोधे
कवचनाद्ब्रवीम्याचामिति शेषः। स्वरशो दात्तादिः। अक्षरं व्यंजनसहितो वर्णः। सत्विजमर्हतीत्यार्त्विजीनो यजमानः। सलि

श्रा २

कर्मार्हतीत्यार्त्विजीनो याज्ञकः। यज्ञर्त्विग्भ्यां घखञाविति सूत्रेण यज्ञर्त्विग्भ्यां तत्कर्मार्हतीति चोपसंख्यानमि
ति वार्त्तिकेन खञ्। यज्ञेन याजने च विदुष एवाधिकार इति भावः। ऋग्वेदेपि बहवो मंत्रवर्णाः। चत्वारि शृंगा च
त्वारि वाक्। उत त्वः पश्यन्। सक्तुमिव इत्यादयः। तितउ परिपवनं भवतीति भाष्यं। चालनीति तितउः पुमानिति तु स
मरस्य प्रमाद इत्येके। वस्तुतस्तु तत्र भाष्यानुरोधादमरग्रंथे पुंस्त्वायोगमात्रं व्यवच्छेद्यं न त्वन्ययोगोपि। तथा
च पुंनपुंसकवर्गे। स्याद्वस्तु हिंगु तितउ इति त्रिकांडशेषः। अत एव तितउमावपेति पचतीत्यभियुक्तग्रंथा
अपि संगच्छंत इति दिक्। याज्ञिकाः पठंति। आहिताग्निरपशब्दं प्रयुज्य प्रायश्चित्तीयां सारस्वतीमिष्टिं निर्व
पेदिति। तथा दशम्युत्तरकालं पुत्रस्य जातस्य नाम विदध्याद्घोषवदाद्यंतरंतस्थमवृद्धं त्रिपुरुषानूकमन
रिप्रतिष्ठितं तद्धि प्रतिष्ठिततमं भवति द्व्यक्षरं चतुरक्षरं वा नाम कृतं कुर्यान्न तद्धितमिति। नामकरणे अपि

कारिणः। पितुर्येत्रयः पुरुषास्ता न तु कायति। अभिधास्यते इति त्रिपुरुषान्तकं। अन्येषामपि दृश्यत इति दीर्घः। त्रि
पुरुष इत्यत्र पात्रादित्वात् स्त्रीत्वाभावः। मूलविभुजादित्वात्कः। यत्तु उपपदाविवक्षया आतश्चोपसर्ग इति कं
कृत्वा ततः षष्ठीतत्पुरुष इति। तत्तु कर्मण्यणिति सूत्रे अकारादनुपपदात्कर्मोपपदो विप्रतिषेधेनेति वा
र्त्तिकस्य नदीसूत्रे स्थास्याविति मूलविभुजादित्वात्क इति भाष्यस्य च। अनन्तु गुणं। अत एव गंगाधरादिशब्दा
नां संज्ञाशब्दत्वमिति प्राञ्चः। वस्तुतस्तु। प्रथमं कर्माविवक्षायां अन्तकपदं व्युत्पाद्य पश्चात्कर्मसंबन्धेप्यदोषः।
वार्त्तिकादिकं तु प्रथममेव कर्मविवक्षामभिप्रेत्य। अन्यथा कृतपूर्व्यादिषु का गतिः। अत एव शाकं बद्धु दुपहं
तुमिति भाष्यव्याख्यायां बहिरंगस्त्रीत्वप्रतीत्या अंतरंगः पदसंस्कारो न विहन्यत इति कैयटोपि वक्ष्यति। विवक्षा
वजो क प्रक्षिप्य नुसारिणी न तु स्वायत्तेति विपरम्भां जेरित्याद्यावपि पूर्वं ध्यातुः साध्यनेन पुष्यत इति पक्षस्तु पच

शा०कौ०
२०
20

त्यविजयतीत्यादिना पादनीयमित्तिदिक्॥ तथा च ऋग्वेद एव पठ्यते॥ सुदेवो असि वरुण यस्य ते सप्त सिन्धवः।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिवेति। अस्यार्थः। हे वरुण। सत्यदेवो असि। यस्य ते काकुदं तालु। काकुज्जिह्वा।
सात्र धीयते उत्क्षिप्यते स्मिन्निति काकुदं। वदेरूढे पणमर्थः। ध्यातूनामनेकार्थत्वात्। ततश्च अर्थे कविध्यानमित्य
धिकरणे कः। संप्रसारणं। षष्ठीतत्पुरुषे शाकंध्वादित्वात्पररूपं। नुदश्चेरणे इत्यस्मादधिकरणे कः। एजोद
रादित्वान्नुमागमस्य लोप इत्यन्ये। निरुक्तस्वरसोप्येवं सप्त सिन्धव इव सिन्धवो विभक्तयः अनुक्षरन्ति तालुप्रा
प्य प्रकाशन्ते इत्यर्थः। अत्र दृष्टान्तः। यथा सुषिरं लोहमयीं प्रतिमां प्रविश्याग्निः प्रकाशते। तथेति। अग्निर्हि त
त्रत्यं मलं भस्मीकृत्य प्रतिमां शुद्धं करोतीति तथा विभक्तयो विश्वाश्रीरं पापमपाकुर्वन्तीति भावः। सूर्मी स्थूणा
यः प्रतिमेत्यमरः। सूर्यते वा सूर्मी ज्वलन्ती मा लिङ्गेन्नत्यवेगुरुतत्यगइति। अपि पूर्व इत्यत्र चाछन्दसीत्यनुवृत्ते

राम
२०

र्णेन देशः। सुषिरमित्यत्रार्शआद्यच्-संभेदोपचारो वेत्याहुः। वस्तुतस्तु ऊषसुषिमुष्कमधो र इति मत्वर्थीयो
रप्रत्ययः। रंध्रं श्वभ्रं वपा सुषिरित्यमरः। सरंध्रे सुषिरं त्रिषु सुषिरिति वा सुषु सुष्यतीति सुषिरिति क्षीरस्वामी। गर्ते
गर्त्तान्विते वा घविशेषे सुषिरं त्रिषु सुषिरिति शाश्वतः॥ इति प्रयोजनप्रपंचः॥ इत्थं विषयप्रयोजनयोरुक्तयोः संबंधा
धिकारिणावुक्तप्रायावेवेति पृथङ्नोक्तौ। इत्थं येन प्रयोजनं दृष्टं ततोऽन्य एवेतरस्त्विच्छं प्रत्यवतिष्ठते। ननु यथाम
ध्याये त्वाचार्येणोक्तं प्रयोजनमस्माकमनुकूलमेव वेदमधीयते तदङ्गभूतं व्याकरणमप्यध्येष्यंते। तत्किं प्रयोजन
वर्णनक्लेशेनेति। अत्रेदमुत्तरं। प्रायेणेदानींतनानामस्याप्युपेक्षत्वाद्धि प्रबकुलत्वाच्च प्रधानभूतो वेदस्तावन्ना
धीते। तदध्ययनकाले एव बाल्यात्प्रयोजनादिकं प्रष्टुमसमर्थाः शिष्या गुरूणा उपदिश्यमानं वेदं गृह्णंतीति यु
क्तं। ततो गृहीतवेदाः प्रौढिमापन्ना विवाहपर्यंतत्वरमाणेन व्याकरणाध्ययनाय गुरुणा प्रेर्यमाणाः अपि न सहसा

प्रौ०कौ०

२१

म

प्रवर्त्तंते। वेदान्तो वैदिकाः शास्त्रः सिद्धा लोकाश्च लौकिकाः। अनर्थकं व्याकरणं इति च प्रत्यवतिष्ठंते। तान्प्रतिपु
त्रमेव प्रयोजनानादिवर्णनं। पूर्वकल्पेषु व्याकरणं शिक्षादीनि लक्षणानि प्रथमं पाठयित्वा तत्तल्लक्षणानु
संध्यायनपूर्वकं लक्ष्यभूतं वेदं ग्राहयंतः स्थिताः। तदापरं बाल्यावस्थायां व्याकरणपाठात्प्रयोजनप्रश्नवि
रहे तत्प्रतिपादनमपि न कर्त्तव्यमेवेति। यद्यपि श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि। युक्तश्छंदांस्य
धीयीत मासान्विप्रोर्द्धपंचमान्। ततः परं तु छंदांसि शुक्लेषु नियतः पठेत्। वेदांगानि रहस्यं च कृष्णपक्षेषु संपठे
दिति मनुवचनस्य द्व्यर्धमनध्यायेष्वंगान्यधीयीतेत्यादिसूत्रांतराणां च पर्यालोचनया वेदवेदांगाध्ययन
स्य समकालता लभ्यते तथापि सर्पिवचनत्वाविशेषाद्व्यवहारे तेमानि वादेश्च व्रीहियववद्विकल्प एवेति तत्वं।
तदेव मनुवंश्यवत्तुष्टस्यैवैस्तुस्त्वा साध्वसाधुशब्दव्युत्पादनं कर्त्तव्यमिति स्थितं। ननु किमिदं साधुत्वं। साधयति वो

राम

२१

ज्ञायतीति साधुरिति व्युत्पत्त्या बोधकत्वं तदिति चेन्न। गाव्यादावपि तत्सत्त्वात्। शक्तत्वं तदिति चेन्न। पचतीत्यादौ
विकरणे नामसाधुतापत्तेः। तेषामनर्थकत्वात्। हुपवणू जटू इत्यादीनां साधुतापत्तेश्च। लाक्षणिकेष्वव्याप्तेश्च। ते
षामपि लक्ष्येऽर्थेऽशक्तेः। कविच्छिन्नतायास्तु अन्यास्वादिष्वतिप्रसक्तेः। वृत्तिमत्त्वं तदिति चेन्न। द्योतकेषु निपातेष्वव्या
प्तेः। अपसंदानिका शक्तिरेव द्योतनेति चेन्न। द्योतकजित्वद्योतकत्वयोरविशेषेण विनिगमनाविरहाच्छक्ततापत्तौ
व्यासज्यवृत्तिशक्तौ विश्रान्तेः। ततश्च अट्द्विर्वचनाद्यव्यवस्थापत्तिः। न च जातिविशेष एव साधुतेति वाच्यं कत्वादिना
संकरापत्तेरिति। अत्राहुः। अनपभ्रंशतानादिर्यथाभ्युदययोग्यता। या क्रियाव्यंग्या वा जातिः कापीह साधुते
ति। अस्यार्थः। शक्तिवैकल्यादिप्रयुक्तमन्यपोहावारणमपभ्रंशता। तद्विरहोऽनपभ्रंशता। सैव साधुता। सा चार्थविशे
षांतर्भावेनैव। तथाहि। यमर्थं शक्त्या लक्षणया वा बोधयितुं द्योतयितुं वा यादृक् शब्दो नादिः प्रयुक्तस्तस्मिन्नर्थे दोष

दन्यथात्वं प्राप्तः सोऽसाधुः। अन्यथा तु साधुरिति। येपि गाव्यादिवदेव प्रथमं समुत्पन्नाः संतस्तान्प्रयुंजते तेषामप्य
न्यथोच्चारणमस्त्येव। तत्र च देवप्रयोज्यतास्त्येव। मूलप्रयोक्तुर्भ्रमाद्यन्यतमसत्वात्। यद्वा अनादिता साधुता। अना
दिरिति तु लोके भावप्रख्यानो निर्देशः। आदेरभावो नादिरिति वा। असंदेह इतिवत्तत्पुरुषः। अभ्युदययोग्यता वा साधु
ता। एतत्तत्त्वं च शास्त्रपरिशीलनप्राणिभिर्गम्यो जातिविशेषो वेति। यत्तु जातिसंकर इत्युक्तं। तन्न। गुणगतजातौ तस्या
दोषत्वात्। तथाहि। यस्य देवदत्तादेरनोच्चारणे एव पूर्वं श्रुताः स्तस्य कुआदिव्यवहितस्य उच्चावर्णेषु श्रुतेषु यदनु
त२ मानं जायते। दोच्चानोच्चसाध्यारणे तदनुमापकजात्यंगीकारे सत्येव बाध इति। न तु तत्र व्याप्यनानाजातिसर्वजातस्तु दूष
कतावीजानिरुक्तौ विनिगमकाभावेन भूतत्वमूर्तत्वयोरिव शरीरत्वपृथिवीत्वयोर्द्वयोरपि जातित्वभंगापत्तेश्च। तस्मा
द्वतुर्विधमपि साधुत्वं निर्देष्टव्यं। व्याकरणैकगम्यं वा। एवमसाधुत्वमपि चतुर्धा। अपभ्रष्टता। सादितापर्यवाययोग्य साम २२
स्वीकारे। उच्चावर्णहत्यसाध्यारणातेः प्राग्गृहीतत्वेनानुमितिसामग्रीवैकल्यात्। वस्तुतस्तु उपाधिसंकरवदेव जातिसंकरोपि न

तात्। तदवच्छेदकजातिविशेषो वेति। डित्थादिसंज्ञास्तु यद्यपि पुण्यपापजनकतारूपे साधुत्वासाधुत्वे न स्तस्तथापि अन-
पभ्रंशत्वरूपं साधुत्वमस्त्येव। तदेवानुशासनप्रवृत्तावुपयोगि। अस्येत्यादिसौत्रनिर्देशात्कुत्वं कस्मान्न भवतीत्यादिना
ख्यापितं वेत्याहुः। एवं वानादित्वमभ्युदययोग्यत्वं वा अनपभ्रष्टतामात्रेण न सिध्यति किंतु पौरुषेयसंकेतविरहविशि-
ष्टेनेत्यवधेयं। तदेतदुक्तं। याः स्वेच्छया संज्ञाः क्रियन्ते डित्थादयः। कथं नु तासां साधुत्वं नैव ताः साधवो मताः। अ-
नपभ्रंशरूपत्वान्नाप्यासामपशब्दता। हस्तचेष्टा यथा लोके तथा संकेतिता इमाः। ततश्च नासां प्रयोगेऽभ्युदयः प्रत्यवा-
यो वा भवेत्। लाघवेनार्थबोधार्थं प्रयुज्यन्ते तु केवलमिति। तदयं निर्गलितोऽर्थः। याः स्वेच्छया संज्ञाः क्रियन्त इति
पक्षेऽनिदंप्रथमाः शब्दाः साधवः परिकीर्तिताः। त एव शक्तिवैकल्यप्रमादालसतादिभिः। अन्यथोच्चारिताः पुंभिरपश-
ब्दा इतीरिता इति वा। साध्वसाधुलक्षणे शास्त्रीयमार्गे डित्थादीनां साध्वसाधुबहिर्भावः स्फुट एव। तेषामप्यनादितेति प-

श०कौ०
२३
2-3

सोलवत्तुर्विंध्यापि शाक्तस्य साधुतास्त्येव। उक्तं च। व्यवहाराय नियमः संज्ञायाः संज्ञिनि क्वचित्। नित्य एव तु संबंधो डित्था-
दिषु गवादिवत्॥ वृद्ध्यादीनां च शास्त्रेऽस्मिन् शक्त्यवच्छेदलक्षणः। अकृत्रिमोऽभिसंबंधो विशेषणविशेष्यवदिति। पक्ष-
द्वयेप्यनुशासनविषयता निर्विवादेति। नामकरणे त्वयं विशेषः। कृतं कुर्यान्न तद्धितमित्यादिगृह्यसूत्राविरोधिनामे-
व साधुता। तद्विरोधिनां तु देशभाषानुसारेण क्रियमाणानां कूवीमंवीत्यादि नामधेयानामसाधुतैव। तदेतदल-
क्सूत्रे वार्त्तिकव्याख्यावसरे स्फुटीकरिष्यते॥ इति साधुत्वनिर्वचनं॥ व्युत्पादनं च प्रकृतिप्रत्ययादिकल्पनया उत्स-
र्गापवादरूपलक्षणैरेव। न तु साध्वसाध्वोर्वा अन्यतरस्य वा प्रतिपदपाठेन। शब्दानामानन्त्येन तदसंभवादित्युक्तं। स्या-
देतत्। लक्षणप्रणयनमपि किं जातिपक्षमाश्रित्य उत व्यक्तिपक्षं। आद्ये सकृद्गतौ यद्बाधितं तद्बाधितमेवेति न सिध्ये-
त्। तथा हि। जातौ पदार्थे द्वयोर्विध्योः परस्परपरिहारेण तत्तज्जात्याक्रांतव्यक्तिविशेषे चरितार्थयोः क्वचिदेकत्र प्रसं- राम २३

गेपरस्परप्रतिबंधादप्रतिपत्तिरेवस्यात्। सत्प्रतिपक्षवत्। तथा च वक्ष्यति। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वा
दिति। तत्र च विप्रतिषेधसूत्रं विध्यर्थं। परं तावद्भवतीति। तस्मिंश्च कृते यदि पूर्वस्य निमित्तमस्ति तर्हि भवत्येव तत्।
यथा भिंध्यकीत्यत्र भिनद्धि हि इति स्थिते परत्वाद्धिभावे कृते पुनः प्रसंगविज्ञानादकम्भवति। तदेवं जातिपक्षे पुनः
प्रसंगविज्ञानं यद्यपि सिध्यति तथापि सकृद्गताविति न सिध्यति। तथा च जुहुतात्त्वमित्यत्र जुहुहि इति स्थिते धि
भावं बाधित्वा परत्वात्तातङि कृते स्थानिवद्भावेन स्यादेव धिः। व्यक्तिपक्षे तु सकलव्यक्त्युद्देश्यकस्य शास्त्रस्य व्य
र्पितं तदेव चरितार्थत्वासंभवाद्विकल्पप्रसंगे नियमार्थं सूत्रं। परमेव भवति न तु पूर्वमिति। तथा चैतस्मिन्नवलेन तत्र पू
र्वलक्षणस्य व्यक्तं तस्मात्रविषयकत्वं कल्प्यत इति एतद्व्यक्तिविषयकलक्षणभाव एव पर्यवस्यति। तथा च जु
हुतात्त्वमित्यादेः सिद्धावपि भिंध्यकीत्यादिव्यक्तिपक्षे न सिध्यति। तस्माद्दुष्करमन्यतरपक्षाश्रयणेन लक्षणप्रणय

वादि१,

नमितिचेन्न। सत्यं। अत एव लक्ष्यानुरोधात्पक्षद्वयमप्याश्रीयते। कश्चित्कश्चित्पदार्थ इति। तत्र जातिर्नामयं भावः। जा
तिवाज्जातिर्वाच्या। व्यक्तौ नामानंत्येन तासां वाच्यत्वे गौरवं। वाहदोहाद्यन्वयस्तु लक्षितायां व्यक्ताविति। व्यक्तिवा
दिनस्त्वाकूतः। अनुपपत्तिं विनापि व्यक्तिप्रतीतेरनुभवसिद्धतया व्यक्तिरेव वाच्या। त्वप्रत्ययादिकं विना जातेः प्राधा
न्येनाप्रतीतेश्च। वाहाद्यन्वयोप्येवं सम्यग् नसः। यत्तूक्तं व्यक्तौ नामानंत्यमिति। नैतद्बाधकं। शक्यतावच्छेदिकाया जा
त्व तेरैक्यात्। नन्वेवं जातेरपि वाच्यमायातमिति चेन्न। अकार्यत्वेपि कार्यतावच्छेदकत्ववदशक्यत्वेपि शक्यतावच्छेदकत्व
संभवात्। अत एव लक्ष्यतावच्छेदके लक्षणा नेति नैयायिकाभ्युपगमः। तस्माज्जातिरूपलक्षणं व्यक्तिमात्रं तु वाच्य
मिति। यत्तु सरूपसूत्रे भाष्ये वक्ष्यते न ह्याकृतिपदार्थकस्य द्रव्यं न पदार्थ इत्यादि तत्तु जातिव्यक्त्योरन्यतरेण विशिष्ट राम
स्यापरस्य वाच्यतेत्येवंरूपं मतान्तरं। तथा वाकृत्यधिकरणे भट्टैरुक्तं। नियोगेन विकल्पेन द्वे वा सह समुच्चिते। सर्वं २४

याः समुदायो वा विशिष्टा वैकयेतरेति। तत्र जातिरेव व्यक्तिरेव वा वाच्येति इह त्वं मतद्वयं न्नियोगेनैतस्मिन्नेनोपनिबद्धं।
चतुर्थचरणे नतु सरूपसूत्रोक्तमतद्वयमुपनिबद्धमिति विवेकः। यद्यपि जातिव्यक्तिपक्षयोरन्यतरस्य न्यायेन बा-
ध्यः श्चावश्यकस्तथापीह शास्त्रे संज्ञापरिभाषादिवल्लक्ष्यसिद्ध्युपायतयाऽभयाश्रयणे किमपि बाधकं नास्तीत्य-
वधेयं॥ वस्तुतस्तु भट्टोक्तोक्तपक्षीमध्ये। विकल्पेनेति तृतीयः पक्षोऽत्र प्रक्रियादशायां स्थितः। विकल्पस्य लक्ष्या-
नुरोधाद्व्यवस्थितो नत्वैच्छिकः। स्यान्यदेतत्। समुच्चयपक्षं चतुर्थमाश्रित्यापि क्वचित्कस्यचिद्विवक्षाऽपरस्य
त्वविवक्षेति गृहीत्वा प्रक्रियानिर्वाहः सुकर इति दिक्। यदि हि व्यक्तिरेवेत्येतस्माद्वैत्रिकमभिमतं स्यात्तर्हि जात्या-
ख्यायामिति सूत्रं नारभेत। यदि च जातिरेवेति तर्हि सरूपसूत्रं नारभेतेति भाष्यं। ननु यस्मिन्वचने एक एवात्र लक्ष-
णत्रापि लक्षणया जातिपरत्वे द्वह्-सामान्याः संतीति प्रयोगं साधयितुं जात्याख्यायामिति सूत्रमस्तु। तथा जातिपक्षेऽपि

नानार्थानुरोधात्सरूपसूत्रमस्तु। वक्ष्यति हि वार्त्तिककृत्। व्यर्थेषु च मुक्तसंशयमिति। सत्यं। लक्ष्यानुरोध एव
पक्षद्वयाश्रयेण रूपं। अत एवोदाहृतसूत्रयोर्भाष्यकृता प्रत्याख्यानस्य मानत्वेप्यदोषः॥ इदानीं वार्त्तिककारः शा
स्त्रस्य नियमविधिरूपतया सार्थक्यमाह॥ सिद्धे शब्दार्थसंबंधे लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनि
यमो यथा लौकिकवैदिकेषु॥ लोकादेव हि प्रथमव्युत्पत्तिः। अव्युत्पन्नं प्रति व्याकरणादीनामप्रवृत्तेः। अर्थव
द्धातुरित्यादिर्हि व्याकरणं शक्तिग्रहोपजीवकं। तथा च समर्थसूत्रेपि वार्त्तिकं। अर्थानादेशनादिति। अनेकम
न्यपदार्थे इत्यादिकं हि लोकसिद्धमर्थमनूद्य साधुत्वान्वाख्यानपरं। ततश्च लोकादेव शब्दे अर्थे तयोः संबं
धे च सिद्धे अर्थबोधनाय शब्दप्रयोगेपि प्रसक्ते गवादय एव प्रयोक्तव्या न तु गाव्यादय इति नियमार्थं शास्त्रं।
नियमफलं तु धर्मः। तत्र स्मार्त्तो दृष्टांतः। प्राङ्मुखोन्नानि भुंजीतेत्यादिर्लौकिकशब्देनोक्तः। व्रीहीनवहंतीत्यादि

श्चवैदिकशब्दे नोक्तः। धर्मनियम इति षष्ठीतत्पुरुषः। अश्वघासादिवत्। न तु चतुर्थीतत्पुरुषः प्रकृतिविकृति-
भावविरहात्। ननु यद्यप्रयुक्तानामिदमन्वाख्यानं तर्हि किमर्थमप्रयुक्ता अपि ऊषतेरचक्रपेचेत्यादयोऽप्युक्ताः प्र-
त इति चेन्न। आर्षज्ञानं विना अप्रयुक्तता यादुरवधारणत्वात्। महान् हि प्रयोगविषयः॥ तथा च भाष्यं॥ सप्तद्वीपा
वसुमती त्रयो लोकाश्चत्वारो वेदाः सांगाः सरहस्या बहुधा भिन्नाः एकशतमध्वर्युशाखाः सहस्रवर्त्मा सामवेदः
एकविंशतिधा बाह्वृच्यं। नवधाथर्वणो वेदः। वाकोवाक्यमितिहासः पुराणं वैद्यकमित्येतावान्प्रयोगस्य विषय इति।
बह्वृचा नामाम्नायो बाह्वृच्यं। छंदोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्य इति ञ्य प्रत्ययः। चरणाद्धर्माम्नाययोरित्युक्त-
त्वादाम्नाये। अथर्वणा प्रोक्तो वेदोऽथर्वा। उपचारात्प्रयोग इत्येके। वसंतादिषु अथर्वन्। आथर्वणा इत्युभयोः पा-
ठसामर्थ्यात्प्रोक्तप्रत्ययस्य वैकल्पिको लुगिति तु तत्त्वं। अत एव भाष्ये वक्ष्यते। तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लु-

प्र०कौ०
२५
२६

ग्वत्कव्यः। वसिष्ठोनुवाकः ततो वत्कव्यमथर्वणेवेति। तमधीते आथर्वणिकः। वसंतादिभ्यष्ठक्। दंडिनायनादिसू
त्रे निपातनादिलोपाभावः। आथर्वणिकस्याम्नायः आथर्वणः। आथर्वणिकस्येकलोपश्चेति आथर्वणिका
दण्। तत्सन्नियोगेनेकलोपश्च। प्रकृतमनुसरामः। एतावंतं प्रयोगविषयं पर्यालोचयितुमशक्तैरस्मदादिभि
र्लक्षणानुगतानां प्रयोगोस्तीत्यनुमेयं। अस्ति च त्वयोदाहृतानामपि वेदे प्रयोगः। सप्तास्येरेवतीरेवदूष। यन्मे
नरः श्रुत्यं ब्रह्म चक्र। यत्रा नश्चक्रा जरसं तनूनामिति। ननु यदि लक्षणेनानादिता सिद्धिस्तर्हि ऊवं त्वादीनाम
पि स्यादिति चेन्न। न हि व्यचिरंति परः प्रयुज्यत इत्यभियुक्तानामविगीतव्यवहारेण सामान्यशास्त्रस्य संकोचा
त्। अभ्युपगतो हि विशेषविषयिण्यापत्तितस्य कर्मनिषेधिकारस्मृत्या अग्निहोत्रादिश्रुतीनां संकोचः। विशेषविष
येण शिष्टाचारेण सामान्यस्मृतेः संकोचस्स्यात्। तदुक्तं। आनर्थक्यप्रतिहतानां विपरीतं बलाबलमिति। यत्र तु अ

राम
२५

प्रयोगः संदिग्धः। आप्तस्यानुगमस्य तत्र निश्चयस्येह मनुमानं तदुक्तं। यथा लक्षणे मप्रयुक्ते इति। अप्रयुक्ते अनिश्चितप्र
योगे इत्यर्थः। निश्चिताप्रयोगे तु लक्षणं न प्रवर्त्तत एवेति निष्कर्षः। न चैवं ब्राह्मणे ब्रवणादिति कल्पसूत्रप्रयोगस्व
पेणापि विशेष विषयकावारणे श्रुवो वचिरित्यादीनां संकोचापत्तिः। त्रिशंकोर्यथा यज्ञेनापि स्मृतिसंकोचा
पत्तेस्तुल्यत्वात्। तत्र धर्मबुद्ध्यानुष्ठानं नास्तीति चेत्। इहापि साधुत्वबुद्ध्या प्रयोगो नास्तीति तुल्यो। यर्वाणस्तर्वाण इ
तिवदभियुक्तानामपि असाधुप्रयोगस्य कतोर्बहिरूपपत्तेश्च। अत एवेतिहासपुराणादिष्वपशब्दा अपि संतीति ह
रदत्तः। नदी संज्ञासूत्रे भाष्येपि ष्टेस्येमेतत्। के चित्तु आर्षग्रंथेष्वपि छंदसि विहितस्य व्यत्ययस्य प्रवृत्त्या साधुतां सम
र्थयंते। न च गौणमुख्यन्यायो हि स्वरितत्वप्रतिज्ञास्थले न प्रवर्त्तत इत्यर्थः। उपपादयिष्यते चेदं। अत एवार्षत्वात्सा
धुतेति तत्र तत्रोद्घोषः संगच्छत इति दिक्॥ यद्यपि अप्राप्तांशपरिपूरणफलको नियमविधिः। इतरव्यावृत्तिफलक

न्यायेन मुख्ये छंदस्येव तत्प्रवृत्तिः। स्वरितत्वप्रतिज्ञया तद्बाधात्। वक्ष्यति हि स्वरितेनाधिकार इति सूत्रे। विशे
षायाधिकं कार्यमिति। गौणमुख्य

स्तु नित्यप्राप्तविषयकः परिसंख्याविधिरिति पूर्वोत्तरमीमांसयोर्व्यवहारस्तथापीह श्लोके परिसंख्यापि नि
यमशब्देन व्यवह्रियते। तेन पंच पंचनखा भक्ष्या इत्यस्य नियमोदाहरणतयाउपन्यासो न विरुद्धः। न वा सो मीमां
सकरीत्यापि नियमो भवत्विति वाच्यं। पंचातिरिक्तभक्षणे प्रायश्चित्तविधेरसंगतत्वापत्तेः। पंचानामभक्षणे
प्रायश्चित्तापत्तौ गृहेपि निवसन्विप्रो मुनिर्मांसविवर्जनादित्यादिस्मृतिव्याकोपाच्च। अत एव त्रिदोषापि परिसंख्यै
वतत्राश्रितेतिदिक्। अथेदमवधेयं। नियमातिक्रमे कृतेऽपूर्वपरं न भवति। दृष्टस्त्वर्थविबोधो भवत्येव। अवहनना
तिक्रमेपि वैतुष्यवत्। दिगंतराभिमुखभोजने तृप्तिवच्च। न वापभ्रंशानां वाचकतया कथमर्थावबोधकतेति वा
च्यं। भ्रांतिप्रमवतां बाधकाभावात्। विशेषदर्शिनस्तु द्विविधाः। तत्तद्वाचकसंस्कृतविशेषज्ञानवंतस्तद्विकलाश्च।
तत्राद्यानां साधुस्मरणद्वारार्थबोधः। द्वितीयानां तु बोध्यार्थसंबद्धार्थांतरवाचकस्य स्मृतौ सत्यां ततो लक्ष

णया बोधः सर्वनामस्मृतेर्वा। तदर्थज्ञापकत्वेन रूपेण साधुस्मृतेर्वा। अर्थाध्याहारपक्षाश्रयणे द्वितीयथाय
थंबोध्यं। अपरे त्वाहुः। अपभ्रंशा अपि वाचका एव। तथा हि। अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरेच्छा शक्ति
रिति मते भगवदिच्छायाः सन्मात्रविषयकत्वादपभ्रंशेस्तु बोधजननस्य शक्तित्वमदशायां तेनाप्यभ्युपगमा
दुर्वारा शक्तिः। पदार्थान्तरं तदिति मतेपि कल्प्यं साध्वसाध्वोस्तुल्यमेव। असाधुस्मारणद्वारा साधुर्बोधक इ
ति वैपरीत्यस्यापत्तेश्च। स्वीकृतं हि परेणेति बादिस्मारितानां जादीनाम साधूनामपि बोधकत्वं। ननु साधूनाम
न्यत्वात्तत्रैव गोत्ववाच्छक्तिः कल्प्यत इति चेत्। न वयमपूर्वं किंचित्कल्पयामः। किं तु यथा घटजननसामर्थ्यमेव दं
डादेः शक्तिः तथा घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिः सा च कारणत्वापरपर्याया शक्तिरस्माद्बोधं
वदता त्वयाप्यभ्युपेतैव। शक्तिग्रहस्य असत्त्वं परं तज्ज्यतां विषयाबाधादिति ब्रूमः। नन्वेवं गौणमुख्यविभागोच्छेदः।

सर्वे सर्वस्य वाचका इति पर्यवसानादिति चेत्। तत्पक्षेऽपीश्वरेच्छाया गौणतांवति प्रसंगस्य तुल्यत्वात्। सुहृ
ज्ञ्वेन पष्ठामीति चेत्। प्रचुरतरप्रयोगतद्विरहाभ्यां गौणमुख्यविभाग इति गृहाण। ननु जनकत्वेनागृहीता
दपि तर्हि कारणत्वकार्योदयः स्यादेवेति चेत्। पदार्थस्मृतिः घटाघटेवाक्यार्थबोधो वा। नाद्यः। संबंधग्रहं विनात
द्योगात्। नान्त्यः। द्वाराभावात्। पदार्थस्मरणं हि द्वारं। एवं च महदेव लाघवं साधुस्मारणकल्पनाङ्गे शक्त्वन भ
वतीति। साधुत्वं तु जातिविशेषात्मकमित्युक्तमेव। समानायामर्थावगतौ शब्दैश्चापशब्दैश्चेति भाष्यमप्येतत्प
क्षपक्षपातीति दिक्। ॥ अपशब्दानां वाचकत्वावाचकत्वविचारः॥ प्रयोगशब्दमुपाददानो वार्त्तिककारः प्रयोगा
द्धर्मो न तु ज्ञानमात्रादिति सूचयति। युक्तं चैतत्। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्त इत्यत्र ज्ञानप्रयोगयोरुपादान
स्याविशेषेऽपि प्रतिपदाधिकरणन्यायेन यदेकस्मादपूर्वं तदेतरस्मादपीति प्रयोगात्फलं ज्ञानं तु तदंगमित्यभ्युप

गमात्। प्रयोगस्य फलं प्रति संनिहितत्वाच्च। ज्ञानस्य तु व्यवहितत्वात्। ज्ञानस्य प्रयोगांगतायां दृष्टार्थतालाभाच्च।
उक्तं च भट्टैः। सर्वत्रैव हि विज्ञानं संस्कारत्वेन गम्यते। परांगं चात्मविज्ञानादन्यत्रेत्यवधार्यतामिति। अत एव तरति
ब्रह्महत्यां यो ऽश्वमेधेन यजते य उ चैनमेवं वेदेत्यादिष्वपि ज्ञानपूर्वकानुष्ठानात्फलमित्येव सिद्धांतः। तदुक्तं वार्त्तिककृ
ता। तत्तुल्यं वेदशब्देनेति। वेदः शब्दो विज्ञायको ऽयं यस्यार्थस्याश्वमेधादेस्तेनेदं तुल्यमित्यर्थः। तेन वैदिकशब्दानामपि
पक्षको ऽपि प्रविष्टतया दृष्टांतासंगतिरिति नाशंकनीयं। ते ऽसुरा इति पूर्वोदाहृतश्रुतिरपि अपशब्दप्रयोगात्प्रत्यवायं
बोधयंती साधुप्रयोगाद्धर्मं गमयति। वाजसनेयिनां ब्राह्मणे तस्मादेषा व्याकृता वागुद्यत इति श्रुतिरप्येवं। भाष्ये तु अ
भ्युपेत्यवादेन साधुज्ञानात्फलमित्ययमपि पक्षः समर्थितः। न चैवं अपशब्दज्ञानादधर्मो ऽपि स्यादिति वाच्यं। यावद्वच
नं वाचनिकमित्यभ्युपगमात्। न म्लेच्छितवा इत्यादिना असाधुप्रयोगस्यैव निषेधाच्च। न च व्याकरणाध्ययने प्रवृत्त

स्यपरिनिष्ठितपदत्वादिबोधार्थं तु पदषष्ठ्भतीनां प्रयोगोऽप्यावश्यक एवेति वाच्यं। तदा यत्नानमात्रेण निर्वाहा
त्। अत एव। लौकिकं प्रक्रियावाक्यमप्यहमात्रस्य गोवर इति नित्यसमासेष्व स्वपदविग्रहाभ्युपगमः। अथ व्युत्पा
दनार्थं तत्प्रयोग आवश्यक इत्याग्रहस्तथापि न क्षतिः। अनपभ्रष्टत्वेन तेषां प्रत्यवायाजनकत्वात्। न ह्येते शाक्ति
वैकल्यादिप्रयुक्ताः येन गाव्यादिसाम्यं भजेरन्। अपभ्रंशादित्वात् साधुतेत्याग्रहस्तथापि न क्षतिः। शब्दस्वरूपप
रत्वात्। अनुकरणानां सर्वत्र साधुताभ्युपगमात्। न हि हेऽलयो हेऽलय इति श्रुतिपाठोऽपि प्रत्यवायजनकः। शब्दस्व
रूपमात्रपरा एते भिन्ना एव साधवश्चेति तु तुल्यं। अत एव स्वाहेन्द्रशत्रुर्वर्द्धस्वेति श्रुतावप्युदात्तस्य पाठेऽपि तत्प्र
त्याय्यस्यार्थपरस्य हि तस्याम्नानादमन्त्रतया जपादिपर्युदासेन मन्त्रे विध्यायमानाद् एकश्रुतिर्न प्रसक्तेति प्रा
गुक्तं। अत एव साधुत्वासाधुत्वयोरेकस्मिन् सद्भावोऽभावश्चेति विरुद्धस्य दुरुपपादतया अर्थभेदाच्छब्दभेद इति

दर्शनं प्रवृत्तं । न च प्रकृतिवदनुकरणमित्यतिदेशेऽपशब्दानुकरणस्यासाधुत्वाशंका । असाधूनां शास्त्रीय
प्रकृतित्वाभावात् । असाधुत्वस्य शास्त्रीयकार्यत्वाभावाच्च । न ह्यशास्त्रीयमप्यतिदिश्यत इति सत्यकृत्सूत्रे भाष्ये
स्फुटमेतत् । उपवष्प्रभृति प्रयोगादपशब्दज्ञानाद्धि प्रत्यवायो नास्तीति प्रागुक्तरीत्या स्थितेऽपि अभ्युपेत्यापि प्रत्य
वायं भाष्ये कूपखानकन्याय उदाहृतः । तथाहि कूपं खनन् यद्यपि कर्दमेन लिप्यत एव तथापि ततो निःसृतेन जलेन तं
मलं दूरीकरोति । फलांतरं च लभते तथेहापि परिनिष्ठितरूपज्ञानात्पूर्वोत्पन्नप्रत्यवायनिरासं फलांतरं च लभत इति
सोऽयं कूपखानकन्यायः । कूपं खनतीति विग्रहे कर्मण्यणि प्राप्ते वासरूपन्यायेन ण्वुल् । नित्यसमासत्वाभावात्कू
पस्य खानक इति स्वपदविग्रहः । न च ण्विण्विनिषु नासरूपेण ण्वुलो बाधः स्यादिति वाच्यं । इह खननकर्तृत्वमात्र
स्य विवक्षया ण्विण्विनित्वस्याविवक्षितत्वात् । तस्मात् सर्वथापि गाव्यादि प्रयोगे प्रत्यवाय इति स्थितं । तत्रेदं भाष्ये सिद्धं

श्रं० को०

३०

30

तितं याज्ञे कर्मण्येवायं। न म्लेच्छितवा इत्यस्य क्रतुप्रकरणे पाठात्। क्रतुप्रयोगाद्बहिस्तु अपशब्दं प्रयुञ्जानो न दुष्यति।
एवं हि श्रूयते। यर्वाणस्तर्वाणो नाम ऋषयो बभूवुः प्रत्यक्षधर्माणः परापरज्ञा इत्यादि। प्रत्यक्षधर्माणो योगजधर्मबले
न साक्षात्कृतधर्माः। अयं श्रुतेराशयः। योगिनस्ते विदन्त्यतिशयाद् लौकिके यद्वर्थे ग्राह्यविरहेण यथा तथास्मा
कं भवत्विति विवक्षवो यद्वा नस्तद्वा न इति वक्तव्ये यर्वाणस्तर्वाण इत्यूचुः। याज्ञे कर्मणि पुनः साधूनेव प्रयुक्तवन्तः। ते न य
र्वाणस्तर्वाण इत्येवंरूपामेव संज्ञां पुनर्योजेयिरे इति। भर्तृहर्याकूतः। सत्युपायमात्रे समक्षादिः पुरुषार्थमपेक्षितः। प्रतिषे
धः क्रतोरङ्गमिष्टः प्रकरणपाठादिति। अपरत्वाकूतः। क्रतोर्बहिः प्रयोगेऽपि पुरुषः प्रत्यवैतीति। तेषामयमाशयः। ना
नृतं वदेदित्यनारभ्याधीतः। पुरुषार्थो विनिषेधस्तावदस्तीति निर्विवादः। तत्र निषेध्यमनृतं द्विधा। शास्त्रानृतमर्था
नृतं चेति। शास्त्रस्यार्थस्य वा विपरीतप्रतिपत्तिहेतुभूतमुच्चारणमनृतवदनं। एवं च यथाऽर्थानृतं वदतः प्रत्यवा

राम

३०

यस्तथाशब्दान्तमपीतितुल्यं। क्रतुमध्येषु न रपभाजत्वे पुरुषोपि प्रत्यवेति क्रतुरपि विशुद्ध इति वचनद्वयबला
त्सिध्यतीति दिक्। यथा च प्रयोगे साधूनां नियमस्तथा साधुत्वज्ञानेपि व्याकरणस्य नियम एवेत्यवधेयं। व्याकृतावा
गुपत इति प्रागुक्तश्रुतेः। व्याकृता व्याकरणे संस्कृतेति हितदर्पणः। व्याकरणशब्दश्च योगरूढ्या लक्ष्यलक्षणसमुदायपरः
सूत्रमात्रपरो वेति पक्षद्वयमपि भाष्ये स्थितं। तत्राद्यपक्षे सूत्रमात्रमध्यायाने वैयाकरणशब्दप्रयोगो भाक्तः। समुदायवा
चका हि शब्दाः क्वचिदवयवेपि प्रयुज्यंते। यथा पूर्वे पंचाला उत्तरे पंचाला इति। द्वितीयपक्षे तु व्याकरणस्य सूत्रमिति प्र
योगो राहोः शिर इतिवन्नेयः। अथवा व्याख्या एकदेशः सूत्रमित्यवयवावयविभावेन षष्ठीति वास्तु। अस्य च नस्यायं वक्ष्यत्वा
दिवत्। न चैवमपि सूत्रमात्राध्ययनाच्छब्दाप्रतिपत्तेर्नियमानुपपत्तिः। पदच्छेदविग्रहयोजनादिभिः सूत्रार्थस्यैवाभिव्यंजनात्। अत
एव सुसूत्रमुच्यमानमप्युपेक्ष्यते। यत्रैव तु सूत्रस्य तात्पर्यं लेशोप्यस्ति तत्तदेव गृह्यते। तदुक्तं। सूत्रेष्वेव हि तत्सर्वं यद्वृत्तौ

शं०कौ०
३१
31

यच्च वार्त्तिकमिति। अत एव च वृद्ध्यूलम्ग्रहणादिकं सार्थकमिति दिक्। नन्वेवं किं वर्णोपदेशेन। न हि तद्वर्जनेन कस्य चिच्छब्द
स्य साधुत्वमवगम्यते। न च कलाध्मातादिदोषरहितवर्णस्वरूपप्रतिपत्तिरेव तत्फलमिति वाच्यं। लोकत एव वा विप्लुत
वर्णप्रतीतेरवश्यवाच्यत्वात्। अन्यथा प्लुतादिपाठस्यापीह कर्त्तव्यतापत्तेः। तदुक्तं। इष्टं नु अर्थस्येदुदात्तानुदात्तस्वरि
तानुनासिकदीर्घप्लुतानामप्युपदेश इति। एकश्रुत्यास्तत्र पाठादुदात्तादिस्वरत्रयस्यापि कर्त्तव्यः पाठ इत्युक्तं। त्रैस्व
र्येण पाठे हि अन्यतमस्य त्र्यग्रहणादेव सिद्धौ द्वयोरेव कर्त्तव्यतां ब्रूयात्। अत एव च लोके त्रैस्वर्यमेकश्रुत्या सह
विकल्प्यत इति ज्ञाप्यते। एतच्च विभाषा छन्दसीत्यत्र स्फुटीकरिष्यामः। ननु निर्देशस्य जातिपरत्वात्प्लुतादिसंग्रहः
सेत्स्यतीति चेन्न। असंवृतकलप्रभृतीनामपि संग्रहापत्तेः। तदुक्तं। आकृत्युपदेशात्सिद्धमिति चेत्संवृतादीनां प्रतिषेध्य
इति। तत्र ह्रस्वस्य अवर्णस्य संवृतत्वगुणकत्वेपि तदितरेषामष्टानां संवृतत्वं दोषः। आदिशब्दात्कलः। स च स्वो वित ३१

राम
३१

स्थाने न भवतः। तथा २॥ सम्भूयिष्ठतया ह्रस्वोऽपि दीर्घवल्लक्ष्यमाणो भाति। एवं दीर्घोऽपि ह्रस्ववत्कालसंकोचेनोच्यमा
नोऽनर्थकः। एवं करणादिभ्रंशादपि बहवो दोषाः शिक्षाप्रातिशाख्यादिषु प्रसिद्धाः। तत्र द्वेष विशिष्टानामपि ऋऌवा
दिजात्याक्रान्तत्वाज्जातिपरनिर्देशपक्षे तेषामतिव्याप्तिरिति स्थितं। नव गर्गादिविदादिपाठस्य तन्त्रेणोभयार्थतया
वर्णशुद्धिलाभः। अपठितेषु प्रातिपदिकेषु तथाप्यगतेः। स्यादेतत्। सर्वाऌन्यन्तयोर्हलन्त्यमन्त्यस्य शास्त्रान्तेषु द्वाःप य
ठिष्यन्ते। ऌऌदितिवत्। नवैवर्गो द्वौ। तद्धलेन सर्वेषामनुबन्धानां प्रत्याख्यानात् द्विसंज्ञाजोपयोरपि त्यागात्। तथा
हि। धीरूख्यातोऽऌकारं परित्यक्ष्यामः। ईकारं वकलं पठिष्यामः। ऌदित आत्मनेपदद्विस्यस्य स्थाने कजादात्मनेपदमि
ति पठिष्यामः। कलस्य प्रक्रियादशायामेव। यथा ऌकारः। प्रयोगे लघुशुद्ध एव। प्रत्यापत्तेः शास्त्रान्ते करणमपि शास्त्री
य सकलकार्यप्रत्यासिद्धतालाभाय। एवं च प्रक्रियायां दोषस्य कलादेशाश्रयणेऽपि परिनिष्ठिते रूपेण कश्चिद्दोषः।

यथा यथान्यासपक्षेपि ऽकारस्य विवृतताप्रक्रियामात्रविषया न तु प्रयोगसमवायिनी तद्वदिहपक्षेक
णादयोपीति न कश्चिद्विशेषः। धर्मिकल्पनातः इति न्यायश्चेह बोध्यः। ङकारादयो हि धर्मिण एव तत्त्वया पा
ठ्याः। मयात्तु उभयपठनीयस्य ईकारस्य कजत्वमात्रं कल्प्यमिति। नन्वस्मिन्पक्षे स्वरितञ्जित इत्यत्र कथं का
र्यमिति चेत् तदाख्यातात्कर्त्रभिप्राय इति। एवं आप्यं तौट कितां वित्यत्र आप्यं तौ कल्प्यतां नाविति। इड्भागमास्त्वनि
रनुबन्धाः कजोः पाठ्याः। आनुगादयोऽख्याताः। डुकृञ् इत्यस्य स्थाने कृञ् इति द्विशेषं पाठ्यं। आदिरित्येनेत्यत्रा
पि आदिकजौ सहेत्युक्ता अइ इत्यादिकाः संज्ञाः करिष्यन्ते। कजेनेति तृतीयानिर्देशे सति तु अप्राप्यान्याषि
ष्टं तइवचरसवर्णस्य संज्ञा न स्यात्। दृज्ञोपइत्यादौ अए इत्यपनीय अउ इति करिष्यते। स्वरसंधिस्त्वसंदे
हयन करिष्यते। तस्मात्सर्वमनुबन्धकार्यादिकं कजादिभिरेव सिध्यतीति चेत्। सत्यं सिध्यत्येवं। अपाणिनीयं

तु भवति। इति चेत्। अत्रोच्यते। इष्टसिद्ध्यर्थो वर्णोपदेशः। एवं वा कृत्सूपदेशादेव उदात्तादिसिद्धिं मंजीकृत्य क
लादिष्वति प्रसंग इत्थं परिहार्यः। आगमाश्च विकाराश्च प्रत्ययाः सह धातुभिः। उच्चार्यन्ते ततस्तेषु नेमे प्राप्ताः क
लादय इति। यत्तु अग्रहणेषु प्रातिपदिकेषु प्राप्तास्त्वेवेति। तन्न। त्वयापि प्रतिपदपाठस्यावश्याश्रयणीयत्वा
त्। अन्यथा शशइत्यत्र षषइत्यपि स्यात्। मंचके मंउक इति। पलाशे पलाष इति। तस्मादेतस्य स्ववर्णानुपूर्वी
निर्णयाय यदि प्रतिपदपाठस्तर्हि कलादिनिवृत्तिरपि तत एवास्तु। उणादिसूत्रात्स्वोदयादिसूत्राद्वा साधु
त्वाभ्यनुज्ञानं विशेषावधारणं तु निघण्ट्वादिनेति चेत् कलादिनिवृत्तिरपि शिक्षादिग्रन्थेनास्तु। सत्यं। अनुषंजि
का कलादिनिवृत्तिः। वर्णोपदेशस्य मुख्यं फलं तु प्रत्याहारनिष्पत्तिः। प्रत्याहारशब्दस्तु अणादिसंज्ञापरः
प्रत्याह्रियन्ते वर्णा एष्विति व्युत्पत्तेः। न च ग्रहणकशास्त्रेणानिष्पादितास्तु अकारादिसंज्ञा स्वतिप्रसक्तिः। योग

रूपमभ्युपगमात्। तस्मादादिरंत्येनेत्येतत्सूत्रे सिद्धाः संज्ञाः प्रत्याहारशब्दवाच्यास्तासामिष्टत्वयेववर्णे
पदे शब्द इति स्थितं॥ ॥इति श्रीशब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे प्रथममाह्निकं॥ ॥अइउ
ण्। संज्ञा सूत्रमिदं। आदिरंत्येन सहेतेत्यनेन सहैकवाक्यत्वात्। अइउणित्येषामादिरकारः अंत्येन णका
रादिना सहितः सन् आद्यंताभ्यामाक्षिप्तानां मध्यगानां स्वस्य च संज्ञेति हि वाक्यार्थः। अत्र अकारादीनां स्वरू
पेण अनुकार्येण वा सतोप्यर्थवत्वस्याविवक्षितत्वात्प्रातिपदिकत्वं नेति न विभक्त्यय माहेत्यादाविव विभक्ते
रनुत्पत्तिः। सुपां सुलुगिति लुग्वा। छंदोवत्सूत्राणीति भाष्यकारेष्ट्या छंदोजेष्वु व्याकरणसूत्रेष्वपि छंदस
कार्यातिदेशात्। एतस्याप्याख्या विति सूत्रे छंदः प्रदेशेषु गौणमुख्यन्यायो न प्रवर्तत इति वक्ष्यमाणत्वाच्चा
देतत्। स्वरसंधिर्नेह भाष्ये। तत्र अइउण्सूत्र विभक्तेः रुत्वयत्वलोपेषु यच्च हेत्यादाविव लोपस्य सिद्धासंज्ञिने

तिसमाख्यानेपि इकारस्य इको सवर्णे इति अकारस्य अस्यक इति प्रकृतिभावसंभवेपि एदैतोरयायावु
वीसे। यत्तु वर्णोपदेशकाले ऽजादिसंज्ञा नाम निष्पादसंधिर्नेति। तच्चिन्त्यं। वर्णोपदेशे इसंज्ञायां ऽसंभूप्र
त्याहारेव निष्पन्ने प्रवर्तमानानां यण्णादीनां सुप्युपास्य इत्यादेतट स्य इवज्देश्यता वञ्जेइक रूपाकोतेव
दा र्णोपदेशोपि प्रवृत्तेरावश्यकत्वात्। अन्यथा तु प्यास्य प्रयत्नमित्यादौ सवर्णदीर्घो न स्यात्। तथा ऽर्थवस
त्रांतर्गतानां प्रातिपदिकत्वं। प्रत्ययः परश्चेत्यादौ सुप्रत्ययो। ह्यप्प्रातिपदिकाद्येकयोर्द्विवचनैकवचने बहु
षु बहुवचनमित्यादौ तत्तद्विभक्तिः। ससजुषोरुरित्यत्र रुः। खरवसानयोरिति सूत्रे विसर्गश्च न स्यादिति सर्वो
पप्लवः स्यात्। स्वाध्यायो ध्येतव्य इत्यस्य नेह नाने त्यादिश्रुतेश्च स्वस्मिन्नपि यथा प्रवृत्तिस्तथा दाक्षादीनामपी
ति वेत्तु त्वं यण्णादावपि। नन्वेवं ग्रहणकशास्त्रमपि ऽप्रणो प्रगृह्यस्येत्यादौ नरस्तु इव स्वस्मिन्नपि प्रवर्त्तेता तत

सि०कौ० ३५ 35

स्वदीर्घग्रहणमनणत्वेन सवर्णग्राहकत्वं नास्तीति सिद्धान्तोपि भज्येतेति चेन्न। वैषम्यात्। पदार्थसंसर्गो हि वाक्या-
र्थः। तद्बोधश्च पदार्थबोधोत्तरभावी तथाच अणुदित्सूत्रेण ये उपस्थिताः तेषां सवर्णग्राहकत्वं सूत्रार्थः। अणुदि-
त्सूत्रे अणित्यनेनेति सूत्रेण अक्षरसमाम्नायपठितेषु संकेतितः ते तानेवाणोपस्थापयति। तथाच अष्टादशाना-
मपि ऋकारः संज्ञेति पर्यवसन्ने सूत्रान्तरेष्वस्य शावित्यादिषु ऋकारेणाष्टादशानामुपस्थापकत्वमुचितं न तथाग्र-
हणसूत्रेपि। एतद्वाक्यार्थबोधात्प्रागष्टादशस्वग्रहात् तत्प्राप्तिकत्वात्। नहि क्षिविकङ्किदित्यादावादेवाणुपस्था-
पकोपि वृद्धिशब्दो वृद्धिरादैजिति संज्ञासूत्रेणानुपस्थापयति। उणित्यादौ स्वरसंधिः प्राप्नोत्येवेति चेत्। सत्यं।
संहिताविरहान्न यणादयः। अनित्या हि वाक्ये संहिता। उक्तं च। संहितैकपदे नित्या नित्या धातूपसर्गयोः। नित्या स-
मासे वाक्ये तु सा विवक्षामपेक्षत इति। समासस्य च पर्युदासग्रहणं गोबलीवर्दन्यायेन। एकपद इत्यनेनैव तत्संग्रहसि राम ३५

किंतु स्वरूपमेव। एतत्सूत्रे च सामानाधिकरण्यादृष्टेश्चांवृद्धिशब्दवाच्यत्वावधारणे सूत्रां-
तरेषु संज्ञिनामुपस्थितिर्निर्बाधेति दिक्। ओं नमः

द्धः। इत्यन्वर्थसंज्ञापरिभाषा एकदेशानुमतिद्वारा संहिताधिकारेणैव ज्ञापिता। असंहितायां यणादिनिवृ
त्त्यर्थो हि संहिताधिकारः। अत एव। हे रोहिणि त्वमसि शीलवतीषु धन्या एनं निवारय पतिं सखि दुर्विनीतं।
जालांतरेण मम वासगृहं प्रविष्टः श्रोणीतटं स्पृशति किं कुलधर्म एष इत्यत्र धन्या एनमित्यस्य नासाधुता।
अत एवालंकारिकैश्च्युतसंस्कृतित्वापेक्षया पृथगेव विसंधिता नाम दोषांतरं गणितं। तद्वेहास्नीत्यन्यदेत
त्। नन्वेवमप्यसंहितायां कालव्यवायादेव यणादेरप्राप्तौ किं संहिताधिकारेणेति चेन्न। संहिताधिकारबहिर्भूता
नां कालव्यवायेपि प्रवृत्तिं ज्ञापयितुं तदारंभात्। तेन अग्नाविष्णू इत्यग्नाविष्णू इत्यादाववग्रहेप्यानङादयः। अ
ग्निमीळे इत्यत्र पदविभागेपि निघातः। तेनो रासंतामित्यादौ नसादयश्च सिध्यन्ति। नन्वेवं पुरः हितमित्यवग्रहे हि
तस्य स्वरितत्वं बहुव्रीहेः पठ्यमानमसंगतं स्यात्। तयोर्द्वा ब्रवीति संहिताधिकारश्चा प्रागस्य समाप्तेरिति सिद्धान्ता
या

त्। स्वरितविधेश्च तदंतस्तत्वात्। अत एव तैत्तिरीयाः अवग्रहे हित अनुदात्तं पठंति। अत एव बह्वृचाः अप्य
ग्निमीळइत्यस्य पदविभागपाठे निघातमेव कुर्वंति न तु स्वरितमपीति चेत्। सत्यं। प्रातिशाख्ये विशेषविधानात् स्वरि
तसिद्धिः। उक्तं हि। यथा संधीयमानानामनेकीभवतां स्वरः। उपदिष्टस्तथा विद्यादक्षराणामवग्रह इति। तदेवं अग्निमी
त्यादेः संहिताविरहेऽन्तस्वरितेति स्थितं। केचित्तु वायुर्दिक्षु पाठान्निपातसंज्ञा। निपात एकाजिति प्रगृह्यत्वे। ततः प्रकृति
भावः। यद्यपि अनिपातानामपीह ग्रहणमिष्टं दृश्यश्चोदाहृतिः शाक्षिरित्यादिसिद्धये तथापि न सर्वाव्ययकृत्यः साक्षा
न्निर्दिष्टव्याः। त्यानं स्यात्। किं तु कापि व्यक्तिर्निर्दिश्यमानानां स्वसदृशान्दितरान् अपि गृह्णातीति वक्ष्यते। तत्र निपातव्य
क्तिरेव निर्दिश्यतां उत तदितरेति संशये आद्यकोटिरेव युक्ता। संहिताकार्यविरहे निर्दिश्यमानरूपस्य स्फुरणा
तीति सिद्धेरित्याहुः। कारजात्ययस्तु न भवति। वकुलग्रहणात्। सहितेगार्त्तकायां एकुःच कुःनित्यमोपसंख्यानात्।

ऽन्येतु इकृन्ति यौ ध्यातु निर्द्देश इत्यतो निर्देशशाब्दः कारप्रत्ययविध्यावनुवर्त्तते। निर्देशश्च प्रतिपादनं। तेन प्रयोग
विशेषनिष्ठानां वर्णानां प्रतिपादने प्रत्ययः। इहतु आनुपूर्वी संपादनमात्रे तात्पर्यं न तु कविपुत्र इत्यादौ दृष्टानाम
कारादीनां प्रतिपादने। अतः कारप्रत्ययाभाव इत्याहुः। अनुकार्यानुकरणयोरभेदविवक्षापक्षेतु अर्थवत्वस्या
विवक्षिततया वर्णवाचित्वाभावात् कारप्रत्ययाभावः। अत्रेदमवधेयं। अकारः संवृतः। विवृतकरणाः स्वराः तेभ्य
एउ विवृततरौ ताभ्यामैऔ ताभ्यामप्याकारः संवृतो कार इति शिक्षावाक्यात्। विवृतसंवृतादयः शब्दाः गुणोदिव
द्रव्येऽप्यभिलिव प्रयुज्यन्ते। तेन विवृतं करणं प्रयत्नो येषां ते तथाभूताः स्वरा इकारादय इत्यर्थः। यत्तु वुंदेगविशेषै
रिवर्णेवर्णस्यकारणं संवृततामिच्छद्भिरुक्तं यतः संवृता अन्यथा आभैव सा स्यादिति तन्नुतदा यथाश्रवणविशेषमा
त्रपरं न तु सार्वत्रिकं। यथास्मात्प्रसुश्रिणायनीयानामेवस्तु जातेऽप्यवस्तून्ते अध्वर्यो तु अद्रिभिः सुतमित्यादावे

शा॰ कौ॰
३५
36

कमात्र एकार उकारस्य न त्वन्येषां तद्वत्। इकारादेर्वा यथा तथास्तु। अकारस्य संवृतत्वं तु निर्विवादमेव। तथाप्य
सो प्रक्रियादशायां आकारेण दीर्घेण प्लुतेन च सह सावर्ण्यसिद्धये विवृततरोऽस्मिन्सूत्रे निर्दिश्यते। विवृतत
रत्वं च प्रयोगदशायां माभूदित्येतदर्थं शास्त्रान्ते अ अ इति सूत्रं कृतं। तेन हि विवृततरमनूद्य संवृतो विधीय
ते। न चानुवाद्यसमर्पकेण अकारेण दीर्घप्लुतयोरपि ग्रहणं कस्मान्न तयोः संग्रहः स्यादिति वाच्यं। अद इति
तपरनिर्देशस्य एकशेषेण ह्रस्वमात्रनिर्देशस्य वा सिद्धं तथापि भाव्यमानत्वात्। वक्ष्यति हि तत्र वार्त्तिककारः। सिद्धं
तु तपरनिर्देशात्। एकशेषनिर्देशाद्वा स्वरानुनासिक्यभिन्नानां भगवतः पाणिनेः सिद्धमिति। शास्त्रान्ते च विधी
यमानः संवृतः शास्त्रीयकार्ये सर्वत्रासिद्ध एवेति न कापि प्रक्रियायां सावर्ण्यप्रतिबन्धः। शास्त्रान्ते क्रियमाणं
प्रत्यापत्तिवचनमेव ज्ञापकं इह विवृततरउपदिष्ट इत्यस्यार्थस्य। यत्तु अत्रत्यं वार्त्तिकं अकारस्य विवृतोपदेश

राम
३५

ऽकारस्य ग्रहणार्थमिति तत्र विवृतत्वाद्दो विवृततरत्वपरः। अत एव हृतक्रियानुरोधात्। ननु सुकृतरोपि सुक्ष्मो
नवत्येवयथातथेह विवृततरस्याप्याकारस्य विवृतत्वान पायासावर्ण्यं यथाश्रुतेपि सेत्स्यतीति चेन्न।
सवर्णसंज्ञायां तुल्यप्रयत्नत्वस्य विवृततरत्वाद्यवांतरधर्मपुरस्कारेणैव वक्तव्यत्वात्। अन्यथा तु दे
तोरपि सावर्ण्यापत्तौ गंगा इत्यत्रैव नावं नावः शुभा वेश्मा वइत्यादावपि अतो मूर्ध्नोदिस्यात्वं प्रवर्त्तेत। ईदू
देदिति एकारांतस्य विधीयमाना प्रगृह्यसंज्ञा करवा वहै इत्यादावपि प्रवर्त्तेत। एङः पदांतादतीति पूर्वरू
पं कस्मै अदात् विस्से अस्तीत्यादावपि स्यात्। किंचैवं हकारादीनामीषद्विवृतत्वादकारादीनां च विवृत
त्वात्सावर्ण्याप्रसक्तेर्नाज्झलाविति सूत्रं न कर्त्तव्यमिति भाष्यसिद्धांतो व्याकुप्येत। एवं दुरि. त्यादिसूत्रद्वये ऽका
रवकारस्थानुबंधद्वयकरणं चेह लिंगं। अन्यथा हि अन्यतरेणैव सर्वत्र व्यवहरेत्। किं बहुनाऽऽकारे

कारावपि न निर्दिशेदकारादीनामिवर्णावर्ण्येन सिद्धेरिति दिक्। तस्मादत्र भाष्यवार्त्तिकयोर्विवृतशब्दो
विवृततरं लक्षयतीत्येव तत्त्वं। यद्वा। विवृतप्रतिज्ञानसामर्थ्याद्विवृततरेण सह सावर्ण्यं संस्यतीत्यवधेयं।
एवं च भाष्यादिग्रंथो यथाश्रुत एवास्तु। एतच्च न्यासकारहरदत्तयोर्ग्रंथमनुसृत्योदाहृतशिक्षावाक्योप
ष्टंभेन व्याख्यातं। परमार्थतस्तु अकारो विवृत इत्येव भाष्यवार्त्तिकस्वरससिद्धं न तु विवृततर इति। तथा
च पाणिनीयशिक्षा। स्वराणामूष्मणां चैव विवृतं करणं स्मृतं। तेभ्योपि विवृतावेङौ ताभ्यामैचौ तथैव
चेति। प्रागुक्तं तु मतांतरं न तु पाणिनीयं। अत एव ऋऌक्सूत्रे भाष्यकैयटादौ अकारस्य विवृतत्वाद्विवृ
ततराभ्यां संध्यक्षरभागाभ्यां न सावर्ण्यमित्युक्तं। एवं च वृत्तिग्रंथस्यापि यथाश्रुतस्य संभवे न्यासकार
हरदत्ताभ्यां कृतं भंक्लोव्याख्यानमनादेयं। यद्वा नाज्झलाविति पठतः सूत्रकृतो मते विवृततरस्यापि

विवृतत्वमात्रेण सावर्ण्यमस्तु। वत्वाद्ऽऽभ्यंतरः प्रयत्नः सवर्णसंज्ञायामाश्रीयेत इति वृत्तिग्रंथस्वर
सात्। नचैवमेचैचोरिति प्रसंगः। वर्णसमाम्नाये एचामुच्चारणसामर्थ्यात्। ऽनुबंधद्वयसामर्थ्याद्वा तत्र सा
वर्ण्याप्रवृत्तेरिति दिक्। ननु दंडाढकमित्यादौ दीर्घेण सह दीर्घ एकादेशः सावर्ण्यस्य फलमित्यस्तु। प्लुतेन तु
सावर्ण्ये किं फलमिति चेत्। ऽहऽऽ३इन्द्र इति गुरोरनृत इति प्लुते तेन सह पूर्वस्य दीर्घ एकादेशः फलमि
ति न ग्रहणम्। नच दीर्घे कर्तव्ये प्लुतस्यासिद्धत्वं शंक्यं प्लुतप्रगृह्या अचीति ज्ञापकेन सिद्धः प्लुतः स्वरसंधिष्वि
ति वक्ष्यमाणत्वात्। स्यादेतत्। ऽक्षरसमाम्नायिकस्याऽकारस्य कृतेपि विवृतत्वे धातुप्रातिपदिकप्रत्यय
निपातस्थस्य संवृतत्वादणुत्वं न स्यात्। ऽक्षरसमाम्नायिकेन भिन्नप्रयत्नानाममीषामग्रहणात्। ततश्च
शाखामदण्डानामित्यादौ दीर्घोऽनोत्यपरिभाषया ऽंत्यस्यैव स्यान्नत्वकारस्याऽवश्चेति परिभाषाया बाधात् तु प

प्रौ॰को॰
३८
38

स्थिते। तथा दृषदित्यत्र प्रातिपदिकस्यान्तउदात्तो भवतीत्येतन्न स्यात्। नायक इत्यत्र प्रत्ययाकारस्यानच्त्वा
दयादेशो न स्यात्। अवनमतीत्यत्र निपाता आद्युदात्ता उपसर्गाश्चाभिवर्जमित्याद्युदात्तत्वं न स्यात्। किं
चा अस्य च्वावित्यादेः अकारस्य संवृतत्वेनानण्त्वादसति ग्राहकत्वे प्लुतो भवतीत्यादावेवेत्वं स्यान्न तु
मालीभवतीत्यादौ। न चाक्षरसमाम्नायिकस्य विवृतप्रतिज्ञासामर्थ्यात्तत्सदृशोप्युच्चार्यमाणोपि तत्का
र्यं प्रवर्त्तिष्यतीति वाच्यं। खट्वाढकमित्यादौ दीर्घसंपादनेन विवृतत्वप्रतिज्ञायाः साफल्ये सति सामर्थ्यवि
रहात्। तथाहि। अकः सवर्णे इत्यत्र आदिरन्त्येनेति वचनादनयोरेव अकारककारयोरनुकरणमिति नि
र्णितं। तेन प्रत्याहारगतेन विवृतेनाकारेण सावर्ण्याद्दीर्घप्लुतयोर्ग्रहणे खट्वाढकमित्यादि सिध्यति।
असति तु विवृतत्वे अस्य च्वावित्यादिष्विव प्रत्याहारेष्वपि संवृतस्य ह्रस्वस्यैव कार्यं स्यान्न तु दीर्घप्लुत

राम
३८

योरिति पञ्चभेदस्य स्पष्टतया ऋ विवृततत्वप्रतिज्ञायाः सामर्थ्याऽपोह्येत। प्रत्यापत्त्याऽक्षरसमाम्ना-
यिकस्यैव विवृततत्वं ज्ञाप्यत इति न भ्रमः किंतु सामान्यापेक्षं ज्ञापकं इह शास्त्रे यावानकारः स सर्वोपि
प्रक्रियायां विवृतो बोद्धव्य इति। एवमपि प्रत्युच्चारणं वर्णानां भेदेनाऽस्य च्वावित्यादावुच्चारितस्या-
नण्त्वेन सवर्णग्राहकता न स्यात् किंत्वकः सवर्ण इत्यादौ प्रत्याहार एव सवर्णग्राहकत्वं स्यात् एव
मिकारादयोपीकोयणचीत्यादावेव ग्राहकाः स्युर्न तु एरनेकाचो यस्येति वेत्यादौ। ननु एक एवाऽकारः।
तत्कस्यानण्त्वमाशंक्यते। न चैतेषूदात्तानुदात्तत्वादिविरुद्धधर्मानुपपत्तिः। तेषां व्यंजकध्वनिधर्मत्वा-
त्। अनुबन्धव्यवस्थापि लोकवद्भविष्यति। लोके हि हन्तुं डो भव इह जटिलो भवेत्यादिक्रमेणैकस्यानेक-
धर्मोपदेशेऽपि तत्तद्देशभेदेन धर्मा व्यवतिष्ठन्ते तथेहापि कर्मण्यणि स्यात्रैवणित्वं। वरेण्य इत्यत्र टित्वं। ग

पोष्टकिरित्वकित्वे। अस्मां प्रतिकद्इत्यादौ तु नैकमप्यनुबंधकार्यमिति व्यवस्था। अत एव प्राग्दीव्यतोऽणिति
वादिभ्योऽणि त्यादौ पुनःपुनर्णित्करणं सार्थकं। कथं तर्हि घटेन तरतीति घटिकः। तरतीत्यधिकारे नौद्व्यच
ष्ठन्निति ठन्। कथं च घनस्य निमित्तं संयोग उत्पातो वा धन्यः। तस्य निमित्तं संयोगोत्पाताविव्यधिकारे गोद्व्यचो
संख्यापरिमाणाश्वादेर्यत्। इति चेत्। आवृत्तिकृताद्व्यपदेशाद्विव्यंति। नन्वनाकुकद्इत्यादौ मुख्यद्व
चिवदितार्थत्वाऽऽरोपे कार्यासंभव इति वाच्यं। अश्वादिप्रतिषेधेनेह गोणस्यापि मुख्यसमकक्षतायाप्रा
पनात्। अतएव किरणे त्यादौ स्वावेकाव इति विभक्ते रुदात्तत्वं न भवति। आवृत्तिकृतेन द्व्यपदेशेन स्वा
श्रयस्यैकाच्व्यपदेशस्य निवर्त्तितत्वात्। नहि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते। तस्माद्दुक्तरीत्या बाधनाभा
वाद्याद्ववद्रूपसाधकबलाद्वाकारव्यक्तिरेकैवेति सर्वं सुस्थमिति चेन्न। उदात्तत्वादिविरुद्धधर्माध्यासे

वभासेन॰आरोपेप्रयोजनाविरहात्

नव्यक्तयैवव्यस्यबाध्यात्। ध्वनिधर्म एवैत इत्युक्तमिति चेत्तर्हि कत्वगत्वादिकमपि तस्यैवास्त्विति। अकारे
कारादीनामप्येकत्वप्रसंगः। तदेतदुक्तं। अखंडं पदं वाक्यं वा वानकमिति। किं बहुना मास्त्वेव व्यंग्यो वर्णः। व्यं
ञ्जकत्वाभिमतैर्ध्वनिभिरेव सर्वनिर्वाहात्। उक्तं च हरिणा। अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता। कै
श्चिद्व्यक्तय एवास्या ध्वनित्वेन प्रकल्पिता इति। तस्माद्यदि ध्वनिभिरेव निर्वाहस्तर्हि जातिस्फोट एव नो चेत्क
त्वयोरिवोदात्तानुदात्तादीनामपि भेद एवेति न्यायतः परिनिष्ठिते सति। एवं ध्वनिगता भेदा उदात्तस्वरिता
दिकाश्च। वर्णेष्वनुपतन्तः स्युरर्थावगतिहेतव इति मीमांसकमतमर्धजरतीयत्वादुपेक्ष्यमिति स्थितं। ए
वं च अनन्ता वर्णा इति नैयायिकाद्यभ्युपगतरीत्यापि यद्यपि जातिपरो निर्देशस्तर्हि अस्त्वश्रावित्वं तत्रापि तथै
वास्त्विति किं ग्रहणकशास्त्रेण। तदुक्तं सवर्णेऽण्ग्रहणमपरिभाष्यमाकृतिग्रहणादिति। तपरसूत्रं तु जाति

निर्द्देशप्रयुक्तस्यैवातिप्रसंगस्यभंगाय। त्वदादीनामित्यादौ तु एकमात्रव्यक्तेरपि जातिविशेषणे तयापि वक्ष्य
तो विध्येयविशेषणत्वात्समृध्येकत्ववत्। अस्यच्वावित्यादौ तु अनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्षिता। ग्रहैक
त्ववत्। किंतु अणग्रहणं कुर्वतः सूत्रकृतो नायं पक्षोऽभिप्रेतः। एकोऽवर्णव्यक्तिरिति पक्षस्तु दूषित एव। अ
ष्टादश अवर्णव्यक्तय इति पक्षे तु अदङ् ङिति यदि जातिपरो निर्द्देशस्तर्हि पुनरण्ग्रहणं वैयर्थ्यं। व्यक्तिनि
र्द्देशे तु उत्तरीत्या अस्यच्वावित्यादौ सवर्णग्रहणानुपपत्तिरिति महत्संकटं। तस्मादिह सूत्रकारस्याशयो दुर्व
च इति वेत्। अत्रोच्यते। त्रिष्वपि पक्षेषु अस्त्येव सूत्रस्योपपत्तिः। तथाहि। एक एवायं अकार इति मतस्याभिन्ना बला
दकार एक एवेति पक्षे धर्मव्यवस्थायास्त्वयैवोपपादना यथा के अण्णेर्कार्यं न भवति यथा च अप्रत्ययादि
विधिस्थलेन दीर्घादिप्रवृत्तिः तथा अस्यच्वाविति विधिरपि मालीभवतीत्यादौ न प्रवर्त्ततेति ग्रहणकशास्त्रं

क्रियते। तच्च सावर्ण्याधीनमिति ह्रस्वस्य विवृतत्वं प्रतिज्ञायते। तत्तु ऽक्षरसमाम्नायिकस्यैव चेत्तु न रूपिम
व्यवतिष्ठेतेति सार्वत्रिकी प्रतिज्ञा। एवमपि ऽस्य ग्रा विल्यादे ऽनणुत्वादेव ग्राहकत्वं न स्यादिति चेत्। विवृ
तह्रस्वत्वादेरविशेषेण तस्याप्यणुत्वात्। नहि मुण्डत्वजटिलत्वादिवद्देशभेदेनानुपातिताः स्वरूपमात्रानुवादेन
विहिता ऽपि श्यामो दीर्घश्चतुर्बाहुरित्यादयो व्यवतिष्ठन्ते। उदात्तानुदात्तस्वरितानुनासिकत्वगुणास्तु शब्दे
नानुपातिना न भेदका इति वृद्धिसूत्रे वक्ष्यते। अनन्ता एव व्यक्तय इति पक्षे ऽष्टादश ऽवर्णव्यक्तय इति पक्षेन
यद्यपि ह्रस्वदीर्घप्लुतसाधारणी एका जातिः कण्ठादिजन्यतावच्छेदिका तज्जन्यध्वनिव्यंग्यतावच्छेदिका वास्ते शब्दनित्यतापक्षमाश्रित्याह॥
वा तथापि तद्व्याप्या ह्रस्वमात्रवृत्तिरपि जातिरस्ति। तथा च ऽइउण् सूत्रे व्याप्यजातिपरो निर्देशः। तेन तज्जा
तीयैककृतं विवृतत्वं सर्वेष्वपि सिध्यति। अत एव सर्वेऽपि ह्रस्वा ऽणेभवन्त्येवेति ऽस्य ग्रा विल्यादेन कश्चि

शा०कौ०
४१
५१

दोषः।ऽवान्नामित्यादिष्वपि श्लेषेव गतिः।ऽन्यथाऽवा■स्तामिति स्थिते श्लिवः पूर्वपरयोरकार
योर्मध्येऽन्यतरस्यैव ऋलृत्वं स्यान्न तूभयोः।ऽक्षरसमाम्नायेऽनयोरपाठात्। ततश्च ऋलोऋलीति
न प्रवर्तेत। सूत्रस्यावकाशस्तु अभिला इत्यादिः स्यात्। एवं वदीर्वाणमनणत्वेन सवर्णग्राहकत्वं ना
स्तीत्यपि सिद्धांतः संगच्छते। अथ व्यापकजातिपरमेव निर्देशं स्वीकृत्याऽणग्रहणं त्यज्यतामिति चेत्। ए
वमपि उपसर्गादृतीत्यादौ ऋवर्णग्रहणाय ग्रहणकशास्त्रस्यावश्यकत्वात्। न च सवर्णयोरिति सा
वर्ण्यविधानसामर्थ्यात्तद्ग्रहः।ऽकः सवर्ण इत्यादौ चरितार्थ्यात्। किं वाऽस्यद्वा वित्यादौ व्यापकजा
तिनिर्देशः स्यदृदानाम इत्यादौ तु व्याप्यजातिनिर्देश इत्यस्य नियामकाभावे संकरोऽपि स्यात्। न चानुवा
यविशेषणं विधेयविशेषणं वा ग्रहणकत्वप्रयोजकत्ववद्विवक्षितमविवक्षितं चेति मीमांसकमर्यादैवैया

राम
४१

यद्येतेषां विधानं तर्हि सर्वत्र विवक्षितो। चिता
सामुत्वविधानेत्व विवक्षितोऽचितोऽर्थोऽस्य
तीयते हेतुमेव॥

करणेः स्वीकर्तुं शक्या। उपेयिवाननाश्वाननूचान इत्यत्र उपेत्य विवक्षितं नञः प्रसक्तिस्तु विवक्षितमिति
स्वीकारात्। अर्द्धधातुकस्येड्वलादेरित्यादावनुवाद्यविशेषणस्यापि बहुशो विवक्षणाच्च। तस्माद्व्याख्या
नतो विशेषप्रतिपत्तिरिति परिभाषैव सिद्धान्ते शरणं। व्याख्यानं तु लक्ष्यानुरोधीति यद्यप्युपगम्यते तत्र तत्रा
श्रीयते तथापि नैतद्बलेन ग्रहणकशास्त्रप्रत्याख्यानं चमत्कारमावहति। ग्रहणकशास्त्रबलेन हि अप्र
त्ययोऽविधीयमानः सवर्णग्राहकः इति स्फुटतरं प्रतीयते। उक्तं हि तावद्यं मीमांसकमर्यादाप्यमशास्त्रो
पि बहुशः। अग्रेयांसं नप्रबोध्ययेदित्यादिषु एकः पूर्वपरयोरिति सूत्रे एकग्रहणमपीह ज्ञापकं। अन्यथा
ऽण्गुणे इत्येकत्वस्य पश्वेकत्ववद्विवक्षासंभवात्किं तेनेति दिक्। अथवा अर्थवत्त्वस्याविवक्षायामपि दृहे बो
दितोऽस्कारादिः सुसदृशीः बहूच्यत्वीः सा दृश्याख्यसंबंध्येनोपस्थापयति। न वैवमपि वृत्त्या अनुपस्थितानां

विद्यादिप्रत्ययनोपिकेश्यानां नोपस्था
पयेदित्यर्थ इति मिताक्षरा। प्रश्नस्य रूपो
देश्यविशेषणस्यापि शयस्यान विव
क्षितत्वादिति भावः॥

शा०कौ०
४२
42

शाब्दबोधे ऽन्वयप्रतियोगितानुपपत्तिः। अपर्युदस्याहारवादे बाधकाभावात्। अतिप्रसंगभंगस्तु तात्पर्यग्रा
हकबलेनैव। अन्यथा तवापि लक्षणाध्याहारादेरतिप्रसंगस्य तदवस्थत्वात्। स्यादेतत्। आक्षिप्तत्वस्य तु शासन
बलेनात्र बोध्यत्वाद्युपदाध्याहारः अनुपपन्न इति चेन्न। अन्यत्र श्रोपेककर्मणि। क्रियार्थोपपदस्य च कर्मणि स्थानि
न इत्याद्यनुशासनादपर्युदस्याहारस्यापि सत्त्वे विशेषे ऽनुपपन्नत्वात्। अन्यथा गतिरियमाहेत्यादाववगतेश्चेति
वक्ष्यते॥ ॥ऋलृक्॥ ॥ननु विधिवाक्येषु अकारेण ग्रहणकशास्त्रबलेन अकारादीनामादेशतया ग्रहणल्ला
ति तथा ऽत्र वर्णेन विधावदकारग्रहणं भवति तत्किं पृथग् लृकारोपदेशेनाऽन च भिन्नस्थानतया सावर्ण्यविरहाद
ग्रहणमिति वाच्यं। ऋकारलृकारयोः सवर्णविधिरिति वार्त्तिकबलेनैवानिकस्य सावर्ण्यस्यावश्यवा
च्यत्वात्। अन्यथा इहोपदिष्टे लृकारे प्लृकारीयतीत्यादौ उपसर्गादृति धातौ वा सुप्यापिशलेरित्यस्य राम
४२

ऽप्रवृत्तिप्रसंगात्। ननु ऋपिस्थस्य रकारस्येदमनुकरणं। तस्य च स्वरकार्ये ऽसिद्धत्वाद् ऋकार एवायमि
ति उपसर्गादृतीत्यादि सेत्स्यतीति चेन्न। कृपो रो ल इति विहितस्यासिद्धत्वेपि तदनुकरणस्यास्य ऽसिद्धताऽवि
रहात्। स्यादेतत्। प्रकृतिवदनुकरणमिति ऽतिदेशादयमप्यसिद्ध एव। सत्यातिदेशे वस्या ऽप्रयणीयः। द्विः प
दं त्वित्याह इति तैत्तिरीयवाक्ये यद्यपि पदं त्वित्यानुदात्तं पठ्यते तथापि भाष्योदाहृते शास्त्रांतरीये पदं तु शाट्
स्यति ङुः तिङः इति निघातो यथा स्यात्। न ह्येतत्तिङंतं। तिङंतपदार्थकत्वात्। स्वाद्युत्पत्तिस्त्विह विवक्षाभेदेन वैक
ल्पिकी स्यपूर्वसूत्रे वक्ष्यते। ऽग्नी इत्याहेत्यादौ प्रगृह्यत्वमप्यतिदेशादेव। अतिदेशे ज्ञापकं तु यत्तदेतेभ्यः परिमाणे
इति सौत्रनिर्देशः। न ह्यत्रातिदेशं विना तदाद्यत्वं लभ्यते। अभिव्यक्तपदार्था ये इति न्यायेन लोकप्रसिद्धार्थपर
तायामेव तत्प्रवृत्तेः। तथा च प्रयुज्यते। यत्तदोर्नित्यसंबंध इति। नन्वनेनैवातिदेशेन ऽत्वस्यावश्यकत्वादुदाहृ

तत्प्रयोगोनुपपन्न एवेति चेत्। उच्यते। तज्ज्ञापकस्स्त्र एवं त्यदादीनि सर्वैर्नित्यमित्येकशेषस्याकरणेन एतत्तदोः सु
लोपः इत्यादिनिर्देशैश्चातिदेशस्यानित्यताज्ञापनात्। अथवा प्राचुर्येण कालादिवांत इति सूत्रे अपो योनि
यन्मत्वर्थे चेति वार्त्तिकेनेयं परिभाषा अस्या अनित्यता चेत्तु भयमपि ज्ञाप्यते तथाहि। कारीषमिमुमंतावा
ज्यभागाविति श्रुतौ अग्नसुमेसोमः। अप्स्वग्ने सधिष्टवेतिहि तत्र मंत्रौ। तत्राप्सुशब्दादनुकरणभूतान्मतुपि अ
स्यवामीयमित्यादाविवानुकरणस्य विभक्तित्वाभावादेव लुकोप्रसंगात् लुग्विधानमुक्तपरिभाषां ज्ञापयति म
तुबुत्पत्तेश्च प्रथमांततां विना दुर्लभत्वात्प्रातिपदिकताया आवश्यकी। सा च प्रत्ययांतत्वे सति दुर्लभेति प्रातिपदि
कसंज्ञायां कर्त्तव्यायां अतिदेशप्रवृत्तिविरहाभ्युपगमान्नित्यतापि सिद्धा। एतेन युष्मदस्मत्प्रत्ययगोचर
यो रित्यादिप्रयोगा व्याख्याता। प्रकृतमनुसरामः। लकारानुकरणस्याप्यतिदेशेनासिद्धत्वात् आकारायतीत्या

दावुपसर्गादृतीत्यस्य प्रवृत्तिसिद्धौ किं सावर्ण्येनेति चेन्न। तथा सति रेफपरत्वप्राप्तावपि ऌकारपरत्वासिद्ध्या प्रकृते ऽनि
ष्टत्वेनातिदेशाप्रवृत्तेरेव तथापि वाच्यत्वात्। ननु रेफपरत्वे सिद्धे ऽतिदेशाद्रेफस्य ऌकारो भविष्यतीति चेन्न। एवमपि
गम्लृ सृप्लृ इत्यादिस्थस्य ऌकारस्यानुकरणे ऌत्वयुक्तातिदेशादेरुक्तिसंभवाभावात्। तस्मात्सावर्ण्यस्यावश्यकत्वे ऌका
रोपदेशो व्यर्थ एवेति चेत्। उच्यते। न तावद्वार्त्तिकं दृष्ट्वा सूत्रकृतः प्रवृत्तिः। आरब्धेपि वार्त्तिके ऋकारऌकारयोः सावर्ण्य
स्यानित्यतां ज्ञापयितुं कर्त्तव्य एव ऌकारोपदेशः। तेन कॢप्तशिखेत्यत्र गुरोरनृत इति प्लुतः सिध्यति। अन्यथा ऽनन्
त्य इति निषेधः स्यात्। ऋकारेण ऌकारग्रहणात्। कॢप्यमानस्थली कॢप्यमान इत्यादौ ऋवर्णान्नस्येत्यौपसंख्यानिकण
त्वस्याप्रवृत्तिस्तु ऌत आदित्वेनापि सुवचा। अन्यथा प्रकॢप्यमानादौ कृत्यच इति णत्वस्य दुर्वारत्वात्। इदं त्ववधेयं वार्त्ति
कमते सवर्णे ऌग्रहणमपरिभाष्यमिति सिद्धं तादृकारे ऌकारस्याप्यारणेनातिविरहेण कृतिग्रहणसंभवाद्वा प्राऌका

प्र०कौ०

४४

५५

शायती त्यत्र कार्यानिर्वाहस्तदवस्थः सावर्ण्यविधिस्तु सवर्णदीर्घे हेतुः ऌकार इत्यत्र इको सवर्ण इत्यस्य प्रवृत्तिप्रतिबंधे
व चरितार्थः। न च ऋऌत्यक इत्यस्याप्राप्तिः ग्रहणकशास्त्राभावादेव। एवं च दीर्घसंपादकतार्थं ऌकारपाठः सावर्ण्य
नित्यत्वमपि कथं ज्ञापयेदिति। तस्मादण्ग्रहणं प्रत्याख्यानस्य तस्थाने स ग्रहणं कर्त्तव्यं अप्रत्ययग्रहणं च न का
स्तु ४ र्यमित्याशयः कृत्स्नः। यद्यप्येवं पक्षे प्रमती नामृदितो नाम्नो पो[illegible]दित्कार्यं प्राप्नोति। पदयगनुबंधकरणं तु ऌदित्व
प्रयुक्तस्य अङादेशस्यस्तदिस्त्वप्रवृत्त्या चरितार्थत्वादसंकरं ज्ञापयितुमसमर्थं तथापि सावर्ण्यस्यानित्यतयैवेदमपि
समाधेयं। यद्वा स्वरसंधिप्रकरणे ऌवर्णस्य सवर्णभाव एव वाच्यः। सावर्ण्यं च नोपसंख्येयं। प्रस्तुतस्तु प्रकरणांतरस्थ
इति न तत्रातिदेशप्रवृत्तिः। उरण्रपर इति परिभाषा तु कार्यकाले तया स्वरसंधिप्रकरणस्थेति उदित्यनेन ऌवर्ण
ग्रहणे प्रयत्नः। अस्मिन्नपि पक्षे ऌकारोपदेश इह कर्त्तव्य एव। ऌत्पशिख इत्यत्र प्लुतो यथा स्यात्। ऌप्त इति वृद्धित्वं। राम

४४

प्रःरूप्रमप्रतिवस्वरितः। अत्र ह्युदंतं भवित एव पर्यात्कर्मणि क्तः। तेन गतिरनंतर इति पूर्वपदप्रकृतिस्वरः। कर्मणि यः क्त
स्तदंते उत्तरपदे तद्विधानात्। ततः शेषनिघाते कृते उदात्तादनुदात्तस्य स्वरितः। न चात्र कृपोरो लः इत्यस्यासिद्धत्वं श
क्यं पूर्वत्वात्। परं हि पूर्वं प्रत्यसिद्धं न तु परं प्रति पूर्वं। एवं च गमप्रभृतीनां ऋकारस्य इत्संज्ञाप्रणायासेन सिध्य
ति। अन्यथा तु पुषादिद्युताद्यॢदित इति ऌकारे परतः कृतेन यणादेशेन इत्संज्ञानुवादेन वर्ज्ञापकेन कथं विज्ञापनीया
स्यात्। एवं च ऌदितो नुमित्याद्यनुवादानां सत्यक इत्यादिनिर्देशानां च साम्यादिकारादयोपि न निर्दिश्येरन्। यथाश्रुत सत्वरी
त्यानुक्रमः। सकारमुच्चारयितुं प्रवृत्ता कुमारी करणे पाटवाभावात् ऌकारमुच्चारयति तदनुकरणस्यापि अर्थसिद्धिः
फलेः अनुकरणं नामानुकार्येणार्थवतां सर्वत्र साधुतानुपगमात्। नन्वेवं ऌवर्णस्य दीर्घा न संतीति व्याहन्येत। अ
नुकरणस्य तत्रापि स्तु जन्मत्वादिति चेन्न। न्यायप्राप्तस्यापि वचनेन बाधात्। इदं च न्याय्यभावात्कल्पनं संज्ञादिष्विति

वार्त्तिकाल्लभ्यते। तथाहि। ऌकारोपदेशो यदृच्छाशक्तिजानुकरणप्लुत्याद्यर्थ इति वार्त्तिकेन ऌकारोपदेशस्य प्र-
योजनत्रयमुक्तं। दध्यृतकाय देहीति यदृच्छाशब्दः। कुमारी ऌजुइत्याहेति अशक्तिजानुकरणं। प्लुतद्विर्वचनस्वरिता-
र्थप्लुत्यादयः। एतदर्थं ऌकारोपदेश इति हितस्यार्थः। तत्र प्रथमप्रयोजननिराकरणायेदं वार्त्तिकं न्याय्यभावा-
दिति। अस्यार्थः। ऋतिस्तावदृतेरीयङिति निर्दिष्टः सौत्रो धातुः। तस्मादेणादिकः कुन्। तत्र लोपे वं लृञितं। कुन्प्रशिल्पिसंज्ञयो-
रपूर्वस्यापीति। शिल्पिन्यभिधेये संज्ञायां च सोपपदान्निरुपपदाच्च धातोः कुन्स्यादित्यर्थः। रजकः तक्षक इत्यादि शिल्पिनिव-
दकः भषकः कटकं कनकमित्यादि संज्ञायामुदाहरणं। तथा च सतकशब्दः शास्त्रानुगत्वा न्याय्यः। तस्मज्ञावात्स एव संज्ञा।
तथा च कृतं कुर्यान्न तद्धितमित्यादि ग्रहणस्य लृतिरप्यनुकूलिता भवतीति। एवं च वदता शास्त्रानुगतं देशभाषयाय लृ-
वीत्यादि नाम क्रियते तदसाध्विति स्फुटीकृतं। आदिशब्दादनुकरणेपि शिष्टानुरोधं दर्शयता ऌवर्णस्य दीर्घा न सन्तीति

शास्त्रमर्यादामुल्लंघ्य क्रियमाणस्य दीर्घानुकरणस्यासाधुतादर्शिता। तस्मादिषुभादिभ्यः कुर्वीमंत्यादीनामिवगा
वीजेणकारानुकरणे भ्यो दीर्घऌवर्णानुकरणस्यापि न्यायतो न किंचिद्दूषणं किंतु वाचनिकमिति स्थितं। मंजूषा
यां तु मातृकान्यासादौ दीर्घऌवर्णो यद्यपि स्वीकृतस्तथापि प्रातिशाख्यन्यायेन ऽनन्यजासौ नोपयुज्यत एवेत्यवधे
यं। एवं ववं त्यादीनामपि शिष्टैरनंगीकृतानां न्यायसाम्यादसाधुतोक्ता तथा वाऽः। नहि ववि इति परः प्रयुज्यत इति।
एवं च न्यायसाम्यादिति वार्त्तिकेन पूर्ववार्त्तिकोक्तप्रयोजनत्रयमध्ये प्रथमप्रयोजनं निराकृतं। ऌतकस्या साधुत्वे वा इ
दं च त्रयी शब्दानां प्रकृतिर्न संति यदृच्छाशब्दा इति पक्षे एगेतं पक्षांतरे त्वपि हि परिहारा भवंतीति भाष्यकारः। एतच्च प
पर्यालोचनया तु वतु ध्वयीति पक्षे ऌतकादयो पि दिषुभादिवत्साध्वसाधुबहिर्भूताः साध्व एव वा न तु दिषुभादि
विलक्षणा इति लभ्यते। अन्यथा हि पक्षांतरे इति न ब्रूयादिति। न च गल्लसमृति विरोधः तावतापि कृतं कुर्यान्नतदि

तमितिगत्स्वनुक्तं व्युत्कृतस्यापभ्रंशोपगवादेरिवशब्दस्य साधुताभ्युपगमे बाधकाभावात्। पुरुषस्तु साधुनपि प्रयुंजानो
देवब्राह्मणादिनिंदकवदधर्मभाक्स्यादुक्तं वचनात्प्रत्यवेतीत्यन्यदेतत्। यत्तु द्वितीयप्रयोजननिराकरणपरं वार्त्तिकं। अनु
करणं शिष्टाशिष्टाप्रतिषिद्धेषु इति। तस्यायमर्थः। शिष्टस्य साधोरनुकरणं साध्वेव। अशिष्टं वा तदप्रतिषिद्धं
च साध्वसाधु अहिहूतं द्विगुभादि। तस्यानुकरणमपि तादृगेव। अर्थादसाधोरनुकरणमप्यसाध्वेवेति। इदं तु भा
ष्ये दूषितमेव। हे अबो हे लय इत्यादीनां शिष्टपरिगृहीतानामसाधुतायां बीजाभावात्। न ह्यपशब्दवाचकत्वमा
त्रेण तथात्वं। अपशब्द इत्यस्याप्यसाधुतापत्तेः। नवप्रकृतिवदनुकरणमित्यनेन असाधुतातिदेशः। अशास्त्रीय
स्यातिदेशायोगादिति दिक्। तस्माद्वार्त्तिककृता दूषितमपि द्वितीयप्रयोजनं भाष्यकारीत्यास्थितं। यदपि तृतीयप्रयो
जननिराकरणपरं वार्त्तिकं। एकदेशविकृतस्यानन्यत्वात्सुत्वादय इति। तस्यायमर्थः। नुड्द्वित्वादेशविना

मेषु प्रतिविधानमितिवक्ष्यमाणत्वात् ऋकारैकदेशस्य रेफस्य णत्वे कृते एकदेशविकृतन्यायेनाप् कार्यसिद्धिरि
ति। नचैवमनन्तर इति प्रतिषेधापत्तिः। अनन्तर इति न्यासात्। नह्येकदेशविकृतन्यायेन रेफवत्तामापाद्यते। लोकेपि
हि छिन्नपुच्छस्य पुच्छवत्त्वप्रयुक्तं कार्यं नायात्येव। न चैवं हेत्वकास्वदीर्घस्याप्यनन्तर इति णत्वप्रतिषेधापत्तिः। ऋ
वर्णस्यानन्तरत्वेनेति न्यासात्। किं त्वेवं सति ऋकारस्य ऌकारस्य प्रत्याख्यानापत्तेस्तत्र भंगाश्रयणे विपरीतमेव गौरवमि
ति। तदेतदाह भाष्यकारः। सेयं महतो वंशस्तंबाल्लट्वानुकृष्यत इति। लट्वा पक्षिविशेषः फलविशेषो वा। लट बौ
ल्ये इति धातोरप्रत्युषि लटिकणिखटिविटिभ्यः क्वन्नित्यौणादिकः क्वन्। नेड्वशि कृतीतीडभावः। लट्वा करंजभेदे
स्यात् फले वा घे खगान्तरे इति विश्वः। ननु रूपोरेण इति सूत्रे ऋऌवर्णस्य स्यान्मात्रपूर्वमस्तु। एवं च णत्वस्यासिद्धत्वादेव
सुत्यादयः सेत्स्यन्तीति चेन्न। एवं हि सति शोयडी। त्यस्याप्युत्कर्षः स्यात्। ततश्च णत्वस्यासिद्धतया निर्जेगीयत इत्यत्र

हलि चेति दीर्घः स्यात् । ननु बह्वृचप्रातिशाख्ये ऋकारऌकारयोः सवर्णषष्ठ अभ्याजि क्रामः जीयादिति ऋऌवर्णयोः स्थानसा
म्यो चेत्स्तदा त्याग्रहणं कृतान्नो ऐव निर्वाहाद् ऌकारोपदेशो मास्त्विति चेन्न । उक्तरीत्या ऋऌवर्णयोः सावर्ण्योपसंख्या
नं परं प्रत्याख्यायतां । ऌकारोपदेशस्तूक्तरीत्या ऋऌ न हि ख्वेप्लुतसिद्धये सावर्ण्यानित्यतां ज्ञापयितुं कर्तव्य एवेति
दिक् ॥ ॥एओङ् । ऐऔच् ॥ ॥यद्यपि छन्दोगानां मध्ये सात्यमुग्रिराणायनीया अर्द्धमेकारं अर्द्धमोकारं चाधीयते । सुना
ते एत्वसन्ते । अध्वर्यो अद्रिभिः सुतमिति । अंतःपादस्थस्य अव्यपरस्य अकारस्य एङः परस्य तदा यथाप्रातिशाख्ये अर्द्ध
मेकारमोकारं च विदधाति । तथापि प्रातिशाख्यसमाख्याबलादेव सर्वशाखासाधारणे अस्मिन् शास्त्रे तस्य न ग्रहणं ।
ज्ञापकाच्च । यदि हि अकारादिभिरष्टादशानामिव एङ्भिरपि एकमात्राणां ग्रहणं संमतं स्यात्तर्हि हल्लाघवार्थमेकमात्रा
वेव एङावुपदिशेत् अकारादिवत् । न चैवमदेङ्गुणः इत्यत्र तपरत्वान्मात्रिकयोरेव गुणसंज्ञा स्यादिति वाच्यं । तत्र एङ्

इति स्वरूपेणैव दीर्घयोर्निर्देशेऽननत्वेन सवर्णग्रहणे प्रसक्तेः एवमप्यर्द्धमात्राजावचात्। तत्र हि वर्णैकदेशे एउ
इति दीर्घयोर्मात्राचतुष्टयं गुणसंज्ञायां तु एउ इति सार्द्धद्वयं संकलनया सार्द्धः प्रमात्राः। समस्तु वर्णैकदेशे मात्रा
द्वयं गुणसंज्ञायां तु चतस्र इति विजिताः पञ्चैव मात्राः। तस्माद्द्विमात्रनिर्देशसामर्थ्यादप्येकमात्रयोरनभिमतत्वं नि
स्या४ र्णीयते। नन्वेवं एवदरश्चस्यादेशाद्यतिव्यर्थं तत्। तद्धि स्थानेतरमपरिभाषया प्राप्नुवतो रद्दैकाराद्वैकारयोर्निवृत्त्यर्थं क्रि
यत इति चेन्नावैकल्पिकप्राप्तिमतोऽकारस्य व्यावर्तयेतदारंभात्। एवं हि पूर्वो भागोऽकारसदृशः। उत्तरस्तु इवर्णो
वर्णसदृशः। तत्र च मध्यान्तरतमस्य ह्रस्वस्याभावात्पर्यायेणाऽकारः स्यात्। इकारो कारो वस्यातां। तस्मान्मा कदाप्य
वर्णभूदिति स्मृत्वारंभः। वस्तुतस्तु प्रत्याख्यास्यते सूत्रं। तथा च तत्र वार्त्तिककारो वक्ष्यति। सिद्धमेङः सस्थानत्वात्। ऐचो
श्चोत्तरभूयस्त्वादिति। अस्यार्थः। प्रावृ परविप्रतिषेधेन एउ उत्तरभागान्तरतमौ इउवर्णौ वेवेति सिद्धं। एकारस्मृद्ध

शा०कौ०
४८
48

तालव्यः उकारस्तु ओष्ठ्य इति मते सिद्धमित्यर्थः। तथा च बह्वृचानां प्रातिशाख्यं। तालव्यावेकारचवर्गाविकारैकारौ
यकारः शकारः इति। ओष्ठ्यौ तु ओपध्मानीय इति च। पूर्वोक्तेभ्यः शेषो वर्णराशिः रोष्ठाभ्यामुपपादयितव्यः। उवर्णः पव
र्गः उ ऊ उपध्मानीयस्य उष्ठ्या इति सूत्रार्थः। इदं च प्रातिशाख्यवृत्तिकृता व्याख्यानं। तत्र ओष्ठ्येतु शेषं उष्ठ्योपवाद इ
ति पाठः तत्र अपवादेत्यस्य उत्तरसूत्रे वक्ष्यमाणत्वं विहायेत्यर्थः। न्यायसिद्धस्यैव बाध्यबाधकभावस्य स्फुटीक
रणार्थं वेदं। तदेवं शास्त्रद्वयविप्रतिषेधान्मतभेदेन स्थानसाम्यादिसिद्धमिति समाधानद्वयं एऊं स्फुफलितं। एतच्च
यद्यप्येक्षयितुं शक्यं तथापि तत्र समाधानांतरमप्यस्तीत्याह। ऐ औ चेति। वकारो भिन्नक्रमः हेतोरनंतरं बोध्यः अ
र्द्धमात्रा अवर्णस्य। अध्यर्द्धमात्रा इवर्णोवर्णयोरिति पक्षे मध्ये ग्रामादिवद्भूयसा व्यपदेशा इदपि इकारोकारौ भ
विष्यत इत्यर्थः। समप्रविभागपक्षोप्यस्तीत्यग्रे वक्ष्यते। तत्र तु पूर्वोक्तसमाधानद्वयमेव शरणं। तत्रादिशब्दप

राम
४८

रविप्रतिषेध्यपरं प्रथमव्याख्यानं यद्यपि विवरणे स्थितं तथापि तदभ्युपगमे ऽप्रतिपत्तिर्वोभयोरित्यादि विप्रतिषे
ध्ये परमिति सूत्रे वार्त्तिकं भाष्यं च विरुध्येत। नहि गोस्त्रियोरिति सूत्रे ऽणो गुणवृद्धिविधीयमानो ह्रस्वो ऽन्यत्र चरितार्थः।
येनाप्रतिपत्तिः स्यात्। ननु प्रतिलक्ष्यं लक्षणभेदे विकल्पेप्राप्ते परमेवेति नियमो ऽस्त्विति चेन्न। एवं हि सति। अचः प
रस्मिन्निति सूत्रे नित्यः परयणादेशः परस्थानो व्यवस्था। युगपत्संभवो नास्ति बहिरंगेण सिध्यतीत्यादि भाष्यसंद
र्भो विरुध्येत। तद्धत्वेन हि लक्षणवाक्ययोः पूर्वापरीभाव एव विप्रतिषेध्य सूत्रस्य विषयो ऽन्यस्तु अन्तरंगं बलवदि
त्यस्येति लभ्यते। इदं च तत्रैव स्फुटीकरिष्यामः। द्वितीयव्याख्यानमपि अदेङ्कारादिवद्भाति शास्त्रोक्तस्य प्रायेणा
दराद् दुर्बलं। अथ खलु देशाभिमतस्यापि वस्तुमात्रस्य तपरकरणे व्यावर्त्त्यतोक्ते स्तद्वदिहाप्यभ्युपगमस्तर्हि स ल्टकृ स
त्रोक्तरीत्या सकारऌकारयोः सवर्णविधिरिति वार्त्तिकमपि प्रत्याख्यातुं शक्यो ऽथ ध्रिक्षांतरानुसारेण वार्त्तिकारंभ

स्तर्हि एव इगिति सूत्रारंभोपि तथैवास्त्विति दिक्। तस्मादेव इगिति सूत्रवर्जनेनार्द्धैकारार्द्धौकारौ न जन्येते इति स्थितं। न
नु प्रातिशाख्ये त्वावपि ताविह गृह्येते वेत्तदा किमनिष्टमापद्यते येन तयोः ग्रहणं यत्नतः प्रतिपादयसीति चेत्। ना
एचो ह्रस्वविधौ ऽन्तरतमत्वेन तयोरेव प्रसंगात्। एव इगिति सूत्रं तु प्रत्याख्यातमेव। एतदर्थमेव सूत्राभ्युपगमे तु गौ
रवमेव दोषः। स्यादेतत्। एत् उत् ऊ इत्यादि क्रमेण तपरानेव निर्देक्ष्यामः। तथा च ऊकालसूत्रे ऽज्ग्रहणे न तपरग्रहणमे
वोपस्थितौ सत्यां तत्कालग्रहणादर्द्ध एकारः उकारो वा ह्रस्वसंज्ञां न लभते तेन ह्रस्वविधिर्विधेयोप्यसौ नेति। मैवं। त्रि
मात्राणामप्यनवक्लृप्तापत्तेः। ततश्च गोत्रात इत्यत्र ऽनचि चेत्यनेन परस्य विधीयमानं द्वित्वं तकारस्य न स्यात्। प्रत्यर्द्धैः इ
तिकायन उदर्क्कैः ३ पगवे तिङः प्लुतो न स्यात्। प्लुतसंज्ञाविरहात्। प्लुतविधिर्न प्रवर्त्तेत। न च उमभ्यादान इत्यादि विधिसामर्थ्या
त्सिद्धिः। उवर्णविधाने न चरितार्थत्वापत्तेरिति दिक्। तदेतदाह वार्त्तिककारः। संध्यक्षरेषु तपरोपदेशश्चेत्तपरोच्चार
णे। प्लुत्यादिष्वज्विधिः। प्लुतसंज्ञा वा। ऽतपर एव इग्ग्रस्वादेशे। एकादेशे दीर्घग्रहणमिति। ऽस्यार्थः। त्रिप्रमाणवर्ण

द्वयस्यैकदेशावयवत्वात्संख्यायमानमक्षरं संध्यक्षरमित्यन्वर्था पूर्वाचार्यसिद्धा एषां संज्ञा। तपर उपदिश्यते नेनेति
करणे ल्युट् तस्याप्रयोजनमुच्यते। तथा च एचां तपरत्वोच्चारणे फलमस्ति चेत्तर्हि तपरोच्चारणं तावत्कर्तव्यं। प्लु
तत्वे सत्यपि अच्विधिः द्वित्वं उमुडादिर्न सिध्यति। तत्र प्लुतस्यैव उमुडादिः। तस्मात्परस्य द्वित्वमिति सस्वरयितुं
आदिश्चेद्धः। प्लुते तदुत्तरवर्णेषु च दृष्टं कार्यं न सिध्यतीत्यर्थः। अभ्युपेत्य वादोयं। वस्तुतस्तु ऽनच्त्वात् प्लुतसं
ज्ञैव न सिध्यति। तस्मादुष्टस्तपरनिर्देश इति वार्त्तिकत्रयेणोक्तं। यथान्यासं पाठे त्वोह। न तपर इति। सूत्रं क
र्तव्यं स्यात् ऐदौदैङ्कारादिनिवृत्तये इत्यर्थः। वस्तुतस्तु भाष्यामपि सूत्रं कर्तव्यं उभाभ्यामपि वा न कर्तव्यमि
ति समनंतरमेवोपपादितं। तस्मान्नायं दोष उद्भावनार्हः। पक्ष द्वयस्याप्यारंभ्यत्वात् स्यादेतत्। तपरत्वाभाव
पक्षे गंगोदकं खमेशाद्दृत्यादौ त्रिमात्रचतुर्मात्राणां स्थाने त्रिमात्रचतुर्मात्रा एवादेशाः स्युः। आंतरतम्यात्।

नवाकः सवर्णे इति सूत्रे दीर्घ इति योगं विभज्य एकः पूर्वपरयोरित्यधिकारे यो विहितः स दीर्घो भवतीति
व्याख्यानान्न त्रिमात्राद्यादेशः इति वाच्यं। पत्युं विद्धं पर्वतीत्यत्र दोषप्रसंगात्। ननु अमीत्येव सूत्रमस्तु प्रथ
मयोरिति सूत्रात् पूर्वसवर्णोनुवर्त्तते। एकः पूर्वपरयोरिति च। एवं सिद्धे पूर्वग्रहणं यथाजातीयकः पूर्वः
स एव यथा स्यात्। दादीर्घो मा भूदिति। तेन पत्युमिति तावत्सिद्धं। संप्रसारणाच्चेत्यत्रापि स एव पूर्वग्रहणानुवर्त्त
ते। हल इति सूत्रारंभसामर्थ्याद्वा संप्रसारणाच्चेत्यनेन दीर्घो न विधीयते। तेन विद्धमित्यपि सिद्धं। अतो गुण इ
त्यत्रापि परग्रहणस्यैव सिद्धे रूपग्रहणसामर्थ्याद्यादृशः परस्तादृश एवादेशो न तु तद्धि लक्षणः। तेन पर्वतीत्यपि
सिद्धं। तस्माद्योगविभागेन एकादेशे दीर्घो भवतीति पक्षो निर्दोष एवेति चेन्न। एवं सति ह्रस्व ई त्सवङ्कार इत्या
दिसिद्धिप्रसंगात्। इह हि दीर्घवचनादकारेण। अनंतर्यादेतो न। तस्माद्दीर्घ इति योगविभागो दुष्ट एवाते

नगंगोदकं रमेश इत्यत्र त्रिमात्र चतुर्मात्रप्रसक्तिर्दुर्वारैवेति। न च प्लुतस्य विषये स्मृत इति वाच्यं। प्लुताप्लुतप्रसंगे
सत्येव तदिति वक्ष्यमाणत्वात्। ननु तथापि चतुर्मात्रः कथमापद्यते तस्य लोकवेदयोरप्रसिद्धेरिति चेन्ना। छान्दो
ग्ये प्रसिद्धेरित्याहुः। वस्तुतस्तु लोकेप्यस्ति प्रसिद्धिः। तथा च प्लुतावैच इदुताविति सूत्रे भाष्यकारो वक्ष्यति। इष्य
त एव चतुर्मात्रः प्लुत इति॥ ॥ प्रत्युच्यते॥ गुणसंज्ञायां वृद्धिसंज्ञायां च तपरनिर्देशान्नोक्तदोषः। तदेतदुक्तं वार्त्तिक
कृता। एकादेशे दीर्घग्रहणं इति। तस्यैव संज्ञित्वादिति भावः। ननु एवं तर्हि वार्त्तिकं दीर्घग्रहणं तरकर्त्तव्यतापरं नापि यो
गविभागपरं। उक्तयुक्तेः। स्यादेतत्। संज्ञात्वे अप्रहतोः तपरकरणेपि एदैचोः कथं तत्कालग्राहकता। न हि वहेते
दितिसूत्रे वर्णग्रहणेन तात्पर इति पंचमीसमासस्यापि ज्ञापितत्वादिति चेत्। एवमपि तात्पराभ्यामेदैचौ छ्रद्वाभ्याम
स्तु दीर्घाणामेवोपस्थितिः। उपस्थितैस्तु दीर्घैः स्वसवर्णानामशेषाणां ग्रहणं दुर्वारमेवा न हि तेपि तात्पराः। ॥ प्लुतश्च

रितत्वात्। ग्राहकत्वं परमनुबन्धादितानामपि प्रत्याहारे रूपस्थितानामस्त्येवा दीर्घोज्झस्विचेति ज्ञापकात्। च्वादिभ्यः
घादीनामित्यादिनिर्देशाच्चातेन च मस्थित्यादिषु पत्वादिकं सिध्यतीति वक्ष्यते। तस्मात्तात्परस्तत्कालस्येति तु उच्चारि
तेष्वेव स्यादिति चेत्सत्यं। उ मोऽङ्‌स्यादिति सूत्रे उः पुत्रिति प्रत्याहारे कृते दित्वं संज्ञायां व्यर्थं स्यात् सामर्थ्यात्संज्ञिषु उ आदि
रूप करोतीति प्रपा स्वीकृतं तथेहापि तात्परत्वं संज्ञायामनुपयुज्यमानं तदुपस्थाप्येषु संज्ञिषु तत्कालत्वमार
एं सामर्थ्यात् करोतीति न कश्चिद्दोषः। यद्वा। अणुदित्सूत्रे अपर्वश् संज्ञेत्यनुवर्तते प्रत्यर्थस्य संज्ञायां विधेयायामण्
सवर्णान् गृह्णातीति ऊकालोऽज्झित्यत्र भाष्ये स्फुटं उपपादयिष्यामश्चेदं तत्रैव। अतो गुणवृद्धिं संज्ञाविध्याव
पि न सवर्णग्रहणं तपरकरणं तु स्पष्टार्थं दूद इतिवत्। अन्यथा हि किमेता एवेह निर्दिष्टाः किं वा आकारोऽपी
त्यादिसंदेहः स्यात्। तत्र च मात्रादीनां चेत्यादि ज्ञापकानुसरणे क्लेशः स्यादिति दिक्। युक्ततरश्चायमेव पक्षः। आ

घपक्षे हि वृद्धिसंज्ञायां आ इति दीर्घस्यानण्त्वेन सवर्णग्राहकतया तपरकरणमैजर्थमिति स्थितेऽः मुदावस्था
मर्थ्यमस्तु। गुणसंज्ञायां तु तपरकरणस्योभयार्थताभ्युपगमात् पूर्वत्र चरितार्थस्य कृ सामर्थ्ययेनेदं संज्ञिनो दे
दैतो रूपं कुर्यादिति तत्र सवर्णग्रहणं स्यादेव। अस्मिन्नपि पक्षे एकादेशे दीर्घग्रहणमिति वार्त्तिकं दीर्घस्यैव संज्ञि
त्वादिति पूर्ववदेव व्याख्येयं॥ स्यादेतत्। प्रथमपक्षे तादपि परस्य तत्कालग्राहकत्वाद् देरपूयवः सावदस्याद्वैवस्था
न्न तु नेवः पवट् इत्यादावपीति चेत्। अत्र भाष्यं। नायं तकारः किं तर्हि असंदेहार्थः सुखमुखार्थो वादकारोऽयमिति। नन्वे
तज्ज्ञाप्यं तिति प्रत्ययग्रहणमित्येतद्वार्त्तिकप्रत्याख्यानपरेण तित्स्वरितमित्यत्रत्यभाष्येण सह विरुध्यते। तथा हि। त
त्रेति तित्प्रत्ययग्रहणं कर्त्तव्यं। इह माभूत् दिवकम् चुभिरक्षुभिः इति पूर्वपक्षयित्वादित्वमाश्रित्य समाहितं। ततो
भाव्यमानस्याप्युकारस्यादसोऽसेर्दादित्यत्रैव सवर्णग्राहकता स्यादित्याशंक्य तपरसूत्रे दकारस्यापि वर्णभूतस्य

प्रा०कौ०
५२
52

ग्राहकइतिपरिहृतं। एवं च उः ऌदित्यादावपि दपरत्वमेव। अन्यथा स्वरितप्रसंगात्। अयमेव चदपरनिर्देशो भाष्यमानस्याप्युकारस्य सवर्ण° १

निर्देशाद्द्वपरोपि तत्कालस्यैव ग्राहकतां ज्ञापयतीति स्थितं। इहलुग्सदोरिति दकारानिर्देशाज्जवः पवइत्यादौ दीर्घेपी वंसाध्य
तो। अत्र प्राञ्चः। अकारस्थानिकोऽकारस्थानिको वा दकारोत्र भाष्यकृतो विवक्षितः। अतो न पूर्वोत्तरविरोध इति। तज्ज वस्तु
वार्त्तिकमते स्थितेदं भाष्यं। अतो न विरोध इत्याहुः। वस्तुतस्तु तपरस्तत्कालस्येत्यत्र दकारो न निर्दिश्यते। प्रयोजनाभा
वात्। दिव उत्, ऋत उत् इत्यादौ तु तपरत्वादेवेष्टसिद्धिः। नन्वेवं ति स्वरितमित्यस्य प्रसंग इति चेन्न। प्रत्ययाप्रत्यययोः
प्रत्ययस्यग्रहणमिति परिभाषया तत्समाधानात्। यत्तु तिस्वरितमिति सूत्रे हरदत्तेनोक्तं। तस्यास्तु परिभाषा
या भाष्यवार्त्तिकयोरिह। अदर्शनादयं यत्नो महानस्माभिरादृत इति। तत्रेदं वक्तव्यं। अकारस्थानिकोऽकारस्था
निको वा दकार इत्येवंरूपो यत्नस्तावदेऊदूत्त्वे स्थित्वा पूर्वाचार्यैरेवोक्त इति। अत्रत्यकैयटग्रंथ एव स्फुटं। नन्वेत
एवास्माभिरादृत इति ब्रूमो न तु न्नातइतीति चेत्। सत्यमादृतः। तथापि परिभाषाया अदर्शनादित्यसिद्धो हेतुः। अं

राम
५२

गस्येति सूत्रप्रत्याख्यानाय भाष्ये कंठ एवे ऐव एतत्परिभाषोपन्यासात्। निकृतं दुकृतेमित्यादिसिद्धये सूत्रं कर्त्त
व्यमितिस्थिते व्यर्थं यं परिभाषेत्याशय इति चेत्। तथापि पकारपकारस्थानिको दकार इत्यर्थ इति व्याख्यानं लै
शोनिष्फलं तयामूलं स्वरसविरुद्धं तयावादरणं न हि एव। दिव उदित्यादौ तिस्वरितमित्यस्य प्राप्तेरेव विरहेण दका
र प्रश्लेषादेर्निर्बीजत्वात्। तथाहि। उदित्येषा उकारस्य संज्ञा। तया प्रत्यायित उकारस्तु विधीयते। तथा च संज्ञायास्तित्वे
पि संज्ञिनः किमायातं। वस्तुतस्तु संज्ञापितां तान्नतु तित्। तपर इति हि सूत्रितं न तु तिदिति। यदिह संज्ञा च संज्ञपितां त
एव तर्हि ऋतोभिस ऐस् अवद्भिरित्यादावेव स्यान्नतु वृक्षैरित्यादौ तपरस्तत्कालस्येति सूत्रं च व्यर्थमेव स्यात्स्वेरू
पं शब्दस्येत्यनेनैव गतार्थत्वात्। न च उं मुडादाविव संज्ञायां कृतं लिंगं संज्ञिनि लग्नं शक्यं। तद्वदिह सामर्थ्यविरहात्।
एवं च तिस्वरितमिति सूत्रे भाष्यवार्त्तिकग्रंथः सर्वोप्यभ्युपेत्यवाद एव। स्वा ह्वो दिव्वेति सूत्रे द्वकस्य तकारे त्वमित्यादि

ग्रंथोप्येवमेवा तस्मान्नायं तकारः किं तर्हि दकार इति इहत्य भाष्यग्रंथो यथाश्रुत एव साधुरिति सहृदयैराकलनीयं
ऽयमेव व ग्रंथोभ्युपेत्यवादस्तु तामुत्तरग्रंथानां गमयति। एतेन अत् इटो त् इत्यादिष्वपि विधेयस्य तपरत्वाभावो
व्याख्यातः तित्वं तु दूरापास्तमिति दिक्। छ्र ऋकारादयो वर्णाः सांशाः दृश्यंते। यदाह। तस्यादित उदात्तमर्द्धह्रस्वं।
पूर्वस्यार्द्धस्याद् उत्तरस्येदुताविति। वार्त्तिककारोप्याह। एचो ऽयो तरभूयस्त्वादिति। तत्र संति केचिदंशाः स्वतंत्रवर्णा
तरस्य सदृशाः। यथा। ऋकारादिष्वकारस्य सदृशो भागो। एच्षु पूर्वभागोऽकारस्य। उत्तरस्तु इवर्णोवर्णयोः। ऋका
रे उभयतो ऽर्द्धभक्तेरर्द्धमात्रा। मध्ये रेफस्य सदृशोऽर्द्धमात्रा भागः। ऌकारेप्युभयतोऽर्द्धभक्तिः। मध्ये स्वतंत्रलकार
सदृशो भागः। तत्र स्वतंत्रतत्तद्वर्णग्रहणे न विधीयमानं कार्यं तत्तत्सदृशेष्वंशेषु न प्रवर्त्तते। तत्सदृशग्रहणाभे न तु तएवा
न रसिंहवज्जात्यंतरक्रांतत्वात्। गोमो ग्रहणं वा ऽत्र ज्ञापकं। यदि हि भागा अपि स्वतंत्रवर्णप्रयुक्तं कार्यं प्रवर्त्तयेयुस्त

हिं गोश्चचो संख्यापरिमाणम्नचादेर्यदिति नौश्चवद्धन्निति वक्तव्यं त्र दृये च जग्रहणे नैव गतार्थत्वाञ्जेश्र्यं नोश्र
श्वं वनोपाददीता तेनाग्ने इंद्र वायो उदकमित्यत्र सवर्णदीर्घो न। नवेवोयवायावद्भ्यनेन तस्य बाध्योस्त्विति वा
च्यां अयादयो हि येन नाप्राप्तिन्यायेन मध्येपवादन्यायेन वायण एव बाध्यकृतया अग्न आयाहीत्यादौ चरि
तार्था अग्ने इंद्रमित्यादौ परेण दीर्घेण बाध्येरन्। अंतरंगोपि दीर्घः अविषयवमात्रापेक्षत्वात्। तथा अग्ने एतीति ए
उः पदांतादिस्येतन्ना आत्स्य प्रमायेत्यत्र तु इं। मालाभिरित्यत्र ऐस्त्वम्। याते त्यादेव तोऽपोना। वावातरति वाचो
निमित्तमित्यत्र चम्प्रलक्षणेति न्यतौ नेति दिक्। तुड्विधिलादेशविनामे तु प्रतिनिषेधं। तथाहि हि इच्छ ग्रहणमपनी
यतस्मात् तुडित्येव सूत्रं कर्तव्यं। नवैव मान्तपुरित्यत्रैव आट तुरित्यादव पि तु ट्प्रसंगः अन्योन्ते ख स्य नियम
मार्थत्वात्। नियमस्य सामान्यापेक्षः अकारोपधस्य यदि भवति अन्योन्ते देवन तु आट स्यादेरिति। यदि तु अस्मा

ति मात्रं निवर्त्यं स्यान्न हि नाम स इत्येव ब्रूयात्। रो ज इत्यत्र स्वतंत्रा स्वतंत्र साधारणी जातिरनुवाचे विधेये च विवक्षि
ता। एकदेशस्यैव पृथग्विधि पर्यायोगात्तद्वारा सकारस्यैव जकारादेशः फलति। स्वतंत्रवर्णवृत्तिजातेर्नायं निर्देशः
किं तु संशांशिसाधारण्या एवेत्यत्र नोपकं तु लुठिच रूपः तास्विव रूपः सदुपध्याद्वा रूपिचव ते इति नि
र्देशात्। पद्वा। रूप उः रः जः इति छेदः रूप इति लुप्तषष्ठीकं पदं। तद्वतंत्रेण व्याख्यायोज्यं। रूपयोर्दिक रेफ स्तस्य जः।
रेफ रूपे संकारस्यावयवो यो रेफः स दश इति यावत्। तस्यैव जकार इति तेन वृत्ती रूप्यत इत्यादि सिद्धं। ईदृशपद
विभागप्रदर्शनपरभाष्यादेव रूपे इति सूत्रपाठस्य ग्रामादिकत्वं निर्णीयते। तदेवं लुद्विधिनादेशयोः समाहितं। वि
नामो नतिः। तत्र क्ष लं वो नं प्रातिशाख्ये। नतिर्दन्त्यस्य मूर्धन्यभाव इति। प्रकृते तु नस्य णत्वं नतिः। तत्रेदं प्रतिविधानं।
छुंदस्याद वग्रहादित्यत्र योगविभागः कार्यः सतः सतः परस्य नस्य णः स्यात्। गणेति। वणेती त्यादि। ततः छंद राम

स्यवग्रहणात्। सतद्धत्येव। पितयाणंप्रुम दित्यादि। नन्वेवमपितपरकरणमित्तिदुणमित्यादो णत्वं नस्यादितिचे
५५ त्। एवंतर्हि जत्वविध्याव्रेहापिरषाभ्यामितिरेफतस्तदृश भागसाधारणीजातिर्निर्दिश्यतोक्षुभ्नादिषुतृन्नोतिश
ब्दपाठाल्लोपकात्। नवपरयाऋमत्याव्यवधानं। व्यवायेपीतिविभज्यसामान्येन व्यवायेपिणत्वविधानात्। न
चैवं कृतेनेत्यादावतिप्रसंगः। अट्कुप्वाङ्नुम्भिरितिनियमात्। आक्षरसमाम्नायिकैस्तत्वत्यायितैर्वा व्यवायेयदिभ
वतितर्हितैरेवेतिनियमसूत्रस्यार्थः। यद्वातृन्नोतिशब्दपाठेनहेतपोत्प्रश्नास्तृणमित्यादिनिर्देशेनवर्णैकवर्ण
कास्यणत्वमेवज्ञाप्यतेलाघवात्। एवंहिव्यवायेपिइतियोगविभागोपिनकर्तव्यो भवतीति। भाष्येतुवर्णैकदेशावर्ण
ग्रहणेनगृह्यंतइतिद्वितीयोपिपक्षः समर्थितः सतुबहुप्रतिविध्येयत्वेनगौरवभयान्नेहप्रपंच्यते। ननुयदिवर्णैकदे
शावर्णग्रहणेनगृह्यंतेतर्हिकुक्कुटःपिप्पलीपितृमित्यादौ संयोगसंज्ञा न स्यात्। अखंडस्यमात्राकालस्यकॢप्तत्

शा० कौ०

५५

55

इत्यस्य एकहल्त्वात् । तदवयवयोश्च हल्त्वग्रहणेनाग्रहणात् । नन्वेवं उरस्यानुपदेशात्कथं हल्त्वमिति चेत् । मा भूत्तर्हि

तदपि । अवयवानां हल्त्वं तु कुतः संख्यातासंवत्सरः सं ज्यो क इत्यादौ तु एकवर्णानामपि हल्त्वं भविष्यति । अपरं तूपदिष्टे

र्ग्रहणात् । तदवयवयोस्तु हल्त्वं न स्यादेव । ततश्च संयोगसंज्ञाविरहे ततः पूर्वस्य गुरुत्वाभावे प्लुतो न स्यादिति । अत्रा

यो हुः । व्यंजनमर्धमात्रमेव । आम्नाय ग्रहणे तु तुल्यरूपं द्वयोरेकत्वभ्रमः । इदं च शिक्षसमाचारात् प्रक्रियादशायामेव

स्वयंस्वीकार्यं परमार्थदशायां तु पदेन वर्णविघंते वर्णे अवयवा न वा । कथा सद नाम सत्यं तं प्रविवेको न कश्चनेति वा

क्यपदीयोक्तरीत्या स्फोटं सिद्धांतयतां कास्य पूर्वपक्षस्यावसरः ॥ ॥ हयवरट् ॥ ॥ हकारो यं द्विरुपदिश्यते । यदि तु

परत्रैवोपदिश्येत । अडभ्र हश्च इण्ग्रहणेषु न गृह्येत । ततश्च अर्हेणत्यत्राड्व्यवायेपीति णत्वं न स्यात् । महान् हि इति

स्थिते महां हि इति न स्यात् । अत्र हि दीर्घादटि समानपाद इति रुः । आतोटि नित्यमिति अनुनासिकः । भो भगो अघो अपू राम

५५

वस्येति यत्वं। हलि सर्वेषामिति यलोपः। तत्राप्यशीत्यनुवर्त्तत इति वक्ष्यते। आल्लले हसतीत्यत्र हशि चेत्यु
त्वं न स्यात्। तथा लिलिहिढ्वे लिलिहिध्वे इत्यत्र विभाषेट इति मूर्द्धन्यविकल्पो न स्यात्। तत्र हि इणः षीध्व
मिति सूत्रादिण इत्यनुवर्त्तते। तदेवं अझि अशि हशि इणि चेति चतुर्षु ग्रहणं प्रथमोपदेशस्य फलमिति स्थितं।
यदि तु परत्र नोपदिश्येत। वलः हलः झरु झशाल ग्रहणेषु न गृह्येत। ततश्च रुदादिहि स्वपिहीत्यत्र रुदादिभ्यः सार्व
धातुके इति वलादिलक्षण इण्न स्यात्। क्षिह्वी तो। क्षिहित्वा क्षेहित्वा। सिक्षिहिषति सिक्षेहिषति। इत्य
त्र रलो व्युपधादिति कित्वं न स्यात्। अदाग्धां अदाग्धमित्यत्र घत्वस्यासिद्धत्वाद्धकारादझलः परः सिजि
ति। झलो झलीति न वर्त्तेत। अधुक्षत् अलिक्षदित्यत्र शल इगुपधादनिट इति क्सो न स्यात्। तस्मात्सूत्रत्याहारा
णां चतुर्षु ये प्रथमोपदेशस्य चतुर्षु ये चाद्धितीयोपदेशस्य फलमस्तीति स्थितं। स्यादेतत्। रेफस्य परकार्यालि

प्राप्नुवंति। तद्यथा। मद्रह्रदे मद्रह्रद इत्यत्र अचः परस्य कारणलरस्य यर इति विधीयमानं द्वित्वं न हलस्त्रीत्यादे
यकारस्यैव प्राप्नोति। नच रोरीति लोपः खरूकरः लोपं प्रति द्वित्वस्यासिद्धेः। हलोयमामिति लोपस्तु वैकल्पि
क इति वक्ष्यमाणत्वात् पक्षे रेफद्वयं श्रूयते। नच व्यंजनपरे कस्थाने कस्य वा उच्चारणे विशेषो नास्तीति असि
द्धवस्तत्रैभाष्यकृता वक्ष्यमाणत्वान्नायं दोष इति वाच्यं। सूक्ष्मत्वाद्दुर्लक्षो विशेष इति तदर्थात्। नतु सर्वथावि
शेषविरहोऽभिप्रेतः। अत एव हलोयमामित्यादि शास्त्रवैयर्थ्यापत्तेः। तथा च नुर्मुख इत्यादौ यरोऽनुनासिके
ऽनुनासिको वेति पक्षे णकारः प्रवर्त्तेत। स्थानसाम्यात्। कुंडं रथेनेत्यादौ वा पदांतस्येति पक्षे रेफः प्रवर्त्तेत। रेफो
ष्मणां सवर्णा न संतीत्येतद्विजातीयः सवर्णो नास्तीत्येवं परं। स्वस्य स्वयं सवर्णो भवत्येवातुल्यास्यप्रयत्नात्।
रो रीति लोपस्तु नास्ति। तं प्रति परसवर्णस्यासिद्धत्वात्। अपवादित्वादनुनासिकपरसवर्णनिवृत्तये यवाभ्यां

पूर्वत्र रेफो ऽनुकृष्येत। हरयवट् इति। तर्हि रलो व्युपधादित्येतद्वकारान्तेष्वपि प्रवर्तेत। ततश्च देवित्वा दिदेविषतीत्यत्र पक्षे
गुणो निषिध्येत। ननु अव्युपधादिति छित्वा अवकारान्ताद्व्युपधादिति व्याख्यास्यत इति चेत्। एवमपि गोप्येरः पचेरन्नित्या
दौ लोपो व्योरिति न प्रवर्तेत। रेफस्य वल्यनन्तर्भावात्। रलोति वक्ष्यामीति चेत्। हयगतौ। हय्यादित्यादौ यकारे ऽतिप्रसंगः। ननु
यथाश्रुत एव हल्सूत्रे र्वलीति सरेफं पदं छित्वा रेफे वलि चेति व्याख्यानान्नोक्तदोष इति चेत्। एवमपि इको रणि विसंयोगादेरा
तो धातोरेव ततः उदात्तरणो हल्पूर्वात् इग्यणः संप्रसारणमित्यादिक्रमेण यणग्रहणानि सर्वाणि रेफेण ग्राह्याणि स्युः।
न चैतावतापीष्टनिर्वाहः। इको रणीत्यत्र संख्यातानुदेशेन इकारस्य रेफः। उकारस्य यकारः। ऋकारस्य वकार इति वक्रू
पप्रवप्रसंगात्। ननु यथाश्रुतेऽपि यथासंख्येन निर्वाहे दुरुपपादः। तथा हि। विधीयमानतया यवलाः सवर्णं न गृह्णन्ती
ति वत्वा रस्तावद्यणः। गुणो नाम भेदकतयानुनासिकसंग्रहेऽपि एषां ग्रहणेन विरहत्। इकस्तु सवर्णग्रहणात्सङ्षष्टिः। न

शा० कौ०
५७
57

× यथाश्रुते तु द्वित्वादिर्दोष एवं यं दुर्वारमिति। अत्रोच्यते रेफस्य विशेषतः श्रुतेन हि लं प्रतिनिमित्तत्वेन सामान्यतः श्रुतं कार्यित्वं बाध्यते। ५ ×

वषट्वषडिति रूपस्थापकानां रकृश्च वाख्यानामिकारादीनां चतुर्णामस्त्येवेति वाच्यं। तृतीयचतुर्थाभ्यामकाररकारा
भ्यां प्रत्येकं तस्या एव त्रिंशत उपस्थितौ सत्यामृकारे रेफादेशस्य सकारेव लकारादेशस्य दुर्वारत्वात्। तस्मात्स्था
नेंतरतम इत्यनेनैव प्रकृते निर्वाहः। यथासंख्यसूत्रं तु नंदिग्रहिपचादिभ्य इत्यादिरूपयोक्ष्यत इत्येव निष्कर्षः। त
थाच इको रणिति न्यासे पि तेनैव निर्वाहोस्त्विति चेन्न। वैषम्यात्। यथाश्रुते त्वविरोधात् परिभाषाद्वयमपि इ
कोयणचीत्यत्र प्रवर्त्तते। इको यथासंख्यमन्तरतमो यण् स्यादिति। रणिति न्यासे तु परिभाषयोर्विरोधात् परत्वे
न यथासंख्यमेव प्रवर्त्तेत। तस्मादनुचितो रेफस्य स्वस्थानादपकर्षः। यथा ब्राह्मणेभ्यो भोज्यं तां माठरकौण्डिन्यौ परिवे
विष्टामिति विशेषतः श्रुतेन परिवेषणेन माठरकौण्डिन्ययोः सामान्यतः प्राप्तं भोजनं बाध्यते तद्वत्। यद्यपीह लक्ष्यल
क्ति भेदे नोभयं संभवति तथापि सत्यपि संभवे सामान्यतः प्राप्तं विशेषप्राप्तेन बाध्यत इत्यभ्युपगमान्न दोषः। एवं वा

राम
५७

वोरहाभ्यामितिसूत्रे यरइति रेफभिन्नपरमेवेति स्थिते ऽनचि चेत्यत्रापि तथैव। अथाधिकाराश्रयणे
तु। तेन हर्यनुभव इत्यादावपि रेफस्य न द्वित्वं। नन्वेवं दध्युदकादौ यणः स्याद्द्वित्वे न तः श्रुतेन स्थानित्वेन द्व
कां निमित्तत्वस्य बाध्यादिति चेन्न। तत्र लक्ष्यानुरोधेन व्यक्तिपक्षाश्रयणात्। व्यक्तिपक्षे हि प्रतिलक्ष्यमस
कृल्लक्षणं प्रवर्त्तते। यद्वा प्रतिलक्ष्यं भिन्नानां सर्वेषां लक्षणानां तत्रैकैव वारणमिको यणचीति। ततश्च
इकामपि तात्पर्यतो निमित्तत्वप्रतिपादनाददोषः। न चैवं श्रीशब्दस्यादावपि यणः प्रसंगः। व्यक्तिपक्षे विप्र
तिषेधे परमेवेति नियमबलेन तद्व्यक्तिविषयकशास्त्रस्यैव विरहकल्पनात्। एवं ऽपवादविषयेपिसु
श्रियाविसादेशे बोध्यं। परिहृत्यापवादविषयं तत्रोत्सर्गोभिनिविशत इति न्यायात्। जातिव्यक्तिपक्षयो च
लक्ष्यानुरोधाद्व्यवस्थया ऽऽश्रीयेते। इति यस्य शायामेवोक्तं। तस्मादित्युत्तरस्यापत्सु तरपदं एय इत्यादि
निर्देशास्त्रीह लिंगं। भाष्ये तु नेमो रहे कार्यिणो द्विर्वचनस्य किं तर्हि निमित्तमिमा वित्युक्तं। तत्र हकारग्रहणं द

ष्यां तार्थे। तस्य यवबहिर्भूततया यथा न द्वित्वे कार्यिता तथा परं तर्भूतस्यापि रेफस्येति। एवं चानुनासिकपरस्य
वर्णविधावपि स्थानेऽन्तरतमपरिभाषासंस्कृतौ स्थानप्रयत्नाभ्यामान्तरतमे एतन्मुरादिः त्वङ्करोतीत्या
दौ क्वचिद्वर्ग्याववकाशो ऽनन्तरतमे प्रागुक्ते न प्रवर्त्तेतो जातिपक्षाश्रयणादेवेति संक्षेपः। अत्र वार्त्तिकं। अयो
गवाहानामट्सु णत्वं शर्षु जश्भावषत्वे। अविशेषेण संयोगोपधासंज्ञा ऽऽत्वद्विर्वचनस्थानिवत्त्वनिषेधा
इति। अस्यार्थः। अविद्यमानो योगः प्रत्याहारेषु संबन्धो येषां ते ऽयोगाः। अनुपदिष्टत्वादुपदिष्टेष्वग्रहीतत्वा
च्च प्रत्याहारसंबन्धशून्या इत्यर्थः। वाहयन्ति निर्वाहयन्ति प्रयोगमिति वाहाः। अयोगाश्च ते वाहाश्चेति कर्मधारयः।
अनुपदिष्टत्वे उपदिष्टेष्वग्रहीतत्वे च सति श्रूयमाणा इत्यर्थः। ते च विसर्जनीयजिह्वामूलीयोपध्मानीयानुस्वार
यमा इति भाष्यं। एतच्च सति सवाच्चति स्वेति विहितयोरनयोस्तयोरप्युपलक्षणं। तथा च तुल्यास्यसूत्रे भाष्यं।
तयोरवृत्वं वक्ष्यामीति। तत्फलं तु तत्र वक्ष्यते। तत्र यमानां लक्षणं अनुनासिकसंज्ञासूत्रे प्रपंचयिष्यामः। एषां

मद्भूस्यपदेशः कर्त्तव्यः। णत्वं फलोउरः केणाउरः फ्केणाउरः पेणाउरः पेणा। अट्कुप्वायद्दति णत्वे विसर्जनीय
जिह्वामूलीयोपध्मानीयव्यवायेपि सिध्यति। नायमद्भाताघर्थकः। सोपदादावितिसत्वप्रसंगात्। किंतु उरः काय
तिउरःपातिइतिविग्रहः। कैयटे। पारक्षणे। आभ्यामातोनुपसर्गेकः। कुष्वोः कःपौचेतिवकारस्याक्षिको विसर्गः। न
चैवमपिगतिकारकोपपदानां प्राक्सुबुत्पत्तेः समासाभ्युपगमात् सोपदादावितिप्रवर्त्ततेतिवाच्यं। तस्यद्धिसेवो
धन क्रीतेत्यादिसिध्यर्थमनित्यतायावक्ष्यमाणत्वात्। पाशकल्पेत्यादिप्रणयनां प्रोभणां। अट्कुप्वाङिति सूत्रेनुम्
ग्रहणं न कर्त्तव्यं भवति। अत्रेदमवधेयं। अट्सु क्रियमाणउपदेशोऽकारानंतरमिकारस्याकृत्तमः। तेन इ एस्तुअ
नंतर्भावासयः स्तुशःस्तुइत्यादेर् इक्कोरित्यभिकृत्यविधीयमानमादेशप्रत्यययोरितिषत्वं न भवति। अस्तु वांतर्भा
वासंस्कर्त्तेत्यत्रानुस्वारादवःपरत्वमाश्रित्य सकारस्य द्वित्वं कैयटे नाष्टमे वक्ष्यमाणं संगच्छते। नचैवं हरिः करोती

धा॰ को॰
५६
59

स्यादाविकोयणचीति यणः प्रसंगः। विसर्गस्यासिद्धत्वात्। एवं हरिं पश्यतीत्यादावनुस्वारस्यासिद्धत्वं बोध्यं।
शर्षु वोपदेशः कर्त्तव्यः। उरभावलाघवप्रयोजनं। तथाहि वार्त्तिकमते उब्जः ऊर्जवदिति स्यात्तु रूपध्मानीयोपधः प
ठते। तत्र ऊर्जांज उब्ज ऊरुभीति उरभावेऽन्तरतम्याद्धकारादेशः। उब्जि ताउब्जितुं। शर्पूर्वपदेशाद्धिनांतरीयकत्वादेव
ऊर्जत्वमप्याप्नोति। भाष्यकारस्तु नैतन्मेने उपध्मानीयोपधत्वपक्षे उब्जिजिषतीति न सिध्यति। अभ्यासे बकारमा
त्रश्रवणप्रसंगात्। हलादिशेषेण जकारस्य निवृत्तेः। यदि हि पूर्वत्रासिद्धमद्विर्वचने इत्युक्तेः सबकारस्य द्वित्वं तदा
स्यादेव बकारस्य शेषः। अत उभौ साभ्यासस्येत्यनेनानित्यताज्ञापनाद्द्विर्वचनेप्यसिद्धत्वमाश्रीयते अजिढदित्यत्र
यथा तथाप्यभ्यासे उपध्मानीयस्य शेषे अभ्यासे चर्चेति जश्त्वेन बकार एव श्रूयेत। इष्यते त्वभ्यासे जकार इति प्रांचः
वृद्धिं पक्षे उपध्मानीयमात्रमभ्यासे श्रूयेत। तच्चोच्चारयितुमप्यशक्यं। जश्त्वं तु दुर्लभं। प्रकृतिवरं प्रकृतिवरद्वये
ती॰
स्तुनस्तु१

राम
५६

मेसिद्धांतयिष्यमाणत्वात्। उपध्मानीयेऽत्वस्यापि सत्वेन तावन्मात्रद्वित्वापत्त्याऽभ्यासे इकारदीर्घोभ्यात्। किं चास्
त्रपक्षेऽस्मात् घसिरूते उपध्मानीयस्य जश्त्वेऽसम्भुद्धाः सम्बुद्धा इति स्यात्। इष्यते त्वसम्भुजः सम्बुजः इति। नन्वत एव
कुघोरित्यधिकारे सोपदादावितिसूत्रे उपध्मानीयस्य वेति वार्त्तिकेन कवर्गपरत उपध्मानीयस्य सकारो विधीय
ते। ततो जश्त्वेन दत्वं भविष्यतीति चेत्। सत्यं। उपध्मानीयस्य वेति वार्त्तिकारंभ एव तु गौरवावह इति ब्रूमः। बकारोपध्मो
यमिति वृत्तिकारमते तु बकारस्य द्वित्वनिषेधः सम्बुजः इत्यादौ दकारादेशश्चेत्युभयमपि वचनेनैव साधनीयं स्या
त्। तस्माद् दकारोपध्मएवायं। असम्भुजः सम्बुजः इति यथा स्यात्। कथं तर्हि उज्झिता उज्झितुमित्यादि सिध्यतीति चेत्। न्ए
भुजन्भुज औपालुपतापयोरित्यस्मिन्कुत्वाभावनिपातनार्थे सूत्रे बकारो श्रावणे नानुमीयते। उब्जेरकुत्वविषये दका
रस्य भकारविधायकं बकारविधायकं वा वचनमस्तीति। तथानुमीयमानं वचनं भजदुब्जेरितिवा। बउब्जेरितिवा। उ

नयथापि स्तोः श्चुना श्चुरित्यस्यानन्तरं कल्प्यते उदः स्तोर्दकारस्येति यावत्। श्चुनायोगे झकारो जकारो वा भवतीति सूत्रा
र्थः उज्झेरिति किं। तज्झः। श्चुनेति किं। अभ्युद्गः। समुद्गः। इह हि चजोः कु घिण्ण्यतोरिति कुत्वे कृते श्चुनायोगो नास्ति। स्तोः
श्चुनेति पदद्वयोपजीवनार्थं चोक्तं स्तुत्वेऽप्येव कल्पनं युक्तं। अन्यथा बहुतरकल्पने गौरवं स्यात्। एवं चोज्झिजिषतीत्य
पि सिद्धं। नन्द्राः इति दकारस्य द्वित्वनिषेधात्। न च परत्वाज्झत्वं बलवत्। पूर्वत्रासिद्धे नास्ति विप्रतिषेधोऽभावादुत्तरस्येति वक्ष्य
माणत्वात्। अन्तरङ्गत्वाज्झत्वं बलवदित्यपि न। असिद्धत्वादेव। न च पूर्वत्रासिद्धीयमद्विर्वचने इत्यसिद्धत्वप्रतिषेधः। शं
क्यः। द्वित्वे कर्त्तव्ये सति हि स निषेधः। न तु द्वित्वनिषेधेऽपि। इह तु नन्द्रा इति सूत्रेण द्वित्वनिषेधे कर्त्तव्ये निर्बाध्यमेवा
सिद्धत्वमिति दिक्। अथवा मास्तु। वाक्यशेषानुमानं श्चुजन्मुज्झाविति निपातनादेव झकारोऽस्तु। न चैवमसिद्धता वि
रहाद्दकारस्यैव द्वित्वं स्यादिति वाच्यं। दकारोपधनिर्देशसामर्थ्याज्झिशब्दस्य द्वित्वे कृते ततो दकारस्य जकारप्र राम
६०

वृत्तेः। न चास्मिन्पक्षे ऽभ्युरु इत्यादावपि बकारप्रसंगः। अकुत्वविषये एव बकारो निपात्यत इत्यभ्युपगमात्।
नन्वेवं कुत्वविषये चरितार्थत्वात्कथं पकारोपदेशस्य सामर्थ्यमुक्तं। येन द्वित्वानंतरमेव बकारः प्रवर्त्ततेति चेत्।
अनभिधानादतोऽयमादिर्मास्तु। निपातनं चैवमविशेषेणास्तु। अभ्युरुः समुरु इत्येतन्नोभे रूपं किंतु उपसर्गद्वयपू
र्वकाऊमेरन्येष्वपि दृश्यत इति उ प्रत्ययः। व्युत्पत्तिमात्रं चेदं। रूढिशब्दत्वात्। समुरुकः संपुटक इत्यमरः। तदेवम
योगवाहानां शर्षूपदेशस्य जश्भावरूपं प्रयोजनं वार्त्तिकमतेऽस्ति भाष्यमते तु नास्तीति स्थितं। तथा षत्वमपि प्र
योजनं। सर्पिःषु यजुःषु। नुम्विसर्जनीयशर्व्यवायेपीति सूत्रे विसर्जनीयग्रहणं न कर्त्तव्यं भवति। शर्व्यवाय इत्ये
व सिद्धत्वात्। नुम्ग्रहणं तु शक्यमपि कर्त्तव्यमेव। नुम्स्थानिके नैवानुस्वारेण व्यवधाने यथा स्यात्। इह मा भूत्। पुं
स्विति। नुम्ग्रहणं हि स्वस्थानिकस्यानुस्वारस्य लक्षकं। अन्यथाऽसंभवात्। न हि इणः कवर्गाभ्यामुत्तरः सकारो

६
शा०कौ०
६१
61

नुमा व्यवहितः षत्वविध्यौ संभवति। अनुस्वारे षत्वस्यासिद्धत्वादित्याहुः। अस्तु वा स्थानिवद्भावेन नुम्त्वं तथापि स्वा
श्रयस्यानुस्वारत्वस्यापि सत्त्वाच्छत्वेनेव सिद्धे नियमार्थतायुक्ता। नियमश्च सजातीयापेक्ष इति अनुस्वारेण व्यवा
ये वेऽभवति तर्हि नुमैव न त्वन्येनेति फलितं वस्तुतस्तु अतिदेशं प्रति अनुस्वारस्यासिद्धत्वादतिदेशएवेह दुर्लभः। सु
हिन्सु इत्यादेर्विधायकत्वसंभवे नियमकत्वानुपपत्तिश्च। तथापि लक्ष्यानुरोध्या लक्षणे त्वेव शरणं। यथा द्रु
रु सूत्रे। तत्र प्रेन्वनादेर्णत्वं मा भूत् प्रोम्रणादेर्वस्यादित्येवमर्थं लक्षणे ति वेत्। इहापि सुहिन्सु पुंस्वित्यादेर्मा
भूदिति तुल्यं। णत्वविधाव अनुस्वारमात्रेण लक्षणं बत्वे तु नुम्स्थानिक एवेत्यन्यदेतत्। अस्मिंश्च पक्षे शर्पूप
देशेऽपि रुत्वमिव ह्रस्वत्वयत्वे अपि नान्तरीयकत्वादेव सिद्धे तत्फलं तूत्तरवार्त्तिकव्याख्यानावसरमनंतरमेव स्फु राम
टीभविष्यति। तथा स्वरत्वमपि। तेन कुप्वोः कः पौ चेति सूत्रान्तर्गतो विसर्गः सिद्धः। एवं च सोत्रनिर्देशेनैवोक्तवार्त्तिक ६१

स्यार्थोन्ताप्यत इति बोध्यं। अनेन सौत्रं विसर्गग्रहणमेवोपष्टभ्यते उपदेशं प्रत्याचक्षाणं यथाश्रुतमहूस्य, पदेश पदं व्यक्ति
ग्रथं व्याचक्षाणः परास्ताः। अहूस्य उपदेशेन अलत्वात्तयोर्नमेपि हलन्त्यपरत्वाभावात्। तस्य जस्य च वक्ष्यमाणत्वा
त्। नन्वाद् स्वेवयकारे तस्मु उपदेशान्ते त्याम इति वाच्यं। तथा सति पयः स्वित्यादाविणः परत्वेन षत्वापत्तेः। अस्तु त्वा
सिध्यासमः स्युटो यत्र त्यकैय टादिग्रंथविरोधापत्तेश्चेति दिक्। अविशेषेणेत्यादिवार्त्तिकस्यायमर्थः। यत्र यत्र प्रदेशे
प्रयोजनं दृश्यते तत्र तत्रोपदेशः कर्तव्यः। प्रयोजनानि तु संयोगसंज्ञादीनि पंचेति। तथा हि। वार्त्तिकमते ज्रुके रूप
ध्मानीयोपध्मतया उपध्मानीयस्य हलन्त्यसंज्ञां विना संयोगसंज्ञा न सिध्यति। न स्वत्वसिद्धौ ततश्च संयोगे गुर्विति गु
रुसंज्ञाया अपि विरहात् ऊँ अक इत्यत्र गुरोरनृत इति प्लुतो न स्यात्। तस्मात् प्लुतगुरुसंज्ञासंयोगसंज्ञा हलन्त्यसंज्ञानामुत्त
रोत्तरसापेक्षतया प्लुतसिद्ध्यर्थं हलन्त्यसंज्ञा एषितव्या। तदेतदभिप्रेत्योक्तं संयोगसंज्ञाप्रयोजनमिति। तथा उपध्मास

त्रापि प्रयोजनं। निष्कृतं दुष्कृतं। इदुदुपधस्य चेति षत्वं यथा स्यात्। भाष्यकारस्त्वाह। इदुदुपधस्य चानिकोयो वि
सर्ग इति व्याख्यानान्नेदं प्रयोजनं। उपधाग्रहणप्रत्याख्यानाद्वा। इदुद्भ्यां परस्य विसर्गस्येत्येवेष्टसिद्धेरिति।
अजो त्यविधिश्च प्रयोजनं। वृक्षस्तरति। विसर्जनीयान्तस्य पदस्य सत्व इति पक्षे ऽन्त्यस्य सत्वं यथा स्यात्। पदस्य यो
विसर्जनीय इति व्याख्यानान्निर्दिश्यमानस्येति परिभाषया वा सिद्धत्वादिदमपि न प्रयोजनं। द्विर्वचनं च प्रयोजनं। उ
रः कः। उरः पः। अनचि चेति अचकारस्य परे विधीयमानं द्वित्वं सिद्धं भवति। तथा स्थानिवद्भावप्रतिषेधोऽपि प्रयो
जनं। यथा उरः के। एत्यादौ ऽनुग्रा वाये इति एत्वं भवति एवं वृक्षो रक्षेनेत्यादावपि प्राप्नोति। स्थानिवद्भावो सकारस्य।
तत्रानचि चेत्यादाविति प्रतिषेधोऽत्वे सति सिध्यति। न च पूर्वत्रासिद्धे न स्थानिवदिति प्रतिषेधोऽस्त्विति वाच्यं। न पदान्तस्व
त्रशेषभूतस्य तस्य अचः परस्मिन्निति तद्विषयकत्वात्। स्थानिवद्भावं प्रतिज्ञिपादीस्छू सिद्धतया न्यायसिद्धं तदिति प

सेतुनेदं प्रयोजनं। ञरः केणेति णत्वं संस्कर्त्तेत्यत्र सकारस्य द्वित्वं वाधिकं प्रयोजनं बोध्यमिति दिक्। यद्यपि सर्वमिदं अ
टूश्रारोरूपदेशे न सिध्यत्येव तथापि वार्त्तिकाक्षररवनायाद्वित्वापि संभव इति भावः। लण्। अत्राकारोनुनासिकः प्र
तिज्ञायते। न तु हकारादिष्विवोच्चारणार्थः। तेनो रणरपर इत्यत्र रप्रत्याहारग्रहणं भवति। प्रत्याहारग्रहणे ज्ञाप
कस्तु सकारककारयोः सवर्णे विधिरिति वार्त्तिकनिर्देशः। ननु अइउण् इत्यत्रानुबन्धो णकारः। स एवेहानुबध्यते।
तेनाणग्रहणे किं णग्रहणेषु पूर्वेणपरेणवेति संदेहः प्राप्नोति। तस्मादसंदेहाय इह अनुबन्धान्तरमेव कुतो न कृत
मिति चेन्न। व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति परिभाषां ज्ञापयितुमनुबद्धस्यैव पुनरनुबन्धात्।
ञमङणनम्। ञ म ङ ण न म्। अत्र मकारोनुबन्धो भाष्ये प्रत्याख्यातः। स हि प्रत्याहारत्रये उपयुज्यते। अम्यम्ङमिति। तत्र
यं ञकारेणैव निर्वहति। तथाहि पुमः खय्यम्परे इत्यस्तु। नव ञकारमकारपरः खयस्ति येनातिप्रसंगः स्यात्। तथाहि

१ नच मकारभकारौ मकारभकारपरौ स्तः । हलउत्तरयोस्तयोः संभवे तु द्वरोमरिद्वतिलोपेन भाव्यमेव । तथा ङ् ञोः ह्रस्वात् रचि ङ् ञ् मुण्नित्यमिति पाठ्यम् ॥ १

लोपशां यञि लोप इत्येव पाठ्यं नच मकारभकारौ पदान्तौ स्तः । उक्तेर्लमेस्त्वक्लिपितौ स्त एवेति चेन्न । उक्तेर्दे
पघतया संयोगांतलोपे सति उदिति रूपाभ्युपगमात् । लमेस्तु अस्त्वविधानात् । नन्वेवमपि आगमिनस्त्रयो
ङ ण नमेभ्यः परे अचः आगमास्तु पंचेति संख्यातानुदेशो नस्यादिति चेन्न । यथासंख्यमित्यत्र हि विध्यर्थप्रमि
तिवेलायां निर्दिश्यमानगत संख्यासाम्यमाश्रीयते । न तु लक्ष्यसंस्कारवेलायां प्रयोगगतं । तस्मान्मास्तु मका
रोनुबंध इति स्थितं ॥ ॥ घढधषभ् । जबगडदश् । खफछठथचटतव् । कपय् । शषसर् । हल् ॥ इति माहेश्वरा
णि अक्षरसमाम्नायसूत्राणि । अत्रायं संग्रहः । एकस्मान्ङ ञ ण वटा द्वाभ्यां षस्त्रिभ्य एव कणमाः स्युः । ज्ञेयौ चयौ
चतुर्भ्यो रः पंचभ्यः शलौ षड्भ्य इति । अस्यार्थः । ङ ञ ण व टा एकस्मात्परे ग्राह्याः स्युः । तथाहि ङकार एकारादेव परो
ग्राह्यः । एङि पररूपमिति यथा । ननु विडिदादिभ्यो ङस्य निवृत्तिः स्यादिति भ्योङ् इत्यकारे एव ग्रहणमस्त्विति चेन्न । अ

दिरंतेनेत्यत्राणदिसवर्णस्यचेत्यतोऽप्रत्यय इत्यनुवृत्तेः। अतएव रोः सुपीति न प्रत्याहारग्रहणं। सुपि चेत्य
त्रतु अप्रत्यय इति प्रतिषेधो नास्ति। यस्मादाविति विशेषणात्। उत्तरत्र बहुवचने झल्येदिति विशेषणात्। सु
प्तिङंतं पदमिति त्यत्र तिङ्साहचर्यात्। अण् सददङ्हलोदित्यत्रतु अङ्ग्रहणसामर्थ्यादपि प्रत्याहारग्रहणं
न भवति। अङादेहलादेर्वेति हि व्याख्याने अङ्हलोरिति व्यर्थमेव स्यात्। द्विविधा एव हि ङितः प्रत्ययाः
अङादयो हलादयश्च। व्यतिशब्दे इत्यत्रतु ङित्वमेव नास्ति। आटाससे कादेशस्य स्थानिवद्भावेन अङादित्वा
च्च। सहवोङीत्यपि न प्रत्याहारः सकारान्तेषु सच्छन्दृतामिति गुणविधानाज्ञापकात्। सनि च इङः श्चेति न प्रत्या
हारः इको झलिति किद्विधानात्। अजन्त गमां सनीति विधानाच्च। इङः तानां सनि गम्यादेशे हि सति इन्द्रह
तस्त्र द्वयं निर्विषयं स्यात्। परिमाणख्यायां सर्वेभ्यः इङश्चेत्यपि न प्रत्याहारः वैयर्थ्यप्रसंगात्। तथाहि। इ

श्रा० कौ०
६४
64

कारांतेभ्य एदवामाव्यां उकारांतेभ्यस्त्वदोदविस्त्यांवा । ऌकारांताः संत्येव न । एडंतानामपि अनैमित्तिकेन आत्वे
न प्रत्ययोत्पत्तेः प्रागेव भाव्यं । अतः प्रत्ययोत्पत्तिवेलायामेडंतान संत्येव । सदंताः परसवर्णविष्यंते । तत्र उदित्वे
व लोपवाद्भूयात् । वस्तुतस्तु सामान्यलक्षणेनैव सदंतेषु वृत्तः सिद्धत्वा सूत्रमेवेदं न कुर्यात् । अथो व्येतादउः
श्वेत्यादिं भस्त्रा मध्यादि वर्णो वर्णं तेष्वेव अजव्यां सह वैकल्पिको घञ् समाविष्टाविति । तदपि न । एवं हि
सति घञपोर्विधावेव वाग्रहणं कुर्यात् । कीदृश्नां णविति न प्रत्याहारः । कीर्त्योः पृथग्ग्रहणं वैयर्थ्याप
त्तेः । न च ऋकारांतानां मध्ये एतयोरेवेति नियमार्थं पृथग्ग्रहणमिति वाच्यं । एवं हि ऋक ऋत्येव ब्रूयात् । एऊतानां
सामान्यलक्षणेनैव आत्वस्य सिद्धत्वात् । ऋदूत्यार्योदित्यपि न प्रत्याहारः । अदिण्ण साहचर्यात् । तस्मात्सिद्धं
उकार एकस्मादेवेति । तथा अकारे प्येकस्मादेव । अतो दीर्घोयमीति । तथा अऋऊणि त्वेषण कारे प्येकस्मादेव । अ
णितियथा । अधेणः बीध्वमित्यादाविण प्रत्याहारो प्यनेन कुतो नेति चेन्न । अपविसु धातु भुवां ष्वो रित्यत्र ऋका

राम
६४

ऐकारयोः स्वरूपेण निर्देशात्। अन्यथा हि संहितायां मात्राभाववात्सदृशे देश्यर्द्धमात्राभाववादेण इत्येव श्रूया
त्। व्याख्यानाच्च पूर्वेण न तु परेण ग्रहीष्यते। व्याख्यानं च सिद्धान्तेपि शरणं। ह्वोरित्यपि हि निर्देशे किं ह्रस्वयोर्ग्रहण
मुत दीर्घयोरुत यकारवकारयोरिति संदेहः स्यादेव। एवं एच इग्घ्रस्वादेश इति सूत्रे इण इत्येव प्रतिपत्त्याभावा
र्थं वक्तव्ये इग्ग्रहणमपीह लिंगं। इणग्रहे हि तत्र यथासंख्यप्राप्तिरेव नेति न तत्परिहाराय यतितव्यमिति दिक्। एवं
वकारः। नम्भ्व्यप्रशानिति। एचोयवायाव इति सूत्रे अवू इति न प्रत्याहारः। आयादिह साहचर्यात्। एवं टकारेप्ये
कस्मात्। अट्कुप्वाङ् इति। झभ्यां षः। एकाचोबशोभष् झषन्तस्य स्ध्वोरिति यथा। ककारस्त्रिभ्यः। अकः सवर्णे। इको यणि।
इस्सुसुक्तांतात्क इति यथा। णलि त्यत्र त्योर्णकारोपि त्रिभ्यः। अणुदित्सवर्णस्येत्येक एवाण्। इणः षीध्वमित्यादयः सर्वे
इणः। इको यणित्यादौ यण्सु वा। तत्र यणतावत्पूर्वेण न संभवत्येव। इणं तु संभवन्नपि ज्ञापकात्यक्तः। अणस्तु उभाभ्यां

ग्रं०को०
६५
65

ग्रहणे स्थितिः किं पूर्वेण वा परेणेति वीक्षायां ग्रहणकशास्त्रे परेणैव। अन्यत्र तु पूर्वेणैवेति सिद्धान्तः। उक्तं हि
व्याख्यानतो विशेषप्रतिपत्तिरिति। न हि परेश्च घाङ्कयोरित्यादौ व्याख्यानादन्यन्नियामकमस्ति। किं वा। अण्
ग्रहणं नितावत्त्वं वा। उरण्रपरः। अणुदित्सवर्णस्य। ढ्रलोपे पूर्वस्य दीर्घोऽणः। केऽणः। अणोऽप्रगृह्यस्येति। तत्र उरण्
रपर इति तावत्पूर्वेण। अतनड्डतो दितिधातु ग्रहणं ज्ञापकात्। तद्धिमात्रग्रहणमित्यादि व्याख्यास्यर्थं क्रियते। परे
णैव ग्रहणे नामीति दीर्घस्यापि रपरत्वापत्त्या व्यावर्त्याप्रसिद्धिः। ननु चिकीर्षतीत्यत्र अज्झनगमामिति दीर्घे रप
रत्वे च सति उपधायाश्चेतीत्वमेषितव्यं। तद्धन्मात्रग्रहणमित्यत्रापि प्रसंगेन व्यावर्त्तकतमा उत्तरार्थं धातुग्रहणं
भविष्यतीति चेन्न। एवं हि सत्युत्तरत्रैव कुर्यात्। इह करणं ज्ञापकमेव। तथा च वक्ष्यति। उदुष्ठ्य उत्तरार्थं तु इहं किं
चित्रपोऽस्तीति। किं वा। अण्ग्रहणसामर्थ्यादपि पूर्वेणैवायं। यदि हि परेण स्यात्। उरजित्यच्ग्रहणमेव कुर्यात्। राम ६५

कृतिः कृतं प्रकृतं न्द्वंद्वः पाहि मा॰दद्गुणमित्यादौ ऽऽद्युदात्तानुदात्तस्वरितानुनासिकदीर्घ्वग्रहणं रपरतायाः परे णग्रह-
ग्रहेणापादयितमायास्तावतापिलाभात्। कर्त्ताकारक इत्यादौ गुणवृद्धिप्रसंगे एवामवर्णस्य वाविशेषाद्रपरस्य
विकल्पेन प्रसंग इत्यपि ऽऽणग्रहणेन सिध्यत्येव। स्यादेतत्। कर्त्रर्थमित्यत्र ऋकोयणि रपरत्वे रेफद्वयश्रवणार्थ
मण्ग्रहणं स्यात्। नह्येतदण्ग्रहणेन सिध्यति। हलोयमामिति लोपस्तु वैकल्पिकः। झयो होन्यतरस्यामित्यतोन्यत
रस्यां ग्रहणानुवृत्तेः। अत एव ज्ञापकं ग्रहणकशास्त्रे णग्रहणं तद्धि संख्यातानुदेशः सरः यं यन्तो कमित्यादौ परसवर्ण
स्य सानुनासिकस्य परग्रहणेन ग्रहणादनविवेति द्वित्वे कृते पक्षे यवलानां त्रिकस्य सवर्णार्थं क्रियते। हलोयमामि
त्यस्य नित्यत्वे तु व्यर्थमेव तत्स्यात्। यद्यपि गुणनामभेदकत्वेनैव सानुनासिकयवलानां द्वित्वसिद्धेर्ग्रहणकशास्त्रे
ऽणग्रहणमेवोचितं न त्वण्ग्रहणं तथापि गुणभेदका इत्यपि पक्षं ज्ञापयितुमण्ग्रहणं। भेदकाभेदकपक्षयोश्च

श०कौ०
६६
66

जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्था। अत एव ब्रतसर्यत्सुदात्तनिपातनमित्यादि संगच्छते। अत एव वा
च्यनः आविभक्ताविस्त्यादावविदमस्त्यदाद्यत्वे वानुनासिको नेति वक्ष्यामः। यत्तु विकल्पानुवृत्तौ ज्ञापकांतरवर्णनं।
अनुवर्तते विभाषा शरोचि यद्वारयत्ययं द्वित्वं। नित्ये हि तस्य लोपे निषेधार्थो न कश्चित्स्यादिति। तत्तु भाष्ये दूषितं। तथा
हि। लोपस्य नित्यत्वे अचो रहाभ्यामिति द्वित्वे नारंभसामर्थ्यात्तद्बाधः। द्विविधा एव हि परः। यमो रश्चेति। तत्र हलो
यमामिति झरो झरीति च लोपे कृते द्वित्वं रथास्मात्। किं तर्हि तयोर्योगयोरुदाहरणमिति चेत्। यत्रांतरेण द्वित्वं व्यंज
नत्रयं लभ्यते। यथा आदित्यो देवतास्य आदित्यः। प्रत्तं अवत्तमिति। एवं स्थिते वर्तुर्थ्यत्रापि यदि द्वित्वं स्यात्तर्हि लोपो
न स्यादेव। ततश्च सार्थकः शरोचीति निषेधः। कथं विभाषानुवृत्तिं ज्ञापयेदित्यास्तां तावत्। सर्वथापि विकल्पानुवृत्तेः
स्थितत्वात्साक्षिकरेफद्वयश्रवणार्थं अणरग्रहणमस्त्विति। अत्रोच्यते। कर्त्र्यर्थमित्यादौ सत्यपि रपरत्वे रेफद्वयश्रव राम ६६

णं दुर्लभं। सेरीति लोपात्। न चैतत्र पदांतस्येति व्याख्यातुं युक्तं। उरण् रपर इत्यनेन ऌ। ऌतः रं चर्चापास्य ऋतेऌ। अपास्याः। इ
त्यादेरसिद्धिप्रसंगात्। न चाणग्रहणसामर्थ्यात्तल्लाभः। पूर्वेणापि ग्रहणे ऽनबाधेनैवोपपन्नेरितिदिक्। तस्मादनुग्र
हणसामर्थ्यादणग्रहणसामर्थ्याद्वा उरण्परइति पूर्वेणग्रहणमिति स्थितं। वस्तुतस्तु थालुग्रहणमेव ज्ञापकं। अ
णग्रहणस्य जाकृतिरित्यादेः लपरत्वाफलमित्यपि वक्तुं शक्यत्वात्। अणुदित्सवर्णस्य चाप्रत्यय इति तु परेणैव। उर्ऌ
दिति लिंगात्। तत्र हि कृतसंशब्देनेत्यस्मादुरादित्येतावता ऋतुऽः वद्ः अवाकृतदित्यत्र ऋकारस्य दीर्घस्यापि स्थाने ह्रस्वर
व यथा स्यादित्येवमर्थं तपरकरणं कृतं ग्रहणकशास्त्रे पूर्वेण ग्रहणे तु दीर्घस्य ऋकारस्य न स्थानित्वं न वादेशत्वं प्रसक्त
मिति व्यर्थं तपरत्वं स्यात्। नतु सत्यपि परेण ग्रहणे उर्ऋदित्यत्र तपरत्वं वक्ष्येव भाव्यमानेन सवर्णग्रहणप्रसक्तेरि
ति चेन्न। वक्ष्यति हि तत्र वृत्तिकारः। न चायं भाव्यमानोऽण् किं तु आदेशांतरनिवृत्यर्थं स्वरूपेणाभ्यनुज्ञायत इति। क

तेन तु तपरत्वे एतद्धलादेव दीर्घस्थाने भाव्यमानतापि लभ्यत इत्यन्यदेतत्। तस्माद्ग्रहणक शास्त्रेण परेणेति स्थि
तं। तस्माल्लं तु उरण्रपर इत्यत्र उरित्यनेन ऋकारस्य ग्रहणं इत इत्तो हृदेव पूर्वस्येत्यादे रपरत्वसिद्धिः। ढ्र
लोपे पूर्वस्य दीर्घोऽण इत्यत्रापि हलामणाम संभवो देवां तु विशेषाभावादगर्थमेवाल्ग्रहणं स्यात्। ततश्चा
त्येव सिद्धमित्यल्ग्रहणसामर्थ्यात्परेणैव। ननु वृद्धू उपमने अस्मात्तवि ऊदित्वादिड्भावे गुणे ढत्वधत्वष्टुत्वढलो
पेषु कृतेषु रेफस्य दीर्घस्थानसाम्याद्धकारे ढलोपस्यासिद्धत्वादुपधाया एवेतीत्वे पूर्ववद्गुणे वेढे इति यथास्यादिति
परेण ग्रहणं स्यात्। एवं तर्हि तृतीयेति निर्देशाल्लिङ्गात्परेणैव। परेण हि ग्रहणे हल इत्यत्राप्यस्ये वाण्ग्रहणं स्यात्तु
वृत्ते स्त्रोः संप्रसारणे कृते दीर्घः स्यात्। तथा ह्वादिषु वृढ शब्दस्य पाठोऽपि ज्ञापको वोध्यः। वृद्धू उपमने अस्मान्निष्ठा
यां ढत्वधत्वष्टुत्वढलोपेषु कृतेषु वृढ इति रूपं। दृत्यो ह्यादिश्चायं। उद्दृह रक्षः सहमूलमिन्द्रेति दर्शनात्। मूलमस्या

वहीति सूत्रे हरदत्तादिग्रंथे स्पष्टमेतत्। तुदादौ एतद्बलात् तरत्वेन पठ्यमानयोः तृ स्तृ स्तृ हिंसायामिति धात्वोरपि
निष्ठायां तृढः। स्तृढ इति रूपं बोध्यं। दृढः स्थूलबलयोरिति तु इडभावो नकारहकारयोर्लोपो निष्ठातकारस्य ढत्वं च नि
पात्यते न तु असिद्धकांडस्थढत्वादेरिह प्रवृत्तिरिति वक्ष्यते तेन परिवृढ इत्यपि परिदृढी कन्येत्यादौ लघुत्व प्रयुक्तो ए
रयादेशः व्यङ्भावश्च सिध्यतीति दिक्। तेन द्रढोपसूत्रे परेण ण्य हण पक्षेपि वढ दृढ स्तृढेष्वेवातिप्रसंगो न तु दृ
ढेपीति विवेकः। केण इत्यत्र परेण ण्य हलो गोः कानौ कागा ष्ठाप्यानत्काव तुङ्क मिति षत्वविसर्जनीययोरसिद्धत्वात् ह्रस्व
प्रसंगः। तथापीह ह्रस्वश्रुत्योपस्थितस्याचः ह्रस्वस्य अबाध्याय पूर्वेण भविष्यति। अबाधेनोपपत्तौ हि बाधो न न्याय्यः।
अणोऽप्रगृह्यस्येत्यत्र परेण सतिकर्तौ। अग्ने। वायो। पचे। पचो। मा। जो मा वक्षाणे मान्ह्। वक्ष वयते रप्रत्ययः। वक्षर्। अ
त्रापि प्राप्नोति। रेफवर्जिता अंतस्थाः सानुनासिकनिरनुनासिकभेदेन द्विधेत्युक्तत्वात्। तस्मादिह अप्रगृह्यस्येति पर्यु

दासादव एवानुनासिको बोध्यः। न चाण्ये हणस्सामर्थ्यान्नसिद्ध युक्तन्यायस्य बाधः। तस्य पूर्वेण लत्वप्रसक्तत्वात्। अत्र
नलोपस्याभावे स्थितत्वाद् वृक्षवृश्च् इति नैमित्तिके यदाह्यु दपादयत्। वृक्षं वृश्चतीति क्विपि कृते वृक्षवृश्च्मावश्च इति। णिविनि लो
पे च कृते वृक्षवयते र्विचि वृक्षवृड् इति भवति। क्विपि तु क्वौ लुप्तं न स्थानिवत् क्वौ विधिं प्रति न स्थानिवद् इत्युभयथापि स्था
निवद्भावनिषेधात् संप्रसारणप्रसंगे लोपो व्योर्वलीति लोपं बाधित्वात् तदपवादस्य ग्रहः प्रसंगस्य। विचि तु स्था
निवद्भावाद् वलनिमित्तो वलोपो न भवति। नन्वेवमपि वृक्षवृक् करोतीत्यत्र हलि सर्वेषामिति प्राप्नोति। न च स्थानिवद्भा
वः पूर्वत्रासिद्धे तन्निषेधादिति वेन्न सो भग इत्यतो ऽशीत्यनुवर्त्य अशि हलि तद्विधानादिति। न च वि वृपक्षेपि लि
वः प्राग्राविनं क्विपमेवाश्रित्य ऊठ् प्रसंजनीयः। अन्तर्भूतक्विबाश्रयतया अंतरंगे कर्तव्ये बहिर्भूतलिजपेक्षतया ब
हिरंगस्य टिलोपस्यासिद्धत्वात्। इदं त्विह वक्तव्यं। विवृपक्षेप्येकदेशविकृतस्यानन्यत्वेन वृश्चतिग्रहणेन ग्रहणं

ड्रश्चेति षत्वं दुर्वारं। न च श्लोपस्य स्थानिवत्त्वं। पदांतविध्यौ नेति निषेधात्। पूर्वत्रासिद्धे चेति निषेधाच्च। तस्मा
न्नायं व्रश्चतिः यपि तु वेति वीति वा। वृक्षं वेतीति वृक्षवीः वृक्षं वातीति वृक्षवाः। वृक्षस्यं वृक्षवं वा आचष्टे वृक्षव्। वि
च्। न लुङ्क्विप् ऊठ् प्रसंगात्। क्वौ विधिं प्रति स्थानिवत्त्वनिषेधात्। तथा च देवयते र्दिद्युरिति सिद्धं इति। न चैवमपि लो
पो व्योरित्यस्य प्रसंगः। स्थानिवत्त्वात्। न च पदांतविधित्वं। पदांतस्यैवाद्धि धीयत इत्यर्थात्। लोपस्य वा न वयवत्वात्। वि
भावितं वेदं भो भगो इति सूत्रे कैयटेनेति दिक्। यत्तु हलि सर्वेषामिति सूत्रे हरदत्तेनोक्तं। वृक्षवृक् रोतीत्येवं रूपः प्रयो
गो नास्त्येव अनभिधानात्। लण्सूत्रे न पदांता हलोऽणः संतीति भाष्यकारोक्तेः अनभिधानं निश्चीयत इति। तच्चिन्त्यं। ल
ण्सूत्र भाष्ये न पदांताः परेऽणः संतीति पाठात्। अप्रगृह्यस्येति पर्युदासात्। ययलेनाचामेव कार्यभाक्त्वादितरे कार्यभाजो
न संतीत्येवं परतया कैयटेन तद्विवरणाच्च। न तु वायमस्ति कर्तृ इत्युत्तरभाष्ये णस्य दूषितत्वाच्च। त्वदुदाहृतपाठे त्र

त्तरभाष्यस्योक्तिसंभवाभावात् । अतएव भोभगो इति सूत्रे भाष्यकारवृत्तिकारादिभिः सर्वैरपि वृक्षं वृ इत्युदाहृतं ।
स्वयमपीह तथैवोदाहृतमिति पूर्वापरस्वग्रंथविरोधो भाष्यवृत्तिकैयटादिसकलमहाग्रंथविरोधोऽपि ज्ञेयस्तत्प
भावश्चेति तिष्ठतु तावत्प्रकृतमनुसरामः ।। मकारोऽपि त्रिभ्यो ग्राह्यः पुमः खय्यम्परे । हलो यमां यमि लोपः । ङमो ह्रस्वा
दचीति । वकारश्चतुर्भ्यः । इको यणचि । इचएकाचोम् । एचोयवायाव इति । पूर्वौ तु ताभ्यामैजिति । यकारोऽपि चतु
र्भ्यः । अनुस्वारस्य ययि मयउञः । झयो होऽन्यतरस्यां । पुमः खयीति । रः पंचभ्यः । यरोऽनुनासिके । झरो झरि सवर्णे । ख
रि च । अभ्यासे चर्च । वा शरि । शकारः षड्भ्यः । भोभगो अघो अपूर्वस्य योऽशि । हशि च । नेड्वशि कृति । झलां जश् झशि । एका
चो बशो भष् । लकारोऽपि षड्भ्यः । अलोऽन्त्यस्य । हलि सर्वेषां । इड्वलादेः । रलो व्युपधात् । झलां जश्झशि । नलद्युपधादिति । अ
यं च चतुर्दशसूत्रीस्थैर्हलिङ्गिः संपन्नानां अष्टाध्याय्यां व्यवहृतानां प्रत्याहाराणां संग्रहः । तेन सुप्तिङादेरप्रत्या राम ६९

हारस्य अमंताइउण्सूत्रस्थणादिषु व्यवहृतस्य अम् प्रत्याहारस्य यमिर्अमंते च निर्दिश्यत इति व्याख्याभूत्तिना
व्यवहृतस्य तस्यैव वयो द्वितीयाः शरि पोष्करसादेरिति वार्त्तिककृता व्यवहृतस्य वय् प्रत्याहारस्य चाधिक्ये
प्यदोषः। संख्यानियमश्चायमुत्तरत्र एकचत्वारिंशतेव व्यवहारादध्यवसीयत इति बोध्यं। अत्र श्लोकवार्त्ति
कं। प्रत्याहारेऽनुबंधानां कथमज्ग्रहणेषु न। आचारादप्रधानत्वाल्लोपश्च बलवत्तरः। प्रत्याहारोऽक्षरसमा
म्नायः। तत्र येऽनुबंधाः तेषामज्ग्रहणेष्विल्लुपलक्षणे अजादिप्रत्याहारग्रहणेषु। कथं नेति। ग्रहणमिति शे
षः। आदिरंत्येनेति सूत्रेण हि। अकारमारभ्याच्कारान्तवर्णानां भवंती। अनु संज्ञामध्यस्थत्वाविशेषादिकारा
दीनामिव णकारककारङकाराणामपि स्यात्। ततश्च दधिणकारः। दधिककारः। दधिङकार इत्यादौ य
ण्स्यात्। एवं अज्ग्रहणेचकारस्यापि ग्रहणम् दुवीनामित्यादौ वङ्वाय इति णत्वं स्यात्। एवमिज्ग्रहणे नव

कारस्य हल्ङ्युरूपि ध्वे इत्यादौ विभाषेट इतिढः स्यादिति पूर्वपक्षः पूर्वार्द्धस्यार्थः। उत्तरमाह। आधारादिति।
आधारोऽत्र सूत्रकृतो निर्दिष्टः। उपणद्यो बहुलं। तृषिमृषिकृशेः। इ सिद्धः स्रो ध्वे त्यादौ यण्णेऽकृतवान्मध्यस्था
नामप्यनुबंधानां संज्ञित्वं नेति ज्ञाप्यत इत्यर्थः। समाधानांतरमाह। अप्राधान्यत्वादिति। अणित्यादि संज्ञाः प्रत्ये
तुं तद्रूपप्रतिपादनायानुबंधा उच्चार्यंते। ततश्च परार्थमुपादीयमानतया तेषामप्राधान्यं। इतरेषां तु स्वार्थमुपा
दीयमानत्वात्प्राधान्यं। तेन तेषामेव संज्ञानत्वनुबंधानां। प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्यय इति न्यायात्।
नन्वेवं अकारस्याप्यसंज्ञा न स्यात्। संज्ञाप्रतिपादनेवकारस्येव तस्याप्यंगत्वाविशेषादिति चेन्न। स्वं रूपमित्य
नुवृत्त्या आदेरपि संज्ञित्वात्। स्वरूपं वादेरेव गृह्यते। नांत्यस्य। सर्वनाम्ना प्रधानपरामर्शितायाः औत्सर्गिकत्वात्।
इतेति तृतीयया इतो प्राधान्यलाभात्। तदेवं संज्ञाप्रवृत्तिकाले नुबंधानां संनिधानमभ्युपेत्य द्वेधा समाहितं वस्तु

तस्तु तदेव नास्ति स्याद् । लोपश्चेति । बलवानेव बलवत्तरः । स्वार्थे तरप् । अस्याप्यन्तरमिति यथा । हलन्त्यमिति सं
ज्ञायां हि कृतायां णकारादीनां न तु संज्ञा प्राप्नोति । लोपश्च । तत्र परत्वान्नित्यत्वादन्तरंगत्वाच्च लोपे कृते संज्ञाप्रवृत्ति
काले णकारादीनामसत्त्वादेव तेषामजादिसंज्ञा नेति भावः । यस्मिंस्तु प्रत्याहारे योनुबन्धो पेक्षितस्तस्यैव वचनसा
मर्थ्यात्तत्प्रवृत्तेः प्राग् लोपाभावः । उच्चेवा तस्मिन्नन्त पूर्वेण तेन सहित आदिः संज्ञा भविष्यति । अन्तःपा
तिनां तु लुप्तानां न संज्ञा । अयमाऐश्विकारादिषु सावकाशत्वादिति । ननु हल् प्रत्याहारे अकारप्रवेशो दुर्वारः । न
हि तत्र लोपो लभ्यते । ततः प्राग् वु संज्ञाया विरहेणोपदेशे जिती संज्ञाया अप्रवृत्तेः । एवं वाप्य समाधानमपि दुरु
पपाद । उदाहृतस्याः वारस्य लोपश्च बलवत्तर इत्यनेनैव गतार्थत्वादिति चेन्न । सोस्यादिरिति निर्देशेन प्रथमस्य गु
णना भेदकत्वेन चरमस्यैव समाधानस्य सूपपादत्वादिति दिक् ॥ इति श्रीशब्दकौस्तुभे प्रथमाध्यायस्य प्रथमे

पादे द्वितीयमाह्निकं॥ वृद्धिरादैच्। आकार ऐकार औकारश्च वृद्धिसंज्ञः स्यात्। संज्ञाप्रदेशा वृद्धिरेचीत्या
दयः। तदुदाहरणमेवास्याप्युदाहरणं बोध्यं। आच्च ऐच्चेति इतरेतरयोगद्वन्द्वः सुपां सुलुगिति सुलु
ग्वा। अथवा समाहारे द्वन्द्वः। न चैवं द्वन्द्वाच्चुदषहान्तादिति टच् स्यादिति वाच्यं। समासान्तविधेरनित्यत्वात्।
अत्र ज्ञापकं तु द्वित्रिभ्यां ष मूर्ध्न इति षविधानं। तद्धि बहुव्रीहेस्सक्थ्यक्ष्णोरिति षचि प्रकृतेपि क्रियते।
षचश्चित्त्वसामर्थ्याज्ज्ञायमानं अन्तोदात्तत्वं बहुव्रीहित्वप्रयुक्तपूर्वपदप्रकृतिस्वरं यथा बाध्यते तथा द्वि
त्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहाविति विधीयमानमन्तोदात्तत्वविकल्पं मा बाधिष्टेत्येवमर्थं। तच्च द्वित्रिभ्या
मित्यस्य कृतविकल्पावकाशत्वे सत्येव संगच्छते न त्वन्यथा। अवकाशश्च समासान्तानामनित्यतायां सत्या
मेव लभ्यते। त्रिमूर्धानं सप्तरश्मिं गृणीषे इति यथा। तस्मात् षप्रत्ययविधानं ज्ञापकमिति स्थितं। तथा द्वित्रि

न्यामिति सूत्रे बहुव्रीहिग्रहणमपीह ज्ञापकं। अन्यथा पाद्दन्नर्द्धेषु इत्येव निर्दिशेत्। एवं हि सति कृत समासांतपा
दत्वक्रमोपि न विरोत्स्यते। बहुव्रीहिभिन्नं च समासांतविरहादेव वारयिष्यते। ननु षष्ठीतत्पुरुषादिवारणाय बहुव्री
हिग्रहणमस्तु। तथाहि द्वयोर्दंता इति विग्रहे द्विदतः पश्येति प्रयोगे पद्दन्निति दतृ आदेशः स एवेह निरनुबंधकत्वाद्
स्येत। न च पद्दन्निति सूत्रे तदंतविधिर्दोर्लभ्यात् कथमेतदिति वाच्यं। व्यङः संप्रसारणमिति सूत्रस्थपूर्वपक्षन्यायेन
सिद्धं त्ववयवानन्यत्वादित्याह्निकभाष्यवार्त्तिकन्यायेन च अवयवस्य कार्यलाभात्। अन्यथा हास्तिशीर्ष्यादिपेक्षा
त्यादावगतेरिति वक्ष्यते। तस्मात्कथं बहुव्रीहिग्रहणं ज्ञापकमिति चेन्न। पूर्वोत्तरसाहचर्यबलेनापि बहुव्रीहत्वप्रवि
ष्टस्य वारणसंभवात्। दत इति सानुबंधस्यापि सुपठत्वाच्च। स्फिगपूतवीणांजोध्वकुक्षिसीरनामनाम्नेति सू
त्रे अप्राप्ते स्यनुवृत्त्या अपस्फिगमित्यादावुत्तरपदांतोदात्तविधायके अध्वशब्द ग्रहणमपीह लिंगं उपसर्गादध्व

शा० कौ०
१२
72

न इत्यस्य च प्रत्ययस्य नित्यत्वे हि चित्वादेव सिद्धं स्यात्। तथा प्रतेरंश्वादयस्तत्पुरुषे इति सूत्रे ऽंश्वादिगणे राजन्श
ब्दस्य पाठोपीह लिंगं। अन्यथा राजाहःसखिभ्यष्टजिति टचैव सिद्धे किं तेन। यत्तु संकुचद्भूः पथामित्यत्र टिलोपस्येव
प्रकृतिवदनुकरणमित्यतिदेशेन अप्रत्ययस्यापि प्राप्तौ तदकरणं ज्ञापकमिति। तन्न। अतिदेशो ह्यमनित्य इति सव्य
स्तत्रे प्रपंचितत्वादिति दिक्। कृतमनयोः साधुत्वमित्यादि भाष्यमिष्टादि भाष्यग्रंथाश्चास्मिन्पक्षेऽनुकूलाः। अनयोः
पदयोरिति स्वरसात्। अथवा आदित्यमसमस्तमेव। पस्य ष्ठायां श्रुत्वा प्रतिषेधन्निरिति वार्त्तिके भाष्यकारैरेव वृद्धिः स्यात्
ऐजिति पदविभागप्रदर्शनात्। अस्मिंश्च पक्षे अनयोः सूत्रखंडरिति नेयं। पक्षांतरमभिप्रायकमेव वातत्। वृद्धिशब्द
स्तु तंत्रेण वृत्त्या वा योजनीयः। द्विर्वचनेचीत्यत्र णः संप्रसारणमित्यादाविव तंत्रभयथाप्यदोषात्। आदितितपरक
रणमैजर्थं तेन त्रिमात्रचतुर्मात्राणामेवं। संज्ञा न भवती त्यादि। एङुङ्। एओङ्। सूत्रयोः प्रपंचितं। नचैवं तकारस्य राम
१२

उत्तरश्लेषतैवस्यादिपदान्तताविरहान्नत्वं नस्यादितिवाच्यं। असंदेहार्थतया आकारश्लेषस्त्वस्यापि संभवात्।
अस्तु वादेत्तितिपदं। स्वतंत्रउद्धृतोरित्यादो दपरत्वमेवाश्रित्य तपरसूत्रे दकारोपि प्रक्षिप्यतइतिति स्वरितमि
ति सूत्रे भाष्यकारैर्वक्ष्यमाणत्वात्। दात्परस्यापि तत्कालग्राहकत्वात्। वस्तुतस्तु दकारप्रश्लेषपक्षोप्युच्चय
मात्रं। इहतु तपरग्रहणं स्पष्टार्थमेवेत्यादिप्रागेवोक्तं नविस्मर्तव्यं। ननु वोः कुरितिकुत्वं ऐचूशब्दे प्राप्नोति। चतु
ष्टयी शब्दानां प्रवृत्तिरितिपक्षेऽस्य संज्ञाशब्दतया लौकिकत्वेनानुशासनविषयत्वात्। द्वयीपक्षेपि जाति
शब्दत्वसंभवात्। वैशेषिकपरिभाषया द्रव्यत्वगुणत्वादिजातिस्वीकारे वैयाकरणपरिभाषयापि तत्स्वीका
रस्यदुर्वारत्वात्। वस्तुतस्तु सिद्धान्ते व्यक्तिविशेषोपहितसत्ताया एव जातित्वस्वीकारादिहापि सास्तु। व्यक्ति
विशेषाश्चस्वरूपसत्ता-अतद्भेदेनानुगतीकृताः सत्तोपधायकाः। तदुक्तं। तस्यां सर्वे शब्दा व्यवस्थिता इति।

श० कौ०
७३
73

आद्यं तावदवयवद्वारा समुदायानुकरणं वा ऐवृशब्दः अनुकरणशब्दाः स्वजातिशक्ता एव। तत्रानुकार्यनिष्ठजातेः
प्रवृत्तिनिमित्तत्वात्। नवाद्यपक्षे सूत्रवैयर्थ्यमदीयशास्त्रे वृद्धिशब्देनादैच एव ग्राह्या इति नियमार्थं सूत्रा
रंभात्। तदुक्तं। अनेकशक्तेः शब्दस्य शक्त्यवच्छेदेन संज्ञिनि विनियोगान्नित्यत्वाच्च सर्वसंज्ञानां लौकिकत्वादि
ति। अनेकस्मिन्ननेका वा शक्तिर्यस्येति विग्रहः अवच्छेदकभेदेपि जात्यवाद्युक्तिरेकैव। औपाधिको भेद इ
ति प्रवादस्तु उपाधिर्भिन्नद्रव्यत्वपर्यवसन्न इति मतेन आद्यः पक्षः। उपाधिस्थित्यधीनस्थितिको जीवब्रह्म
भेदवदुपाध्येयेपि भेदोस्तीति मते न द्वितीयः कल्पः। नकोपधाया इति पुंवद्भावनिषेधस्तु नास्ति तद्धितग्र
हणं कर्तव्यमिति वक्ष्यमाणत्वात्। अवच्छेदः संकोचः स च यद्यपि शक्तेर्निरवयवतया न संभवति तथापि तदि
तरस्मिन् तात्पर्यविरह एव शक्तिसंकोचो ऽभिमतः सर्वे सर्वार्थवाचका इत्यभ्युपगमेपि तात्पर्यं क्वचिदेवे

राम
७३

स्यस्य निर्विवादत्वात्। शक्तिः परं कारणतापरपर्याया सर्वत्र दुर्वारेत्युक्तं। न चैवमन्वाख्याने कार्थत्वमित्यस्य
निर्विषयता। यो रूपेय संकेतनिरपेक्षस्य प्रसिद्धतरं संबंधस्य विनाप्रमाणं बकुषु न कल्पनमिति तदर्था
त्। गौणमुख्यविभागोऽपि प्रसिद्ध्यप्रसिद्धिनिबंधन एव। गाव्यादीनामसाधुतापि संकेतविरहे सत्येवाऽस्त
त एव प्रसिद्धेऽपि पक्षे गौण्यादीनां गौण्यासाधुत्वमस्त्येवेत्यन्यत्र विस्तरः। उक्तं च। व्यवहाराय नियमः संज्ञा
याः संज्ञिनि क्वचित्। नित्य एव तु संबंधो डित्थादिषु गवादिवत्। डित्थादीनां च शास्त्रेऽस्मिन्न शक्यवच्छेदलक्ष
णः। अकृत्रिमोऽस्ति संबंधो विशेषणविशेष्यवदिति। वस्तुतस्तु साध्वसाधुबहिर्भावपक्षेप्येषामनुशास
नविषयतास्त्येवेति पस्पशायां साधुत्वनिर्वचनप्रसंगे नोपपादितं। तस्मात्सर्वथापि कुलं प्राप्नोत्येवेति चेत्।
सत्यं। अयस्मयादीनि छंदसीति भत्वप्रवृत्त्या कुलोपयोगिनी पदसंज्ञा प्रतिबध्यते। उभयविध्येकवाक्यता

श०कौ०
७४
74

पञ्चात्तु पदसंज्ञाऽस्त्येव। स स्तुष्टुभा सस्रक्कृता गलेनेत्यत्र तु विपरीतं। कुत्वे पदत्वमस्ति जस्त्वे तु नेति। विष
य भेदेन संज्ञाद्वयमस्तीत्यंशेपरं दृष्टांतता बोध्या। तेन त्वपदेशे जस्तु स्रोऽसि कद्रत्यादौ कुत्वाभावो जस्त्वं वासि
ष्यति। छंदसि विहितस्य सूत्रे कथं प्रवृत्तिरित्याशंक्य छंदोवत्सूत्राणीति भाष्यं। इष्टिरियं भाष्यकृतः। यद्वा।
छंदः शब्दः स्वर्यते। स्वरितेनाधिकारः अधिकं कार्यं। गौणस्यापि ग्रहणमित्यर्थः। तेन छंदोगेष्वपि तत्तत्का
र्यप्रवृत्तिर्बोध्या। संज्ञाद्वयसमावेशस्तु उभयसंज्ञान्यपीति वक्तव्यमिति वार्त्तिकवचनात्। षष्ठीयुक्त इतिसू
त्रे छंदसि वेति विभज्य एका संज्ञेति नियमस्य छंदसि विकल्पनाद्वा। यद्वा। अयस्मयादीनीत्यनेनोभयसंज्ञा
प्रयुक्तकार्यभाजः समुदाया निपात्यंते। न तु प्रकृताभसंज्ञैव विधीयते। अत एव कार्यविशेषपुरस्कारसं
भवतीति बोध्यं। तस्मात्कुत्वं नेति स्थितं। कुशब्दस्य अणुदिदित्यनेन संज्ञात्वेन विनियोगात्तत्रैव प्रागुक्तरीत्या राम ७४

व्यक्तिविशेषणतयाभानाभ्युपगमात्। तथा चोक्तत्रितयान्यतममिह त्वप्रत्ययार्थः प्रकृतिजन्यबोधप्रकारी
भूतत्वं प्रयोगोपाधिमाश्रित्य तथाभूतधर्मस्य त्वतलर्थताया वक्ष्यमाणत्वात्। यद्वा प्रकृतिः स्वरूपपरा। प्र
वृत्तिनिमित्तत्वे तु त्वतलादीनां शक्तिरेवेति मतान्तरमपि वक्ष्यते। उभयथापीह त्वप्रत्ययेन स्वार्थाश्रयः ककारो
लक्ष्यते। तेन कुत्वं नेत्यस्य ककारादेशो नेति पर्यवसितोऽर्थः। आह च सामान्यान्यभिधीयन्ते सत्तावान्तैर्विशेषिता।
संज्ञा शब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिरिति। इत्थं पदविभागः पदसाधुत्वं चोक्तं। वाक्यार्थस्तु संज्ञासंज्ञिभावः।
तथा हि। समानविभक्तिकनामार्थयोरभेदान्वयस्य व्युत्पन्नतया आकारादयो वृद्धिप्रत्यभेदेन संसर्गेण विशे
ष्याः। द्विरूपोपस्थितिस्तु विशेषणीभूतं शब्दस्वरूपमादाय बोध्या। एतेनेन्द्रो मरुत्वान्मघवेत्यादि व्याख्यातं। न तु
तत्रापि मरुत्वदादिशब्दानां तत्तद्वाच्ये लक्षणेति ग्राह्यं। उक्तरीत्या लक्षणां विनैवोपपत्तेः। अत एवोद्भिदधिकर

शा०कौ०
७५
75

णे विशिष्टविधिपक्षं मत्वर्थलक्षणाप्रसंगेन दूषयित्वा नामधेयत्वं सिद्धांतितं। अन्यथा नामधेयत्वेपि लक्षणाया
स्तुल्यतया अधिकरणस्यासंभवदुक्तिकतापत्तेरिति दिक्। स्यादेतत्। किमादैज्मात्रस्य वृद्धिसंज्ञा आहोस्विद्वृद्धि
शब्दभावर्त्यं वृद्धिरित्तिये आदैवस्ते वृद्धिसंज्ञा इति व्याख्यानात् तृज्वत् क्रुष्टुर् संज्ञावत्तज्ञाविता नामेवेति। नाद्यः।
सर्वभासः सर्वकाक इत्यादौ उत्तरपदवृद्धौ सर्वं चेति सूत्रेण पूर्वपदांतोदात्तत्वप्रसंगात्। इष्यते तु समासस्ये
त्यंतोदात्तः। न च सर्वस्य सुपीत्याद्युदात्तताशंक्या। सति शिष्टेन समासस्वरेण बाधात्। सर्वस्तोम इत्यादौ तु ब
हुव्रीहौ प्रकृत्या पूर्वपदमित्यनेन समासांतोदात्तत्वे बाधिते सर्वस्य सुपीति भवत्येव। इह तु कर्मधारयत्वात्स
समासांतोदात्तत्वमेव बोध्यं। किं च। तावती भार्या यस्येति बहुव्रीहौ तावद्भार्यो न सिध्येत्। वृद्धिनिमित्तस्य च तद्धि
तस्येति पुंवद्भावप्रतिषेधप्रसंगात्। न द्वितीयः। शालीयो मालीय इत्यादौ वृद्धलक्षणस्य छप्रत्ययस्यासिद्धि राम
७५

प्रसंगात्। किं चैवं आम्रमयं शालमयमित्यादौ नित्यं वृद्धशरादिभ्य इति नित्यो मयट् न स्यात्। किं च आम्र
गुप्तायनिः शालगुप्तायनिः उदीचां वृद्धादगोत्रादिति वृद्धलक्षणः फिञ् न स्यात्। ननु आवामवृद्धात्फिन्वद्ध
न्नमिति फिञ् नाप्येतत्सिद्धं। न ह्यत्र फिञ् फिनोः स्वरे रूपे वा विशेषोऽस्ति। नित्यादिर्नित्यमित्याद्युदात्तस्योभय
त्राविशिष्टत्वात्। न चाम्रगुप्तायनीभार्य इत्यत्र वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकार इति पुंवद्भावप्रति
षेधसिद्ध्यै फिञेव कर्तव्य इति वाच्यं। जातेश्चेत्यनेनापि प्रतिषेधसिद्धेः। न चाम्रगुप्तायनेश्छात्रा इति वृद्धा
च्छे विवक्षिते फक्फिञोरन्यतरस्यामिति लुग्विकल्पेन आम्रगुप्तीया आम्रगुप्तायनीया इति द्वैरूप्य
मिष्टं। तच्च फिञं विना न सिध्यतीति वाच्यं। फक्फिञोरित्यत्र यूनीत्यनुवृत्त्या तदुदाहृतरूपद्वयस्य सि
द्धांतेप्यसंमतत्वात्। अत एव तत्र यून्येवोदाहृतं। यस्कस्यापत्यं। शिवादिभ्योऽण्। यास्कः। तस्यापत्यं यु

[redacted]

श. कौमुदी
७६
76

वाऽणो द्व्यच इति फिञ् यास्कायनिः। तस्यच्छात्रा यास्कीयाः यास्कायनीया इति। तस्मात्फिनापि सिद्धौ किमर्थं फि
ञेष्यत इति चेत्। उच्यते। उक्तरीत्या रूपसिद्धावपि प्राचामुदीचां वाचार्याणां स्वस्वमतप्रच्युतिरेव तावद्दोषः
सिद्धांते हि उदीचामाग्रगुप्तायनिरिष्टः प्राचां त्वनिष्टः। उक्तरीत्या तु उदीचां न सिध्येत् प्राचां तु सिध्येदिति स्व
ष्ट एवोभयोरपि स्वमतप्रच्यवः। तथा च सतो भारद्वाजस्येति सूत्रे। जहर्षेत्यादौ गुणे रपरत्वे च कृतेऽनजन्त
त्वादचस्तास्वदित्यस्याप्राप्तौ नियमानुपपत्तेः सतो भारद्वाजस्येतीदं विधायकं स्यात्ततश्च पेचिथ शेकिथेत्या
दावपि स्यादिति दूषणे प्राप्ते अचस्तास्वत्थल्यनिटो नित्यं भारद्वाजस्य। उपदेशेऽत्वतः भारद्वाजस्येत्येव।
ततः सतः भारद्वाजस्येति निवृत्तं। एवं च सकललक्ष्यसिद्धिरिति सूत्रभंगेन समाधाय। भाष्यकारो वक्ष्य राम
ति। सिध्यत्येवं। अयं तु भारद्वाजः स्वस्मान्मतात्प्रच्यावितो भवतीति। अत एव अचस्तास्वदित्यत्र उपदेशेऽत्व ७६

तदस्यैतदुपदेशग्रहणमपकृष्य सिद्धांतयिष्यतीति दिक्। किं वा फिञि सति - आम्रगुप्तायनेरपत्यं कुत्सितमि
त्यर्थे सौवीरगोत्रे। फेश्छ वेति छठकौ न स्याताम्। तत्र हि फिञैव गृह्यते न तु फिञ्। वृद्धादित्यधिकारादिति स्थि
तम्। ततश्चाम्रगुप्तायनीयः आम्रगुप्तायनिक इति न स्यात्। न वयमुं दोषं सुयामाव वार्ष्यायणि फिञः स्मर
ताम् इति वचनात्रयाणामेव परिगणनादन्येभ्यश्छठकौ न भवत एवेति वाच्यम्। भाष्यकृता परिगणनस्यानाश्र
यणात्। अन्यथा अत्रैव सूत्रे सौवीरेष्विति किं तैकायनिरिति प्रत्युदाहरणं न संगच्छेत। तैकायनिशब्दस्य
तत्रापाठात्। अत एव यूनि लुगित्यत्रोदाह्रियते। तिकस्यापत्यं तिकादिभ्यः फिञ् तैकायनिः। तस्यापत्यं युवा।
फेश्छ वा तैकायनीयः। तस्य छात्राः युवप्रत्ययस्य लुकि कृते वृद्धाच्छः तैकायनीया इति। न हि सति परिगण
ने तैकायनेश्छः संभवति न वा तद्लोपः। अत एव यूनि लुक्सूत्रे स्थित्वा परिगणनमर्वाचीनमिति हरदत्ताद

प्र०कौ०

७१

७७

योप्याङ्ः। अपि वा किञि सति आम्रगुप्तायनेरपत्यं युवा। प्राग्दीव्यतोऽण्। तस्य एव क्षत्रियार्षञितो यूनि लुगणि
ञोरिति लुकि आम्रगुप्तायनिरित्येव रूपं पितरि पुत्रे वेष्यते। फिनि तु सति तन्न स्यात्। ञितः परत्वाभावात्।
न वा ब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानमिति तस्य सिद्धिः। ब्राह्मणगोत्रे तदप्रवृत्तेः। किं वा तद्रावि
तग्रहणपक्षे माजादीनां वेत्यनारंभणीयं स्यात्। अस्तु वृद्धमकर्यादीनामित्यनेनैव पूर्वपदाद्युदात्त
स्य सिद्धेः। अपि वा। वृद्धिशब्दे तंत्रावृत्याद्याश्रयणे दोष एवं। मृजेर्वृद्धिरित्यादिविधिप्रदेशेषु इतरेतराश्र
यणपरिहाराय स्वज्ञशास्त्रकवद्भाविसंज्ञा विज्ञेया स्यादिति वा परं गौरवमिति। उच्यते। आदैजमात्रस्य
वृद्धिसंज्ञा। न चैवं सर्वभासादावुक्तदोषः स्यादिति वाच्यं। उत्तरपदवृद्धौ सर्वं चेत्यत्र हि उत्तरपदग्रहणं
स्वर्यते। स्वरिते न वाधिकारो विज्ञायते। तेनोत्तरपदस्येत्यधिकृत्य या वृद्धिर्विहिता सैव गृह्यते। यथा सर्व राम ७१

पांचालः सुसर्वपाञ्चालजनपदस्येति वृद्धिः इदं च तज्ज्ञापितं यहणेऽप्यवश्यं वक्तव्यमेव। अन्यथा सर्वः कारकः
सर्वकारक इत्यादावपि प्रसक्तेः। एवं तावदङ्गार्येऽपि दोषः। तत्राव्ययस्यापाश्रयणेन वृद्धिशब्देन विहितायावृद्धे
र्यन्निमित्तं तत्रैव पुंवद्भावप्रतिषेधः स्यात्। वृद्धिशब्देन च विधेयोक्तस्या वृद्धिः प्रतीयत इत्याशयेनैवोक्तं भाष्ये। य
कस्मायाया वृद्धेर्निमित्तमिति। न च वैयाकरणभार्येत्यादौ सौवश्वभार्येऽतिप्रसंगः। फलोपहितस्यैव निमित्त
त्वेन विवक्षितत्वात्। एवं चाप्रतिफलोपधानमप्यस्तीति चेन्न। तयोर्वृद्धिशब्देनाविधानात्। केचित्तु यावद्वृद्धि
जननयोग्यत्वे सति किंचित्फलोपहितस्तद्धितो निमित्तशब्देनोच्यते। वैयाकरणे तु एवं प्रतितद्धितो न निमित्तं
निषेध्यसंयोगविशिष्टतामात्रेणातिप्रसंगभंगात्। तेन वैयाकरणभार्ये नातिप्रसंगः। परिषदोण्यः। पारिष
द्यभार्य इत्यादौ तु आकारमात्रोपहितत्वेपि स्वरूपयोग्यता सकलवृद्धिप्रत्ययस्तीत्याहुः। तस्मात्। आवृत्तौ

गौरवापत्तेः। पाणिनीयादेरसिद्धितः। मात्रादीनां चेति लिंगाद्याप्तिन्यायात्तथैव वा भावि संज्ञात्वविज्ञाने गौरवा
द्वैह निश्चितं। आदैज्मात्रस्याविशेषाद्वृद्धिसंज्ञा विधीयते। अनर्थकं साध्वनुशासनं प्रयोगनियमार्थं आ
देशार्थमागमार्थं विशेषणविशेष्यभावार्थं चेदं सूत्रमिति षट् पक्षी तु भाष्य एव निराकृतत्वादसंभवदु
क्तिकत्वाच्च नेह तन्यते। संज्ञासंज्ञिभावे सत्यपि का संज्ञा कः संज्ञीत्यत्र तात्पर्यग्राहकास्तु बहवो न्यायाः। त
था हि। यच्छब्दयोगः प्राथम्यमित्याद्युद्देश्यलक्षणं तच्छब्द एवकारश्चस्यादुपादेयलक्षणमित्यभियुक्तोक्ते
स्तथैवानुभवाच्च। प्राथम्यं तावत्संज्ञित्वलिंगं। तच्चादेङ्गुण इत्यादैश्यष्टमेवा। वृद्धिसंज्ञासूत्रे तु मंगलार्थं वृ
द्धिशब्दस्यादौ प्रयोगेऽपि वक्ष्यमाणैर्न्यायांतरैरादैचां संज्ञित्वे निर्णीते सति आदैज्वृद्धिरित्याकारकपदानुपू
र्वीज्ञानानंतरमेव वाक्यार्थबोधाभ्युपगमात्तज्जनकीभूतानुपूर्वीज्ञाने आदैचामेव प्राथम्यान्न व्यभिचारः। राम
७८

पदानुपूर्वीज्ञानमेव वाक्यार्थज्ञानमित्युच्यते। इदं च शाब्दबोधे हेतुरिति यैर्नेष्यते तेषामासन्नानासन्नकथो
च्छेदः स्यात् पदसमूहालंबने सकलपदानां पदार्थस्मरणे च सकलपदार्थानां विषयत्वाविशेषात्। आवश्यकस्य
संज्ञात्वे लिंगं। व्यवहारार्थमेव संज्ञाकरणात्। भेदाभेदाभ्यामपि संज्ञित्वसंज्ञात्वे कथं निर्णीयेते। बहूनां हि
एका संज्ञोचिता। लाघवात्। न त्वेकस्य बह्व्यः संज्ञाः। गौरवात्। न्यूनाधिकव्यक्तिकास्तु बह्व्यः संज्ञाः इष्यन्त ए
व। तत्तत्प्रयुक्तकार्यवैलक्षण्यात्। कृत्कृत्यप्रत्ययसंज्ञावत्। तद्धिततद्राजप्रत्ययसंज्ञावच्च। लक्ष्यलक्षणत्वम
पि दिक्षु भावादि संज्ञालिंगं यथायथं बोध्यं। इह तु आवृत्त्या ऽभेदे द्वेवेने वृद्धिशब्दः संज्ञेति स्थिते तद्बलेन श्रुतानु
पूर्वीभंगादादैचां प्राथम्यमपि योजनीयं। यद्वा। स्वेच्छया संज्ञाः क्रियन्त इति पक्षं विहाय व्यवहारनियम इति
पक्षे योज्यं। आद्ये पि कार्यकालपक्षाश्रयणेन वा समाधेयमिति दिक्। एतेन आदैज्भ्यस्तु केशोषः। कृदतिङ्। अ

एङः एकाच्प्रत्ययः। स्वं रूपं शब्दस्या-अणुदित्। तपरः। आदिरंत्येन। येनविधिस्तदंतस्येत्यादावपि व्यभिचार
उद्धृतः। तत्रापि विपरीतानुपूर्वीकल्पनात्। कल्पकस्य च प्रागेवोक्तत्वात्। पक्षान्तरेऽपि समाधानान्। अत
एव स्थानिवत्सूत्रे वत्करणं किमित्याशंक्य स्थानी-आदेशस्य संज्ञा भाविज्ञायासि भाष्यमप्युपपन्नं। यत्तु अ
एङः एकाजिति परिभाषा न तु संज्ञेत्युक्तं तद्भ्वादावपि सुवचं। अएङः संज्ञायां हल्ग्रहणं स्वादिलोपे हल्गे
ग्रहणमर्थमिति वार्त्तिकस्य तद्भाष्यस्य च प्रतिकूलं चातस्मादुक्तैव गतिः समीचीनेति दिक्। ननु मृजेर्वृद्धि
रित्यादावन्योन्याश्रयः। संज्ञया हि विधिर्विहितानां च संज्ञेति। न च मालादौ संज्ञाप्रवृत्तिसंभवे सतीह भा
विसंज्ञाविज्ञानं संभवति। तस्माद्वृद्धिशब्द एवादेशः स्यात्-अन्यत्र वृद्धिसंज्ञाप्रवृत्तावपि मालादिशब्दांतर्ग
तस्याकारस्य ततउत्कृष्टेहविध्यातु मशक्यत्वादिति। अत्राहुः। मार्ष्टि इत्यादौ सिद्धस्यैव आकारस्य मृलुपदे

शब्दसाधुत्वे प्रसक्ते साधुत्वं मृजेर्वृद्धिरित्यादिना बोध्यते न त्वपूर्वः आकारो भाव्यते। येनान्योन्याश्रयः स्यात्।
उक्तं च वार्त्तिककृता। सतो वृद्ध्यादिषु निमित्तभावात्तदाश्रयत्वादितरेतराश्रयत्वादप्रसिद्धिः। सिद्धं तु नित्यशब्दत्वा
दिति। अथ लक्षणैकचक्षुष्कः कश्चिद्व्याकरणबलेनैव माष्टीत्यादिप्रयोगेषु व्युत्पित्सेत तथापि न क्षतिः। शब्
दमात्रादौ आकारे श्रुते आत्वसामान्यलक्षणप्रत्यासत्त्या माष्टीत्यादिप्रयोगसमवायिनां सर्वेषामाकार
णां वृद्धिशब्दवाच्यताग्रहात्। सामान्यलक्षणानभ्युपगमे तु। अन्यथा गेहे घटोऽस्तीति वाक्यादप्यपूर्वव्यक्ति
र्न गृह्येतेति दिक्। अत एव न वेति विभाषेति सूत्रे भाष्यकारो वक्ष्यति। यत्तु त्वस्य विधेयत्वे विभाषाश्वेरित्यादिना
तस्यैव विकल्पापत्तिः। तस्मात्संप्रसारणस्यैव विकल्प्यतद्धिति। एषैव लडादिविधौ गतिः। न चैवं साध्वनुशास
नत्वप्रसंगः। साधुत्वविशिष्टस्यैव सर्वत्र लक्षणाविधानमिति कृन्मेजन्तसूत्रे विवरणकारादिभिरुक्तत्वात्।

मपक्षे तु आत्वजातौ शक्तिग्रहात् शक्त्यनुभवपदार्थस्मरणवाक्यार्थबोधानां समानप्रकारकत्वेनैवातिप्रसंगभंगाभ्युपगमे

केवलविधानेपि यदिह परिनिष्ठितं तस्माद्धितिश्रुतार्थापत्तिकल्प्यवाक्यासाधुत्वसिद्धेश्च। इहत्वप्रत्येकं वाक्य
परिसमाप्तिः। माल्यादीनां चेत्यादिलिंगात्। ब्राह्मणा भोज्यंतामित्यादौ तथादर्शनाच्च। यद्यपि गर्गाः शतंदंड्यंतामित्या
दौ समुदायेपि वाक्यपरिसमाप्तिर्दृश्यते। गुणकर्मभूतानामपादानस्थानापन्नानां गर्गाणामनुरोधेन ईप्सित
कर्मतया प्रधानभूतस्य शतस्यावृत्त्ययोगात्। तथापीह शास्त्रे यत्नं विना समुदाये शास्त्रं न समाप्यते। अतए
व उभे अभ्यस्तं सहेति सहग्रहणं वार्त्तिककृद्वक्ष्यति। भाष्यकारस्तूभे ग्रहणमेवैतदर्थमिति वक्ष्यति। अन्यथाए
काचो द्वे इत्यनुवृत्त्या सिद्धेः किमुभे ग्रहणेन। संयोगसंज्ञायां समाससंज्ञायां च महासंज्ञाकरणमेवान्वर्थता
विज्ञानार्थमिति यत्नः। अतएव सहसुपेति सहग्रहणं योगविभागेन तिङंतादिसमासविधानार्थमिति स्थापयिष्य
ते। इह तपरकरणं ऐजर्थं ऐदूदेदिति कडुच्चारणार्थमसंदेहार्थं वेति प्रपंचितमेऽउङ् ऐऔजिति सूत्रयोः यद्यपीहैकं राम ८०

वार्त्तिककृता। आकारस्य तपरकरणं सवर्णार्थमिति। तत्तु भेदका गुणास्तपरत्वं चानणि विध्यर्थमित्यभि
प्रेत्य। भाष्ये तु अभेदका गुणा इति स्थितं। गुणाश्च उदात्तानुदात्तस्वरितानुनासिकाः। नांतरीयकतयोच्चार्यमाणा अ
पि यत्नं विना न विवक्ष्यंत इत्यर्थः। अनुदात्तः। अनुदात्त इत्यादावनुदात्तग्रहणं चेह ज्ञापकं। अन्यथा हि उदात्तमे
वोच्चारयेत्। लाघवात्। ननु यद्यभेदका गुणास्तर्हि यद्वक्ष्यति भाष्यकारः इत्यादेशस्य वधेः स्थानिवद्भावादनु
दात्तत्वादिट्प्रतिषेधे प्राप्ते तद्वारणाय वध्यादेशे उदात्तनिपातनं करिष्यते। तथा च एकाच उपदेशे इति सूत्रेए
काज्ग्रहणं न कर्त्तव्यमिति। तदेतद्विरुध्येत। अविवक्षाप्रसंगात्। अथोच्यते। तत्रापि स्थानेंतरतम इति वचना
दादेशस्य यः स्वरः प्राप्तस्तस्मिन्नुच्चारयितव्ये उदात्तोच्चारणं यत्नेन विवक्षार्थं विज्ञायत इति। एवमपि यद्वक्ष्यति ष
ष्ठे। चतसर्याद्युदात्तनिपातनं करिष्यते। स निपातनस्वरश्चतुरः शसीत्यस्य बाधको भविष्यतीति। तद्विरुध्येत। व

धा०कौ०

८१

४।

तुरशब्दे ह्यव्युत्पत्तिपक्षे नः संख्याया इति फिट्सूत्रेणाद्युदात्तः। चतेरुरनिति व्युत्पादने पि नित्स्वरेणाद्युदात्त ए
वा। तत्स्थानिकस्य चतसृशब्दस्यापि स्थानिस्वरेणाद्युदात्तस्योच्चारणोपपत्तौ चतुरः शसीत्येतज्ज्ञापकत्वायोगा
त्। अपि वा। अस्त्र्यादीनामप्याद्युदात्तत्वात्तदादेशस्यानङोऽपि स्थान्यनुरूपेणानुदात्त एवोच्चारणीये उदात्तोच्चार
णं विवक्षार्थं भविष्यतीत्युदात्तग्रहणं निष्फलमेव प्रस्तुतक्रियमाणं तथा लाघविकोप्यविवक्षां ज्ञापयेत्। यदपि
एकश्रुत्या सूत्रपाठात्क्वचिदुदात्तोच्चारणं विवक्षार्थमिति तदपि चिंत्यं। एवं सति अनङोप्युदात्तोच्चारणेनैव सिद्धे
उदात्तग्रहणवैयर्थ्यापत्तेः। उक्तज्ञापनासंभवाच्च। तथा हि। किं ज्ञाप्यं। स्वशब्देनानुपात्तो गुणो न विवक्ष्यत इति।
आहोस्विदसति यत्नविशेषे न विवक्ष्यत इति। आद्ये निपातनस्वरो न विवक्ष्येत। अंत्ये तूदात्तोच्चारणएव
विवक्षाहेतौ यत्नविशेषे स्थिते कथं ज्ञापकोऽस्तानामनशेऽपि स्यात्। तस्माद्गुणनामभेदकत्वप्रतिपादकमात्यं राम ८१

नाप्युदात्तस्यं प्रविरुद्धमेवेति चेत्। उच्यते। विभाषाछंदसीति वैकल्पिकमेकश्रुत्यमंगीकृत्य पक्षांतरे स्वरपिप
रिहारा भवंतीति न्यायेन तत्र तत्रानुदात्तनिपातनं करिष्यत इत्युक्तं। इह तु त्रैस्वर्येण स्वराणां पाठमाश्रित्य स्वरू
पेणोपात्तस्य गुणस्य नांतरीयकत्वेनाविवक्षितत्वसंभवादुदात्तग्रहणं ज्ञापकमित्युक्तमतो न विरोधः। यद्वा।
ऽणुदित्सवर्णस्येत्यत्र अणग्रहणेनैव सिद्धे गुणभिन्नानां यवलानां संग्रहाय क्रियमाणमण्ग्रहणं गुणानां भे
दकतामपि ज्ञापयति। भेदकाभेदकत्वपक्षयोश्च जातिव्यक्तिपक्षयोरिव लक्ष्यानुरोधाद्व्यवस्थेत्युक्तं। इह सू
त्रे। तेन भेदकत्वपक्षाश्रयणेनाप्युदात्तनिपातनं करिष्यत इत्यादिभाष्यं बोध्यं। अत एव च वृद्धमस्य पदाद्यत्वेऽस
त्र न आविभक्ताविव्यादौ वानुनासिको न प्रवर्त्तते। ननु अण्ग्रहणं हलोऽयमामिति लोपेऽन्यतरस्यां ग्रहणानु
वृत्तिज्ञापनार्थमित्युक्तमिति चेन्न। उभयज्ञापकत्वेऽप्यविरोधात्। न ह्येकेनैकमेव ज्ञाप्यमिति नियमः। यावता वि

नानुपपत्तिस्तस्य सर्वस्य ज्ञाप्यत्वात्। अतएव आत्वविकल्पः कृतात्वस्य घटू संज्ञा वेत्युभयमपि। अष्टनो दीर्घादि
ति दीर्घग्रहणेन ज्ञापयिष्यते। अतएव च संहितायामित्यधिकारेण संहितायां अनित्यत्वं कालव्यवाये व्यानड्
दिप्रवृत्तिश्चेत्युभयं ज्ञाप्यत इति दिक्। एवं च आकारस्य तपरकरणं सवर्णार्थमिति दृढत्वं वार्त्तिकमपि भेदकत्व
पक्षेण साध्वेव। भाष्ये तु पक्षान्तराभिप्रायेण एजर्थत्वमुक्तं। तदपि यथोद्देशपक्षे बोध्यं। आदेचां संज्ञाविधा
वनुवाद्यत्वेन सवर्णग्राहकत्वप्रसक्तेः। कार्यकालपक्षे तु विधिवाक्येनैव वृद्धिसंज्ञाविशिष्टानामादेचां भा
व्यमानतया सवर्णग्रहणं न प्राप्नोत्येव। यथा ज्योतिष्टोमयाजस्त्यादिशब्दानां यागविध्यावेव सामानाधिकर
ण्या नामधेयत्वावगतिर्नतु वाक्यान्तरेण तथास्मिन्पक्षे वृद्ध्यादीनामपि। वृद्धिरादैजिति सूत्रं तु इको गुणवृद्धी
इति वत्पदोपस्थापकं। उपस्थाप्यस्य संज्ञितया परं संज्ञासूत्रव्यवहारः। आद्यपक्षे तु यन्न दुःखेनेत्यादौ स्वर्गशब्दार्थ

वगम वदिहे वकृन्यादि शब्दार्थावगम इति विशेषः। तदयं निर्गलितः सूत्रार्थः। कृतानामकृतानां वा प्रत्येकं वृ
द्धिसंज्ञा स्यात्। आश्वलायनः। ऐतिकायनः। अश्वलेतिकशब्दाभ्यां नडादित्वात्फक्। आदिवृद्धिः। उपगोरपत्य
मौपगवः॥ ॥अदेङ्गुणः॥ ॥अदेङ्गुणसंज्ञः स्यात्। तपरकरणमिह सर्वार्थं। तेन तरतीत्यत्र अकार एव
न तु कदाचिदाकारः। न च प्रमाणत आन्तर्येण नियमसिद्धिः। रपरत्वे कृते एकस्याध्यर्द्धमात्रत्वापत्तेः रस्यार्द्धतृ
तीयमात्रत्वात्। पवंति। चेता। स्तोता॥ ॥इको गुणवृद्धी॥ ॥यत्र ब्रूयात् गुणो भवति वृद्धिर्भवतीति तत्र इक इति
षष्ठ्यंतमुपस्थितं बोध्यं। चेता। स्तोता। अहार्षीदित्यादि इक इत्युक्तेर्नेह। याता। ग्लायति। उम्भितेति। तथा च वार्त्तिकं।
इग्ग्रहणमा संध्यक्षरव्यंजनं कमं युगंतेति सार्वधातुकार्द्धधातुकयोरिति च सूत्रेण सत्यपि गुणे रूपे विशेषो नास्ति।
अविकाशीत् इत्यादौ तु अतो लोपेन वृद्धिर्बाध्यते। एयध्नोपाविति पूर्वविप्रतिषेधस्य वक्ष्यमाणत्वात्। सूत्रारंभ
न निवृत्त्यर्थमिति। ननु नैतानि संति प्रयोजनानि। ज्ञापकेन अभिकं व्यावृत्तिसिद्धेः। तथाहि। अकारस्य पवतीत्यादौ श्नपं तिपं चाश्रित्य यथा २

पक्षे पि ह्येषैव विकीर्षक इत्यादौ गतिः। अचो ञ्णितीत्यत्र निर्दिष्टस्थानिकत्वेनेक्परिभाषाया अप्रवृत्तेः। अया
सीदित्यादौ तु सिचि वृद्धौ सत्यामपि न क्षतिः। वस्तुतस्तु सा सिज्भ्यां परत्वाद्बाध्यते येन नाप्राप्तिन्यायेनापवा
दत्वाद्बाध्यत इति तु निष्कर्षः। न वयातावातेत्यादावातो गुणप्रसंगः। गापोष्टगिति टकः कित्वेन आकारस्य गुणे
न भवतीति ज्ञापितत्वात्। तद्धि कित्वं सामग इत्यादावात्वोपार्थं क्रियते। यदि तु आकारस्य गुणः स्यात्तर्हि द्वयोरका
रयोः पररूपेण सामग इत्यादिरूपसिद्धौ किं कित्वेन। न चेह विकीर्षक इत्यादावेव परत्वादंगत्वाच्च अतो लोप
एवोदाहर्तुमुचितो न तु पररूपमिति वाच्यं। तावतापि ज्ञापकत्वे बाधकाभावात्। वस्तुतस्तु नेह लोपेन भवितव्यं त
त्र ह्यनुदात्तोपदेशेत्यतोनुवृत्तेनोपदेशेग्रहणेनार्द्धधातुकस्य विशेषणादार्द्धधातुकोपदेशे पदकारंतं तस्या
तो लोपो विधीयते। अन्यथा गतो गतवानित्यादावतिप्रसंगात्। न चासिद्धवत्सूत्रेण निर्वाहः। तस्य भाष्यकृता प्र

त्याख्यास्यमानत्वात्। किंवाऽयपयगतौऽआभ्यांक्विपिऽअत्पदिति रूपं माध्यवादिभिरुदाहृतं। तदपि यथाश्रुते
नसिध्येत्। तस्मादुपदेशानुवृत्तिरेव शरणं। कथंतर्हि घित्नुतः कल्लतः इत्यादावतोलोप इति चेत्। संनियोगशिष्ट
तयाऽप्रत्ययोपदेशवेलायामेवाकारस्यापिबुस्यारोहादिति केचित्। अन्येतु घित्विकल्व्योरवेतिसौत्रक्रमानु
रोधात्स्वपममकारादेशः। तदनंतरं चशब्दाकृष्टउप्रत्यय इति नोक्तदोष इत्याहुः। नन्वेवं क्षामगाये त्यादावेकादे
शस्य पूर्वांतत्वेन ग्रहणादतो ल्यातो रित्यालोपः स्यादिति चेत्। अत्र कैयटः। अकारमाश्रित्य कृतो यशब्दः सन्नि
पातपरिभाषया लोपं न प्रवर्त्तयति। दीर्घत्वं तु कष्टायेति निपातनाद्भवतीति एउङ् सूत्रे स्थित्वा समाहितवान्। त
स्यायमाशयः। यादेशे हि ह्रस्वत्वविशिष्टमत्वं प्रयोजकं। तद्धि घ्नौऽतत इत्यनुवर्त्तेः। तत्र यद्यपि दीर्घे एरु ह्रस्वत्वांशो नि
वर्त्तितस्तथापि ऽअत्वमात्रमादेशेप्यनुवर्त्तते। तदपि चेल्लोपेन निवर्त्येत तर्हि परिभाषाविरोधः। दीर्घांशे परं ज्ञापका

सि०कौ०
८४
८५

त्परिभाषा बाध्यते। नचैवं मंक्ष्यं तरेऽपि तद्बाधोऽस्त्विति वाच्यं। तदबाधेऽप्युपपत्तेः। प्रकृतसूत्रे एओङ्सूत्रे च णपोष्टवः
किल तस्यानन्यार्थतां वदन्भाष्यकार एवात्र प्रमाणं। एतेन सुमंयाशब्दस्य नपुंसके ह्रस्वत्वे ऽयादेशे दोर्द्वैवसतिस्था
ताध्यातोऽदित्यालोपे च सुमंय्य इत्यादिमाधवोक्तं भाष्यविरोधाच्चिन्त्यं। अत एव नपुंसकेऽपि पंतानवदिति ग्र
न्थश्रीयायेति रूपपरतया यथाश्रुतमेव समंजसं भङ्क्त्वा माधवानुरोधेन प्रायेण ज्ञानवदिति व्याख्यानं ऽपि प्रयु
क्ताः। तथाम्नायते त्यादौ संध्यक्षराणामप्युपदेशसामर्थ्याद्गुणेन भविष्यति। इतरथा हि एकारमेवोपदिशेत्। मा
त्रालाघवविरहेऽपि प्रक्रियालाघवसत्वात्। नचैवमायादेशोऽपि न स्यादिति वाच्यं। यं विधिं प्रत्युपदेशो नर्थकः स वि
धिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्यत इति न्यायात्। गुणं प्रति हि ऐकारोपदेशो नर्थकः। लेङित्यस्यापि सु
पठत्वात्। आयादेशस्य तु निमित्तमेव। न च ग्लायू इत्येव पठ्यतामिति वाच्यं। तथा सति हि त्वयाम्नायते इति स्त्रं नस्या राम ८४

त्। यकारद्वयश्रवणप्रसंगात्। जग्लाविति याप्यसिद्ध्यापत्तेश्च। यत्तु एकाजजन्तत्वाभावादिट्प्रसंगेन ग्लातेत्यादि न स्या
दिति। तन्न। अनुदात्तोपदेशेष्वेषां सुपठत्वात्। न वैवमग्लासिष्टामित्याद्यसिद्धिः। अनादंतत्वेन सगिटोरसंभवा
दिति वाच्यं। लोपो व्योर्वलीति यलोपे कृते सगिटोः सुलभत्वात्। संनिपातविघातकमपीदं प्रवर्त्तयिष्यत्येव। अनि
त्यतामाश्रयणे नैव हि दाक्षिः गोदः इत्यादौ अदन्तो लोपः। अन्यथा इञ्क प्रत्यययोः प्रकृतितयोः रूपवृद्ध्यत्वाल्लोपेन
स्यात्। अस्तु वा संनिपातपरिभाषाश्रयणं द्रग्लासिष्टामित्यादि न सिध्येदित्यपि यांतोपदेशे दोषांतरं। सर्वथापि
संध्यक्षराणामुपदेशे सामर्थ्याद्गुणेन। आयादयस्तु भवंत्येवेति सिद्धं। स्यादेतत्। आदेच इत्यात्वमर्पि तर्हि बाध्य
तां। नह्येजुपदेशः आत्वस्य निमित्तं एचस्तूपदेशेऽपि तस्य सुकरत्वात्। प्रतिगुणेन आशित्यात्वेन ऐचोपहारे प्राप्ते
ऐजुपदेशसामर्थ्येन गुणं त्वयोर्मध्ये कतरद्बाध्यं कतरन्नेत्यत्र विनिगमनाविरहेण भयबाध्यत्वौ व्यात्। नवैवं

मात्वविधेः कोवकाश इति वाच्यं। धेट्पाने शोतनूकरणे इत्यादेरवकाशस्य स्पष्टत्वात्। नन्वेव मादेङ इत्येव ब्रू
यात् तथा च एज्ग्रहणं निरवकाशमेवेति चेन्नाजन्तरार्थत्वात्। मीनातिमिनोतीत्यत्र हि एच इत्यनुवृत्त्या आकारां
तानामेजन्ताः प्रकृतयः। एजन्तानामपीकारान्ता इति घुसंज्ञासूत्रे वार्त्तिककारः स्फुटीकरिष्यति। अत्राहुः। अन्यत
रबाधेनैव संभवे उभयबाधकल्पनं तावदन्याय्यं। तत्र यथा एरपि विशेषो नावधार्येत तर्हि विनिगमनाविरहात्स्या
देवोभयबाधः। अस्ति चेह विनिगमकं। नध्याख्येति सूत्रे ध्यायतेः कृतात्वस्य निर्देशेन आत्वाबाधज्ञापनात्। किं
च अज्ग्रहणसामर्थ्यादप्यात्वं भवति। यत्तूक्तमुत्तरार्थं तदिति। तन्न। मीनातीति सूत्रे एग्हि न एच स्थाने आत्वं
विधीयते। किंतु एज्निमित्ते प्रत्यये विवक्षिते उपदेशावस्थायामेवांत्यमात्रस्य आत्वं विधीयते। अन्यथा दाय
इत्यादौ भावे घञं बाधित्वा एरच् स्यात्। ईषद्दवदानः स्वरदानः इत्यातो युच् न स्यात्। अवदाय इति श्याद्व्यधेति णे

नस्यात्। स्पष्टीकरिष्यते चेदं षष्ठ एव भाष्यकृता। एवं च एङ्निमित्ते प्रत्यये इष्युच्यमानेपि क्षापयति मापयती
त्यादि सिध्यत्येवाणि चो गुणं प्रत्यपि स्वरूपयोग्यत्वात्। वृद्ध्या गुणे बाध्येपि योग्यतानपायात्। न चेह फलो
फलोपध्यानं विवक्षितं। आत्वस्य एज्विषये प्रागेव प्रवृत्तेरभ्युपगमात्। अन्यथापन्न्युपुवृण्प्रत्यया नस्युरि
ति समनंतरमेवोक्तं। तस्मादात्वं भवत्येव। गुणस्तु ऐकारोपदेशसामर्थ्याद्बाध्यत इति स्थितं। व्यंजनानां गुणः स्या
दिति परमवशिष्यते। ततश्च ईहित इत्यत्र हकारस्य कंठ्यत्वादकारः स्यात्। ऊंभित इत्यत्र भकारस्य ओष्ठ्यत्वादोका
रः। ततश्च येताञ्जवित इति स्यात्। ईश्वरस्य यणि कृते अकारस्य इणा सह आद्गुणः। न तु अल्लोपः। आर्द्धधातुको
पदेशे यदकारांतं तस्य लोप इति व्याख्यातत्वात्। ऊंभेश्चानुस्वारपरसवर्णयोर्गुणे कर्त्तव्येऽसिद्धत्वादिति। नैष दो
षः। सप्तम्यां जनेर्ड इत्यत्र डप्रत्ययस्य डित्करणं ज्ञापकं न व्यंजनस्य गुणो भवतीति। यदि हि स्यात्तर्हि नकारस्याद्गु

मात्रिकस्यमात्रिकेऽकारेगुणेकृतेऽयादेशेमकारागमेअतोगुणेइतिपररूपेचसिद्धं रूपमुपसरजोमंदुरजइति।
तत्किं दिजोपाधिनद्विकरणेन। स्त्रीगवीषुपुंगवानांगर्भाधानायप्रथममुपसरणमुपसरः। प्रजनेसर्त्तेरिति अ
प्लत्ययोऽनोपवादः। प्रजनः स्यादुपसर इति संकीर्णवर्गेऽमरः। प्रजायतेऽस्मिन्प्रजनः। पशूनांगर्भग्रहणेका
लइतिक्षीरस्वामी। उपसरेजातउपसरजः। मंदुरायांजातोमंदुरजः। ङ्याप्पोः संज्ञाछंदसोर्बहुलमिति ह्रस्वः।
वाजिशालातु मंदुरा इत्यमरः। नचउकारः श्रवणार्थोऽस्त्विति वाच्यं। प्रावृट्शरत्कालदिवां ज इति कृतटिलो
पनिर्देशाल्लिंगात्। ननुनेदंलिंगं। जैक्षयेइत्यस्यकप्रत्ययांतस्यजइतिनिर्देशोपपत्तेः। कथंतर्हि कर्मण्युप
पदेविहितऽआतः कः प्रावृषिज इत्यादौ स्यादिति चेत्। द्विपः पादपः इत्यादिसिद्धयेसुपिस्थः इत्यत्रसुपीतियोग
विभागाभ्युपगमात्। सत्यं। उकारस्यश्रवणार्थत्वेइत्संज्ञाशास्त्रंबाध्येत। नचप्रयोजनाभावः। टिपोलोऽर्थत्वान्न

वगुणेनान्यथासिद्धिः। तदभावस्यापि ज्ञाप्यत्वात्। निषादस्थपत्यधिकरणन्यायेन फलमुखगौरवस्यादोषत्वा
त्। उकारस्य श्रवणार्थताभ्युपगमे सिद्धं तु नित्यशब्दत्वात् किमर्थं शास्त्रमिति चेन्निवर्त्तकत्वात् सिद्धमिति वृद्धिसूत्र
स्थवार्त्तिकविरोधाच्च। नन्वसति ङित्वे रूपं न सिध्यति। नकारस्थाने गुणस्यापि सानुनासिकस्य प्रसंगात्। न च नि
रनुनासिकेन प्रत्ययाकारेण सह पररूपात् शुद्धो भविष्यतीति वाच्यं पररूपविधानेपि गुणनामभेदकतयाप
र्यायेण सानुनासिकप्रसक्तेर्दुर्वारत्वादिति। मैवं। एङि पररूप इतीयता सिद्धे रूपग्रहणं दधिकाघलाकुण विवक्षो
पपत्तेः। तस्य चैतदेव फलं। यादृशं पररूपं निरनुनासिकत्वाद्युपेतं तादृगेव यथा स्यादिति। तस्मान्नने ईवच्चनं ज्ञा
पकं न व्यंजनस्य गुणो भवतीति। एवं च रूपग्रहणमासंध्यक्षरव्यंजननिवृत्त्यर्थमिति वार्त्तिकमसंगतमिति प्राप्ते
भगवान्भाष्यकारः इष्टं सिद्धान्तमाह। तपरकरणात् ज्ञापकेनैवासंध्यक्षराणां निरासेपि व्यंजननिवृत्त्यर्थं सूत्रं कर्त्त

शा०कौ०

८१

87

प्यमेव। यच्चोक्तं जनेर्डवचनं ज्ञापकमिति। तन्न। गमेरपि ह्ययं डो वक्तव्यः। गमेश्च गुणे क्रियमाणे ऽन्तर्यत उ
कारः स्यात्। ततश्च नगो ऽगः अग्रगुः सगुः इत्यादि न सिध्येत्। ततश्च तत्र च दितार्थं डित्वं कथं व्यंजनस्य गुणा
भावं ज्ञापयेदिति। ननु जनेर्ड इत्येव ड प्रत्ययो गमेर्न विधीयते। किंतु गमश्च अंतात्यंताध्वदूरपारेति प्रकर
णे पठितेनान्यत्रापि दृश्यत इति वार्त्तिकेन ड प्रत्ययांतरमेव। तथा च कथं भाष्यकृतोक्तं गमेरप्ययं ड इति।
सत्यं। सप्तम्यां जनेर्ड इति प्रकरणे तावदन्येष्वपि दृश्यते इति सूत्रे हि डो विधीयत इति निर्विवादं। तत्र च अन्येष्व
प्युपपदेषु जनेर्डो दृश्यते इत्यक्षरार्थः। तेनाजो द्विजो नुज इत्यादि सिद्धं। एवमपि धात्वंतराद्विधायकाभावे प
रितः खाता परिखेत्यादि न सिध्येदित्याशंक्य तत्र वार्त्तिककृतोक्तं। अन्येभ्योपि दृश्यत इति। अयं च सौत्रदृश्य
पिग्रहणे सूचित एवार्थो वार्त्तिकेन विवृतो न त्वपूर्वः संगृहीतः। तथा च तत्र वृत्तिकार आह। अपिशब्दः सर्वो

शा०म०

८१

पाधिव्यभिचारार्थः। तेनध्वान्तवंतरादपि भवति परितः स्वाता पदिश्चेति। दशिग्रहणं त्कारकांतरेकांतरे चेत्या
दित त्रैव स्पष्टं। एवं स्थिते सौत्रेणैवानेन परिश्चेत्यादेरिवनगोग इत्यादेरपि सिद्धौ ऽनंतास्यं तेति प्रकरणे ऽन्य
त्रापि दृश्यत इति वार्त्तिकं न कर्त्तव्यमेव। क्रियमाणं वा एतस्य त्रसिद्धार्थविवरणपरतया नेयमित्याशये
न भगवतोक्तं। गमेरपि सर्वं ज्ञेव त्कव्य इति। नन्वेवमपि ङित्वं व्यर्थमेव। गमेर्विचैव सिद्धे गमेर्डोः इति डो प्रत्यय
विधाने नमकारस्य गुणं उकारे न भवतीति ज्ञापितत्वात्। तस्माड्डु प्रत्ययस्य ङित्वं पूर्वोक्तरीत्या ज्ञापकमेव। किं
वा डोप्रत्ययविधानमेव न व्यंजनस्य गुणं इति ज्ञापयति। अन्यथा विचैव सिद्धे किं तेनेति चेन्न। विचि हि सति गु
णः क्रियमाणः सानुनासिकं उकारस्यादिति निरनुनासिकसिद्धये डोप्रत्ययविधानादिति दिक्। अत्र वदंति।
तनोतेर्डउः सन्वद्वेति ङित्करणं न व्यंजनस्य गुणं भविष्यति। यत्तु शास्त्रातिदेशो ऽयं कार्यातिदेशो वा। आद्ये ऽ

श० कौ०
८८
८९

र्लेन विषतीत्यत्रेव द्विर्वचनेचीति स्थानिवद्भावेन तँ तँ ऽऽत इति स्थिते सन्यत इतीकारः सानुनासिकः स्यात्। द्विती
येतु ऽभ्यासकार्यं दुर्लभमिति। तन्न। आद्येगुणानां भेदकत्वादिमोऽयमेतिवदुपपत्तेः। द्वितीयेपिवर्ष्णुर्जुहूरि
त्यादावर्थवत्वग्निकारीयद्वित्वे ऽभ्याससंज्ञास्वीकारात्। अत एव लिटि धातोरिति सूत्रे धातुग्रहणं तिष्ठतु
तावस्मान्यासिकमिति भाष्ये। आदेच इति सूत्रे धातुग्रहणानुवृत्तेराप्ता ततो भाष्ये प्रदर्शितत्वेपिष्यङ्गौ। ध्वि
भाष्ये ऽनन्तु वृत्तेरेव सिद्धं तिततसा भाष्याग्रायस्ये स्वमेव वर्णनीयत्वादिति दिक्। किं च। यथा स्थानेंतरत
मपरिभाषासंस्कृतावनुनासिकपरसवर्णविधौ स्थानप्रयत्नाभ्यामंतरतमं एतन्मु रदिस्तु ऽ करोषीत्या
दिकं विषयं लक्ष्यी चरितार्थौ वितु मुरवः कुं डं रथेनेत्यादौ न प्रवर्त्तेत इति हयवरट् सूत्रे सिद्धांतितां तथेहापि राम
सार्वधातुकनुस्विगुणंसिविवक्ष्याद्यः। नेता। अविभयुः। अनैषीदित्यादौ चरितार्थाः उं मिता अनेनिजुरमैषीद्

त्यादिषु न भविष्यंति। नचैवं नेताऽग्ने षोदित्या दावेव स्थानगुणप्रमाणेष्विमिरांतर्य जो भाद्वेताऽग्नेषोदि
त्यादौ प्रमाणांतर्यविरहेण गुणवृद्धी न स्यातामिति वाच्यं। स्वव्यस्य दः कारस्व ः कित्करणेन प्रमाणतऽआंतर्य
स्याविवक्षाया ज्ञापनात्। नचैवमपि ईहिताईशिते त्यत्र कंठतालव्ययोर्विवृततयोस्व हकार शकारयोस्थानदशा
वेवऽग्रदेतौ स्यातामिति वाच्यं। नाऽज्झलाविति सूत्रस्यप्रत्याख्यानावसरे ऽग्रपणमीषद्विवृततायाः सिद्धांतयि
ष्यमाणत्वात्। नचैवं वृद्धिविंतकरणैः स्वरास्ताभ्यामेउ विवृततरावित्यादिशिक्षासु रोध्याद्वेतानेते त्यादाव
पि गुणप्रवृत्तिः स्याद्विवृतविवृततरत्वकृतवैलक्षण्यसत्वादिति वाच्यं। तथासति विधेर्निर्विषयतापत्तेः।
ऽग्रयः करणमित्यादिनिर्देशैः कुसन्वमरश्चप्रभृतीनां कित्वेन ववृकारादिषु गुणप्रवृत्त्यनुमानाद्वा। आसंध्यक्ष
रव्यंजनेष्वलु गुणाप्य प्रवृत्तिरेवोचिता। तथा च निर्देशाः। याति वाति द्राति प्साति ध्यायतेः संप्रसारणं च। वहति

चिनोति देदीधीवेव्यादि। अथ क्ङोः कित्वेनापि गुणवृद्धिविध्यावंतरतमपरिभाषयानुपस्थितिरिव स्यादप्यता
मिति चेन्नास्यामपीकः परिभाषायामीकारस्याकारादिनिवृत्तये अंतरतमपरिभाषाया आवश्यकत्वादि
ति। तदेवोडुर्दीत्वादनंतर्यान्निर्दिष्टस्यावनिराकृतं। व्यंजनं भाष्ये एवैव आकारस्यवनिराकृतः। तस्मादपर्थं सूत्र
मिदं। अपयपुत्तरार्थता। विभज्यायोगं किमिति परिभाषात्वमिष्यते। अत्रोच्यते। क्ङितिचेति सूत्रे चकारस्य इति
शब्दपर्यायतामाश्रित्य इक इति ये गुणवृद्धी तयोर्निषेध इति तावद्वक्ष्यते। अन्यथा लैगवायन इत्यत्र उद्गुणो
पि निषिध्येत। उपगवादिस्तु तस्यावकाशः। तथापो रोहित्यमित्यत्रादिवृद्धिश्च नस्यात्। एवं स्थिते यदीयं परि
भाषा प्रत्याख्यायते तदा कथं चित्त त्रतत्र गुणवृद्धिविधौ इकामेव स्थानित्वपर्यवसाने पि इक इति पदानु
वृत्तेरेणेनेष सक्षणत्वविरहान्निषेधो न प्रवर्तेत। ततश्च कृतः कृतवान् कुरुतः। छिन्नं छिन्नवानित्यादि न सिध्येत।

राम
८६

निषेधसूत्रं व निर्विषयं स्यात्। परिभाषापरित्यागपक्षे द्वरुक्षस्तणयोर्गुणवृद्ध्योरप्रसिद्धत्वात्। तदेतत्स्फुटीकृतं
भाष्यकृता। उत्तरार्थमेव तर्हि क्लिन्नर्थं वृद्धिग्रहणमिति। तस्य ह्ययमाशयः। यद्यपि सिविवृद्धिरिति विध्योर्वक्ष्यमा।
णरीत्या परिशेषादिकामेव स्थानित्वं लभ्यते तथापीग्लक्षणत्वं विना निषेध्यो न प्रवर्त्तेत। तस्मादुत्तरार्थं निषेध्य
प्रवृत्त्यर्थं वृद्धिग्रहणमिति एवं च वदता न्यायसाम्यात् गुणग्रहणस्याप्येतदेव प्रयोजनं सूचितं। कथं पुनर्गु
णवृद्धिविध्योः सर्वत्र परिभाषाव्यतिरेकेण इकः स्थानित्वपर्यवसानं येन निषेध्यार्थतावर्ण्येत इति चेत्। शृणु।
सार्वधातुकार्द्धधातुकजुसिवेति गुणौ तावदन्त्यपरिभाषया अंगान्त्ये अलि प्राप्तौ प्राग्युक्तज्ञापकादिति
रासंभवक्षरव्यंजनेभ्यो व्यावर्त्तिता विश्वे वदिश्राम्यतः। मिदिपुगंतलघूपधादिगुणेषु तु स्थानी निर्दिष्ट एव।
तथाहि। मिदेर्गुणः इत्यत्र मिद इति मिदिः तस्य मिदेरित्यर्थः। पुकि अंतः पुगंतः लघ्वी उपधा लघूपधा पुगंतश्च ल

श०कौ०
९०
90

ङ्वू पथ्यावेति समाहारद्वंद्वात्षष्ठी । नचैवं वाघयतीत्यादावतिप्रसंगः । संनिपातलक्षणपरिभाषया तदंतल
क्षणस्य पुकोगुणप्रवर्त्तकत्वात् । सछत्यृतामित्यत्रापि द्वयोर्लृतोर्दीर्घस्य वेति त्रयाणां प्रश्लिष्टनिर्देशः । त
था । ऋवर्ण्ं तस्य लृतः सछते रालृ छत्या सवर्णृ तस्य तेषामिति षष्ठी तत्पुरुषद्वंद्वो भयगर्भो द्वंद्वः । स्त छ
त्याव ऋाव स तस्यैति त्रिपदद्वंद्वो वा । तेन रूछत्यरकारस्य स्थानित्वं भवेत्ते । वस्तुतस्तु वत्तुर्णमिह प्रश्लेषो बोध्यः ।
तेनारिवान् । सर्वाभ्रुणान्या रूपीदित्यादावर्त्तेः क्नसो गुणः सिद्धः । पुनर्विधानसामर्थ्यात् । अन्यथा क्नसोः कित्करण
सामर्थ्याग्नितीवनित्यत्रेव गुणे निषिध्येत । एतच्चक्नसुस्वेति सूत्रे स्फुटीकरिष्यामः । तथा । सदृशोऽडीत्यत्रापि अरङि
गुण इति योगो विभज्यते । ततः दृशः त्र दित्याद्यनुवर्त्तते । स्थूलदूरेति सूत्रेपि योगविभागः कर्त्तव्यः । स्थूलदूरयुवंस्वा ह्र
नां यणादिपरमित्येको योगः । क्षिप्रक्षुद्रयोः पूर्वस्य च गुण इति योगांतरं । तत्र स्थवीयानित्यादौ गुणे न सिद्धं ।

राम
९०

ऽऽभीयस्यासिद्धत्वाद्यस्नसोरल्लोप इति तपरकरणे नानित्यताज्ञापकात्। भाष्यकृता प्रत्याख्यानाच्च। यण
ऽऽदिर्यणादिः। ततः परमिति समासः। तथा वक्ष्ति प्रक्षुद्र्योर्यण आदीपकारउकारे ततः परस्परशब्दस्य लोपः।
ताभ्यामेव च पूर्वस्येकारस्य उकारस्य च गुण इत्यर्थः। तदिदं गुणः सर्वेष्वपि विश्रांताः। मतेऽर्द्धव्रपि ऽपवादस्य
प्रकृष्यते। मतेऽर्द्धिरवः। ततोऽणिति ऽवन इत्येव। न चैवं ऽप्रमार्ट्ठ इत्यत्र ऽटोपि वृद्धिः स्यादिति वाच्यं। णादेशे
सुकृते ष्वडिति पक्षपरत्वाद्धृद्धौ सत्यां ऽप्रट्। तत्र कृते पुनर्वृद्धिर्न भवति। सकृत्प्रवृत्त्यावस्तितार्थत्वात्। यदा तु
ऽप्रसिद्धवत्सूत्रप्रत्याख्यानाय ष्णुङिति द्विलकारकनिर्देशमाश्रित्य उपदेशेऽजार्द्धधातुक इत्यनयोरन्यतरद
नुवर्त्यनालावस्थायामेवाट्ठ्रियते। एरनेकाच इति विभज्य यणो यणि स्तुवर्त्य ऽनेकाचश्चेत्तर्हि यण एवेति
नियममाश्रित्य ऽध्यैयाताम् इत्यादौ यण्वार्यते। तदा [illegible] वस्थायां यद्यपि वृद्धिर्न भवति। नकाराणंङित्वेन

शा० कौ०
९१
९१

मृष इत्यादा विवतन्निषेध्यात्। ततश्चांतरं गत्वा इडागम एव। तथापि-अंत्याभावें त्यसदेशस्येति परिभाषा
माश्रित्य-अटो वृद्धिर्निवर्त्तनीया। परिभाषाप्रत्याख्यानपक्षे तु अंगाक्षिप्तेन प्रत्ययेनाज्विशेष्यते। येन ना
व्यवधानन्यायाच्च सिद्धममार्ट् इत्यादिरूपं। सिचि वृद्धावपि विधेयायां नास्तीकपरिभाषाया उपयोगः। व्या
वर्त्याभावात्। न च-अविचकीर्षीदित्यकारो व्यावर्त्यः। एयश्लोपा वियङ्। यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रति
षिद्धमिति वचनादल्लोपे नैव सिद्धत्वात्। अन्यथा विकीर्षक इति नस्याच्चिकीर्षक इति च प्रसज्येत। आ
कारस्य तु नास्ति विशेषः। सगिड्भ्यां बाधस्वेत्युक्तं। एजंतमपि न संभवति-आत्वविधानात्। रैनौग्लौशब्दाना
माचारक्विबंतानां सत्यामसत्यां वा वृद्धौ न कश्चिद्विशेषः। जो शब्दात्क्विपि-अगवीदित्यत्राति नाति प्रसंगः। स्तृत
इत्यातोरित्यतोनुवृत्तेन धातुग्रहणे न सिजाक्षिप्तस्य धातोर्विशेषणे सति धातुरेव यो धातुर्न तु कथं वित्रा राम
९१

तिपदिकमिति व्याख्यानादिति कैयटादयः। नन्वेवं कवेः अकवायीत्। विधोः। अविधावीत्। पितुः अपितारी
त्। अंतरंगमपि गुणं सिचि वृद्धिर्बाधते इति वदन्माधवो विरुध्यते। सत्यं। यद्यपि विरोधः संपादनीयस्तथाप्यग्रहस्त
हीत्थं वर्णनीयं। धातोरिति विहितः इत्यप्यनुवर्त्तते। तत्र वाक्यभेदेन संबध्यमानं नियमार्थं संपद्यते। उदंतस्य धा
तोश्चेद्वृद्धिस्तर्हि धातोरेव धातोर्न तु नामधातोरिति। यद्वा नेटीत्यत्र नेटीत्यत्र नेति योगं विभज्य मंडूकप्लुत्या सं
बध्यात्रत्या वा गोतः इत्यनुवर्त्य उकारांतस्य वृद्धिर्निषिध्यते। अथवा बहुलं छंदसीत्यतो बहुलमित्यनुवर्त्य सि
चि वृद्धिर्नामधातोर्विगंतस्य भवति न तु उदंतस्येति कथंचित्समाधेयं। व्यंजनेषु तु अंतरतमपरिभाषाबलेनैवानु
नासिकपरसवर्णयोरिवातिप्रसंगो दुरुद्धृत एव। अभ्युपेत्यनु ब्रूमः। नाप्राप्तायां सिचि वृद्धावारभ्यमाणा हलंत
लक्षणा वृद्धिर्बाधिका भविष्यति। नेटीति निषेधस्तु हलंतस्य यावती वृद्धिः प्राप्ता सिचि वृद्धिरिति वा हलंतस्येति

वा तस्याः सर्वस्याः ननु सूत्रे विशेषज्ञापितत्वेऽप्याग्रहः। तेनाकोषीदमोषीदित्यादौ विभाषितवृद्धिर्निषिध्यत इति
सर्वं सुस्थं। तस्मान्निषेधसिद्ध्यर्थमिग्लक्षणतां संपादयितुं सूत्रमिति स्थितं। स्यादेतत्। स्तः कृतवान्छिन्नश्छिन्न
वानित्यादौ निषेधसिद्धये गुणग्रहणमस्तु। वृद्धिग्रहणं तु व्यर्थं। न च मृष्टो मृष्टवानित्यादौ निषेधसिद्धिस्तत्फलं।
एवं स्थितेऽत्रादौ तयोर्गो विभज्यते। नियमार्थं वेदं। क्ङिति चेद्भवति अज्ञाद्यवेवेति। तेन मृष्टो मृष्टवानित्या
दिसिद्धं। ततो ज्ञादावपि विकल्पेनेत्येतदर्थं वेति द्वितीयो योग इति। तस्माद्वृद्धिग्रहणस्य फलं दुरुपपादमिति। अत्रा
हुः। लूस्तुतो भूविधूनने इति कुटादिषूपठ्येते। ताभ्यां कुटि। अनुवीदधुवादिति व्यते। तत्र सिचि वृद्धेः क्ङितीति निषे
धायेग्लक्षणतां संपादयितुमिह वृद्धिग्रहणमिति। नन्विहांतर्भूतसिज्मात्रापेक्षत्वादंतरंगत्वाद्वृद्धिकृते हलंतत्वा
न्नेटीति निषेधः सिद्ध इति चेन्न। सिच्यंतरंगं नास्तीति सिद्धांतात् दुवउः प्रागेव वृद्धिप्रसंगात्। स्यादेतत्। अंतरंगबली

नचैवमचैषीदहैषीदित्यादौ गुणः स्यादिति वाच्यं। तस्यैव वृद्धिसंभवे नेष्टापत्तेः। नह्यत्रनीविध्याविग्रहणमस्ति। येन एकारस्य वृद्धिर्न लभ्येत।१

यद्दति तावदवः परस्मिन्निति सूत्रे स्थापयिष्यते। तदविशेषात्सिच्यप्यस्तु। नचैवमप्यस्तोषीदित्यादावंतरंग
त्वाद्गुणे कृते उतो नेति व्याख्यानपक्षे वृद्ध्यसंभवः। वकुलग्रहणादनिगंतानां नेति पक्षे तु अवैषीदित्यादावपि दोष
एवेति वाच्यं। उतो ध्यातोरेव ध्यातोर्नतु नामध्यातोरिति तृतीयपक्षाश्रयणेन सर्वसमाधानात्। अकार्षीदित्यादौ
तु लहंते लक्षणेन वृद्धिरस्तु। अतारीदित्यादौ तु अंतरंगत्वाद्गुणे कृते हलंतलक्षणायां वृद्धौ नेटीति प्रतिषिद्धा
यामतो हलादेरिति विकल्पं बाधित्वा अतो ल्रांतस्येति नित्या वृद्धिः। अजावीदित्यादावपि अंतरंगत्वाद्गुणे वा
देशयोः कृतयोरतो ल्रांतस्येत्यत्र लोपो व्योरिति लोपेन वकारस्यापि व्यवधानान्नित्या वृद्धिर्भविष्यति। मा
भवानवीत्। अमवीदित्यत्रापि तर्हि नित्या वृद्धिः स्यादिति चेन्न। हलि ग्रहणमपनीय तत्स्थाने अविमव्योः प्रक्षे
पेण वृद्धिर्निषेध्यात्। नचास्मिन्पक्षे हलिग्रहणमुपयुज्यते। अनयीदस्वयी दित्यत्रांतरंगत्वाद्गुणयादेश

योः कृतयोर्यतात्वानां नेत्येव निषेधसिद्धेः। नन्वेवमवेरिव मवेरपि नित्यं निषेध एव स्यात्। दृश्यते तु विकल्पः। नै
ष दोषः। अतो ल्रांतस्येत्यत्र वकारप्रश्लेषेण या नित्या वृद्धिः प्राप्ता सैव हि अविमव्योर्नेत्यनेन मवेर्निषिध्य
ते। ननु अतो हलादेरित्येषापि। मध्येऽपवादाः पूर्वान्विधीन्बाध्यन्ते नोत्तरानिति न्यायात्। नैवं जागर्तेरपि
तथा प्रसंगः। तत्र बाध्यसामान्यचिंतामाश्रित्य स्वविषये प्राप्तं सर्वं बाध्यत इति स्वीकारात्। यद्वा अपवादे नि
षिद्धे उत्सर्गो न प्रवर्तत इति जागर्त्यावाश्रयणीयं प्रवृत्तौ तु प्रवर्तत इति बाध्यसामान्यविशेषचिंतयोः बाध्ये
निषिद्धे बाध्यस्य प्रवृत्त्यप्रवृत्त्योः स्वलक्ष्यानुरोधेन व्यवस्थाया अनुपदमेव वक्ष्यमाणत्वात्। नन्वेवमगवीदित्य
त्रापि नित्या वृद्धिः स्यात् हकारप्रश्लेषादिति वाच्यं। सिचि वृद्धेरिवास्या अपि स्यात्तु ग्रहणेन वारणात्। तस्मात् सिच्यं
तरंगाश्रयणेनैव अनुवीदध्रुवीदित्यादेः सिद्धौ क्ङिति चेति प्रतिषेधस्यानपेक्षणात् वृद्धिग्रहणं व्यर्थमेवेति।

अत्रोच्यते। वकारप्रश्लेषे सति शवतिर्गतिकर्मा कंबोजेषु विकार एवैनमार्य। भाषंत इति पस्पशायां भाष्यका
रैरभ्युपगतस्य शव्धातोरपि निसर्वद्धिप्रसंगः। तस्यापि प्रतिषेध्ये वाक पं ह्नि श्विभ्यां निमानं। गोरवप्रसंगात्।
किं वा नवयं व्यसनितयास्मिन्नंतरंगं नास्तीति ब्रूमः। किंतु न्यायबलोद्भूपकबलात्क जानुरोधाद्वा। तथा हि। ये
न नाप्राप्ते न्यायेनांतरंगं बहिरंगेण बाध्यते। सत्यपि संभवे बाधनं भवतीत्यभ्युपगमात्। अन्यथा तक्रे एदधिन बाध्ये
तस्मिन् कजादिभिश्च शप् प्रत्ययकप्रत्ययादयो न बाध्येरन्। देशभेदेनाभयसंभवात्। न च मध्येपवादन्या
येनोवङः वङ्क्षाबाध्येत न तु गुणोपीति वाच्यं। बाध्यस्य भेदेन विवक्षायां सत्येतदेवं स्यात्। बाध्यसामान्यचिं
तायां तु स्वविषये प्राप्तं सर्वानपवादभूतं सर्वं बाध्यते यथा अविरहत्यनेन गुणदीर्घत्वानि। अन्यथा तत्रापि म
ध्येपवादन्यायेन रेफो दीर्घत्वे एव बाध्येत न तु गुणः। तस्य परत्वात्। बाधस्य च क्वचिद्भेदेन चिंता क्वचित्तु सा

ग्रा० कौ०
६८
95

मान्यरूपे ऐत्युभयमपि लक्ष्यानुरोधात्तत्र तत्राश्रीयते। णिश्रिग्रहणं वात्र लिंगं। अन्यथा अंतरंगत्वाद्गुणे
यादेशयोः कृतयोः पर्यंतानां नेति निषेधादेवो नयी दश्वयीदित्यादेः सिद्धौ किं णिश्रिग्रहणेन। ज्ञापकांतरम
प्युक्तं भाष्ये। यश्च करोत्यकारग्रहणं लघोरिति कृतेपीति। अस्यायमाशयः। अतोहलादेरिति सूत्रे अग्र
हणस्यनन्तावसंध्यक्षरादिकं व्यावर्त्यं। लघुग्रहणेनैव तद्व्युदासात्। इदुदतः परमवशिष्यंते। अवेतीत्
अकोषीत् अनतीदिति। तेष्वंतरंगेण गुणेनापहृता स्थैत्तर्हि व्यर्थमद्ग्रहणं स्यात्। न च अकुरीदपुरीदित्या
दावुकारव्युदासाय तदिति वाच्यं। तत्रापि अंतरंगेण गुणेन वृद्धिबाधे सति गुणे कृते लात्। निषेधेपि वृद्धेरप्र
वृत्तेः। नहि देवदत्तस्य हंतरि हते देवदत्तस्य पुनरुन्मज्जनं भवतीति न्यायात्। अतएव नोतः पादमिति पाठे पू
र्वरूपनिषेधे सति अयादयोपि न प्रवर्त्तंते स्तुनाते अम्ब सन्नते इत्यादि च सिध्यतीति स्वीकृतं भाष्ये। नवैवं

राम
६४

अपवादाभावे पुनरुत्सर्गस्य स्थितिरिति निर्विषयं स्यात्। वृक्षावित्यादौ नादिचीति पूर्वसवर्णनिषेधे वृद्धिश्च न प्रवर्त्ते
तेति वाच्यं। मिथो ध्यौ नदेतौ स्यादित्यादिलिङ्गेन अपवादे निषिद्धे उत्सर्गोपि न प्रवर्त्तत इत्यस्य असार्वत्रिकत्वा
भ्युपगमात्। तदेतज्ज्ञत्वतत्रोच्यते। नो सहते प्रतिषिद्धः सती बाधितुमिति। तथा च। पक्षान्तेदःस्थ्येण अतो हलादेरि
ति अज्झलणमविज्ञापकमिति स्थितं। फलमप्यस्ति। यदि हि सिव्यन्तरंगं स्यात्तर्हि विनीषन्त्यसुभ्यो पङ्कुगन्ते
भ्यः विरिणोति भ्यां व ज्जुडि सिवि अवे चायीदने नायीदविरायीदतिरायीदिति न स्यात्। गुणयादेशयोः कृतयोर्यन्ता
नां नेति प्रतिषेधप्रसंगात्। यदि तु बाध्यविशेषचिंतयामप्यपवादन्यायमाश्रित्य उवङेव बाध्यते न तु गुण इत्या
श्रीयते तदाप्येतन्न सिध्येदेव। तस्मात्सिचि सर्वमप्यन्तरंगं नास्त्येवेति सिद्धान्तं साधयितुं बाध्यसामान्यचिंतैवा
श्रयणीया। एतदर्थमेव हि भाष्ये ज्ञापकोपन्यासः कृतः। अन्यथा न्यायेनैव सिद्धे तरंगस्यापि बाधे किं ज्ञापकवर्णे

नेना। एवं स्थिते न्यनुवीत् न्यधुवीदित्यत्र क्ङिति चेति निषेध एवाश्रयणीयस्तथा चेग्लक्षणत्वसिद्धये वृद्धिग्रहण
मपीह कर्त्तव्यमेवेति स्थितं। एवं च सति असंभवादपि व्यासिध्यंतरंगं सर्वं बाध्यते। यदि हि स्यात्तर्हि क्वापि सिचीयं
तमंगं न लभ्येमैवेत्यवधेयं। तथा चाद्ग्लक्षणत्वस्य निषेधप्रवृत्त्यर्थमावश्यकत्वे स्थिते तत्र तत्र प्रासंध्यक्षर
व्यंजनादिव्यावृत्तिरपि इक्परिभाषयैव सिध्यतीति ज्ञापकं वर्णनादिक्लेशोपि नाश्रयणीयः। न चैवं द्यौः पंथाः इमं दध्या
दावपीक्पदोपस्थितिर्विधशब्दिकामेव अत्वमात्वमत्वं च स्यादिति वाच्यं। गुणवृद्धिशब्दयोरनुवृत्तौ पुनर्गुणवृद्धिग्र
हणसामर्थ्याद्विशिष्टव्यापारोप्याश्रीयते। गुणवृद्धी ये गुणवृद्धी न तु शब्दांतरेण विहिते इति। अनुवृत्ताभ्यां विशे
षणाद्धा। न च वश्चेति सूत्रे ह्रस्वादिग्रहणानुवृत्त्या संज्ञया विधाने पदोपस्थितिरिति स्थास्यति। तत्सामर्थ्याद्दिव अ
पथिमथ्यृभुक्षामात् दादा नाम इत्यत्र इक्पदोपस्थानं न भविष्यति। यदि हि स्यात्तर्हि वश्चेत्यत्र संज्ञया विधाने इति
यत्नाश्रयणं व्यर्थं स्यादिति चेन्न। दिव उदित्यादिषु गुणवृद्धिसंज्ञकेषु च इक्परिभाषानिवर्त्तनेन चरितार्थत्वात्।

ऽस्पृष्टत्वेन आविर्भक्ताविनाभावित्वाद्गविकोऽसंभवेन तत्र चरितार्थत्वात् ॥ तस्माद्यौः पंथाः इममित्यादि सिद्ध
ये इहापि संज्ञाविधाने नियमं संपादयितुं पुनर्ग्रहणं वृद्धिग्रहणमिति प्रांचः । ननु पंथा इत्यनुदाहरणं । इ
तो दितिसिद्धे आद्धिविसामर्थ्यादेवेकृपदस्यानुपस्थितेरिति चेन्न । समुक्षि सकारौकारयोर्वर्णे आद्धिविसंभ
वात् । न चेकः सोऽस्यानंतर्यविवक्षणं येनानाव्यवधानाश्रयणं स्यान्नैवमिति वाच्यं । तथापि संबुध्यर्थतया
सामर्थ्यापक्षयात् । नवैवमित आदित्येव ब्रूयादिति वाच्यं । समुक्षणमिंद्रमित्यस्यासिद्धापत्तेः । आद्धिवो
हि वाक्यपूर्वस्यैवेति तत्सिद्धिरिति दिक् । यत्तु भाष्ये सइममित्युदाहृतं तत्र सइमं मंत्रमपश्यदिति ब्राह्मणे वा
क्यैकदेशानुकरणमात्रं । उदाहरणं तु इममित्येवं नतु सइत्यपि । तच्छुद्धेः इकोऽसंभवेन इकः इति नियमस्याप्र
वृत्तेरित्याहुः । वस्तुतस्तु सइत्यप्युदाहरणं साध्व्येव सत्यादौ नाम इति हि विधिर्वाच्यं । तत्र चेकः इत्यस्योपस्थि

तौ ह्रीदमोरेवात्वं स्यान्न त्वन्येषां। गुणेन निर्दिश्यस्तु संज्ञोपसर्जनव्यावृत्त्यर्थमुक्तस्यार्थस्य स्यात्। तदोः सः सावित्ति स
त्वं हि त्यदादीनामेव तदोर्विधीयते। अत्रेदमवधेयं। शाब्दपौर्व्यो शास्त्रयणं तु रोधे नापि गुणवृद्धिग्रहणं मास्तु।
इकस्तौ इत्येतावतैव सिद्धेः। वस्तुतस्तु तावित्यपि व्यर्थं। इक इत्येव सूच्यतां। संपूर्णं सूत्रद्वयमनुवर्त्य वृद्धि
रिति आदैचौ यत्र विधीयेते गुण इति च अदेङौ तत्र इक इत्युपतिष्ठत इति व्याख्यानात्। नचैवं गुणवृद्धि वि
कारेषु नर्गुणवृद्धिग्रहणसामर्थ्यादिति उत्तरग्रंथासंगतिः। तस्य यथाश्रुताभिप्रायकत्वात्। ग्रहणपदस्या
नुवृत्तिपरतया संपूर्णसूत्रद्वयानुवृत्तिसामर्थ्यपरत्वाद्वेति दिक्। व्याख्याने लिंगं तु इतोदितीग्रहणं। अ
न्यथा तत्रापीकपदोपस्थितौ उकारात्यायेन नाव्यवधानन्यायादकारेकारव्यावृत्तौ व सत्यां किं तेनेति त
देतदिग्ग्रहणं किमर्थमिति भाष्येण इग्ग्रहणमासंध्यक्षर इत्यादिवार्त्तिकेनं च सूचितं। अन्यथा हि सूत्रं कि

मर्थमित्याद्येव ब्रूयात्। यत्तूत्तरार्थं गुणवृद्धिग्रहणं कर्त्तव्यमेवेत्याशयेनेग्ग्रहणमित्युक्तमिति भाष्या
भिप्रायवर्णनं। तन्न। पूर्वसूत्रानुवृत्त्यैव सिद्धवुत्तरार्थत्वस्यापि दुरूपपादत्वात्। समुदायापेक्षाया मंडू
कप्लुतेः संबंध्यानुवृत्तेर्वा त्वयापि वाच्यत्वात्। इग्ग्रहणस्याप्युत्तरार्थतया तदंशेपि शंकानुत्थानात्। इकइ
तियोगः किमर्थं किं मन्यत इति प्रश्नबीजमिति चेन्न हि गुणवृद्ध्यंशेपि तस्याविशिष्टतया सूत्रं किमर्थमित्येव ब्रू
यादिति दिक्। यत्तु प्रधानावयवद्वारा समुदायाक्षेपो यमिति तदपि नानीवशब्दस्वरसानुगुणं। तस्मादुक्तए
वाशयः साधुः। एवं च इक इति योगविभाग एव पूर्वपक्षसिद्धांताभ्यां समर्थ्यत इतीह पर्यवसितोर्थः। ततश्चा
नेन एकेन योगविभागेन सकलेष्टसिद्धौ मृजेर्वृद्धिरचः ञ्णिति गुण इत्यादिबहुतरयोगविभागाप्या
श्रयणेनान्यथासिद्धिवर्णनं नादर्त्तव्यमिति स्थितं। इयं च परिभाषाऽलोन्त्यपरिभाषायाः शेषो वाशे

बिभक्तता वा तया सह समुच्चिता वा वैकल्पिकी वा तदपवादो वा पूर्वविप्रतिषेधात्तद्बाधिका वा पदो
पस्थापिका वेति सप्त पक्षाः संभाव्यंते यद्यपि तथाप्याद्यानां षण्णां दुष्टत्वात्सप्तम एव सिद्धांतितः । तथा
हि । सार्वधातुकार्द्धधातुकयोरित्यत्र स्वस्वनिमित्तावशगत्परिभाषाद्वयं सन्निहितं । तत्रांगस्येति षष्ठीय
दि पूर्वमेवांत्यमलं नीता । अंगांत्यस्य गुण इति पक्षादिकाऽसंत्यो विशेष्यते तदा इकः परिभाषाशेषं नेता । य
दि तु पूर्वमिकाऽङ्गस्य विशेषणं तदंतविधिः । इगंतस्यांगस्येति ततः स च भवन्नलोंत्यस्येति तदा द्विती
यः पक्षः । तदिदं पक्षद्वयमपि षष्ठीतत्पुरुषं बहुव्रीहिं चाश्रित्य तच्छेषपक्ष इति भाष्ये व्यवहृतं । इह पक्षद्व
येपि भिदेर्गुण इत्यादौ दोषः । यो हि भिदेरंत्यः नासाविक् यश्चेक् नासावंत्यः । तथा चावश्यं परिभाषायां त्यक्त
व्यायां विनिगमकाभावादुभयत्यागे सर्वादेशो गुणः स्यात् । तदुक्तं वार्त्तिककृता । वृद्धिगुणावलोंत्यस्येति चे

न्मिदिमदन्निपुगंतजंबूपयार्द्धि दक्षिणप्रक्षद्वेषिग्रहणं। सर्वदिशप्रसंगस्यानिगंतस्येति। वकारो हेत्वर्थः।
ततश्च सर्वदिक्प्रसंगो होत्तिफलितं। अथ मिदः द्रुर्मिदिः। तस्य मिदेरित्यादि पूर्वोत्तरात्याकथंचिदिह सर्वत्र
क एवस्थानित्वं लभ्येत तथापि मिन्नमित्यादाव निरनक्षणत्वात्कुणनिषेध्यो न स्यात्। अथ कोः किंत्वोत्नाप
कादनिरनक्षणत्वेपि निषेध्यः। तर्हि लैगवायनः पौरोहित्यमित्यादावतिप्रसंगः। अथ लक्ष्यानुरोध्यात्त्वजंबूप
थगुणमात्रविषयकं ज्ञापकं तर्हि पदोपस्थितिपक्ष एव लक्ष्यसिद्धये समाश्रीयतां। एवं हि ज्ञापकाश्र
यणक्लेशोपि न भवति। किंत्वेनापि पदोपस्थितिरेव ज्ञाप्यतां। एवं हि ज्ञापकमलकं वाक्यांतरं न कल्प्यमि
ति लाघवं। अस्तु तर्हि तृतीयः पक्षः मिदेरंत्यस्य इक इत्यनयो रपिगुण इति। मैवं। स्थानेयोगावयवसंबंधरूप
स्यार्थद्वयस्य युगपदुक्त्वा इतिया षष्ठ्या दुर्लभत्वात्। स्थानेयोगत्वं विना लोंत्यविध्यलाभात्। स्थानषष्ठी हि त

श्रा०कौ०
९८
९४

व

दुपस्थितो लिंगमिति वक्ष्यते। इक इत्यनेन सह यवषष्ठी विनान्वयायोगात्। अनादन्त्यादेः प्रमाणाभावाच्च।
एतेन मिदेः स्यस्य वा इको वेति चतुर्थपक्षोऽपि प्रत्युक्तः। विकल्पस्याष्टदोषग्रस्तत्वाच्च। अस्तु तर्हि तदपवाद इ-
ति पंचमः पक्षः। तथा हि गुणविध्यावंगस्येति न स्थाने षष्ठी। किंतु इगपेक्षया अवयवषष्ठी। ततश्च लिंगाभावा-
दलोऽन्त्यपरिभाषाया अनुपस्थितिः। अयमेव च बाधपदार्थः। यदा तु परिभाषा न भवेत्तर्हि स्थानषष्ठीत्वं तन्मू-
लकालोऽन्त्यपरिभाषोपस्थितिश्च स्यात्। सत्यां विकल्पपरिभाषायां तदुभयं नेत्येतावतैवापवादत्वव्यवहारः। न
हि वस्तुतो वचनेन प्रापितस्य बाधः संभवति। शास्त्राप्रामाण्यप्रसंगात्। अतः शास्त्रतात्पर्यसंकोचो बाध इत्या-
हुः। एतेन द्वंद्वापवाद एकशेष इत्यपि व्याख्यातं। न हि अनुत्पन्नायां विभक्तौ द्वंद्वस्य प्रसंगः। किंतु यद्येकशेषो
न भवेत्तर्हि प्रत्येकं विभक्तिर्द्वंद्वश्च स्यात्। सति त्वेकशेषे तन्नेत्येव तत्त्वं। अस्मिंश्च पक्षे अनुत्पन्ने अजुहवुरित्यत्र राम
९८

वाने निङ्कुः पर्यवेविविषुरित्यादावपि स्यात्। सार्वधातुकार्द्धधातुकयोरितिगुणः भवतीत्यादाविवर्द्धितेऽस्य
आपि स्यात्। तथाच वार्त्तिकं। इक्ू मात्रस्येति वेञ्कुसि सार्वधातुकार्द्धधातुक ह्रस्वाद्यो गुणे षनंत्यप्रतिषेध
इति। अत्र ह्रस्वादीति ह्रस्वस्य गुणः। जसि वा। ह्रतोङि। सर्वनामस्थानयोः घेर्ङितीति गुणचतुष्टयं गृह्यते। तत्रा
हे अग्ने। अग्नयः। कर्त्तरि। अग्नये। बाभ्रव्य इत्यत्र यथा उर्गुर्णुत्यंतं गुणपंचकं भवति। एवं हे अग्निचित्। अग्निचि
तः संति। सुकृति। अग्निचिते। सोऽस्तु तदस्यापि स्यादिति वार्त्तिकार्थः। यद्यपीह निर्दिष्टस्थानिकत्वात्परिभाषा दु
र्लभा अग्निचिद्धस्वस्य विसंज्ञाभावाच्च घेर्ङितीत्येतन्न प्राप्नोतीति तथापि वार्त्तिकस्योक्तिसंभव मित्थं वर्ण्यते।
ह्रस्वस्य गुणे जसि चेति सूत्रयोस्तावद्ध्रस्वे नेग्विशेष्यते। दीर्घव्यावृत्तिश्च फलं। अथ अनियमे नियमकारिणी
परिभाषा कल्पिहोपतिष्ठतां। नहि ह्रस्वस्य स्थानित्वेऽतिप्रसंगोऽस्ति। अकारस्य ह्यकार एव गुणो भविष्यतीति

श० कौ०
६६
६१

ऋ्यात् तत्रेदं वक्तव्यं। ह्रस्वांतस्यांगस्य इको गुण इति सूत्रार्थः स्यात्। ततश्च हेऽ्पको ऽस्यादावनंत्यस्यापि
स्यात्। अग्निचिदित्यादिकं तु विशेषणव्यवच्छेद्यं स्यात्। तथा च ह्रस्वस्येकः त्यनयोर्न परस्परं विशेषण-
विशेष्यभावः। किं त्वनयोरेकमंगस्य विशेषणमपरमंगस्य विशेष्यमिति। यद्वा ह्रस्वस्येत्येतदंगस्य विशे-
षणं माभूदिति। अंगस्येत्यस्य स्थाने षष्ठीत्वं बाधितुं अनंत्यस्यापि गुणं संपादयितुं इकः परिभाषोपति-
ष्ठते। एवं सत उरित्युभयत्रापि अनंत्यस्य गुणविध्यानार्थंपदिभाषा स्यादेव। द्विसंज्ञा तु वर्णयोरेव न तु
तदंतस्येति पक्षं गृहीत्वा वोऽईती त्यस्य अग्निचिते इत्यादावतिप्रसंगो योऽन्यः। नह्यस्मिन्पक्षे सत उरित्या-
भ्यां घेः किंविद्धेलक्षणमस्तीति दिक्। ननु अस्मिन्पक्षे पुगंतेति सूत्रस्य नियमार्थत्वादाहितेत्यादौ न दोषइ-
ति चेन्न। यदि हि सार्वधातुकार्धधातुकयोर्लघूपधस्येवेति नियमस्तर्हि ह्रस्वपोर्गुणे दोषस्तदवस्थः। राम ६६

यदि तु लङ्रूपस्य सार्वधातुकार्द्धधातुकयोरेवेति नियमस्तत्प्राप्तौ हितेत्याद्दौ दोष एव। अथाद्वस्यादि
विध्योपि नियमः। तर्हि अनेनिजुरित्यत्र दोषः। न ह्येतन्नियमद्वयेनापि वारयितुं शक्यं। लङ्रूपत्वात्सार्व
धातुकपरत्वाच्च। हेर्बुद्धौ। बुद्ध्यः। पिववेहितः। पिबध्यः। उग्गवादिभ्यो यत्। बुद्धये। वद्धयः स्यादावनुपपा
भूतेघ्वतिप्रसंगस्तु दुर्वार एवेति तावद्वार्त्तिकहृदयं। वस्तुतस्तु अंगाक्षिप्तेन प्रत्ययेन श्नयमाऐनेत्वजुस्सा
दिनाइकोविप्रोषणात्सकलदोषनिरासे सति तदपवादपक्षोपि समर्थयितुं शक्यत एव। अंगमेव प्रत्ययेन
विशेष्यत इति गृहीत्वा परंभाष्यवार्त्तिकग्रंथप्रवृत्तिरित्यवधेयं। अस्तु तर्हि पूर्वविप्रतिषेध इति कोश्चीय
संमतः षष्ठः पक्ष इति चेन्न। इकचरिभावाधाभिरवकाशत्वात्। नहि परस्परपरिहारेणावकाशलाभेऽप्रसक्ति
विप्रतिषेधः। तस्माद्यदि सत्यपि संभवे बाधनं भवतीत्याश्रीयते तर्हि येन नाप्राप्तिन्यायोऽपवादत्वमेवायदि

ग०कौ०

१००

100

तुभ्यसंभवे बाध्यबाधकभावः अस्ति चेह संभवो यदुभयं स्यादित्याशीयते तर्हि तद्वेषादिष्वन्यतमपर्यव
सानं नतु क्रोडीयमतस्यावकाश इति स्थितं। तस्मात्पदे पस्थापनमिति सप्तमः पक्षः सिद्धांतसंमतः। तथा
हि। इक इति षष्ठ्यंतानुकरणं। नतु संक्षिप्तरं। स्वंरूपमिति वचनात्। न वा ... इ संज्ञेति निषेधः। षष्ठ्यंतस्या सं
ज्ञात्वात्। तदयमर्थः। यत्र श्रूयमाणे भवति वृद्धिर्भवतीति तत्र इक इति षष्ठ्यंतमुपतिष्ठते इति। तस्य च
पदैकवाक्यतयान्वयोंतरंगः। अस्मिंस्त्वपरिभाषात्वविधिवाक्ये एवांतरवाक्यार्थं बुध्वा तदेकवाक्यतया
संबध्यत इति तदन्वयो बहिरंगः। ततश्च जुसि चेत्यादौ इकोंगस्येति संभवति सामानाधिकरण्ये वैयधिक
रण्यस्यान्याय्यत्वादिकाङ्गे विशेषिते स्थानषष्ठी न विहतेति भवत्येवाऽत्यपरिभाषोपस्थितिः। मिदेर्गु
ण इत्यादौ तु सामानाधिकरण्यान्वयस्यासंभवान्मिदेरिक इति वैयधिकरण्येनान्वये सति स्थानषष्ठी विर राम

१००

हादलोऽन्त्यपरिभाषा नोपतिष्ठते। नव मिदेरंगस्येत्यनयोरवयवषष्ठीत्वेपि इक इति स्थानषष्ठ्यस्त्येवेति वा
च्यां। न ह्येषाऽलोऽन्त्यपरिभाषोपस्थितावुपयुज्यते। ऽष्टसमुदायात्मकस्थानिनः परभूताया एव षष्ठ्यास्त
दुपस्थापकत्वात्। इकश्चाऽल्रूपत्वात्। तथा चालोऽन्त्यपरिभाषा इकः परिभाषानंतरोपस्थितिका। न तु त
यासह युगपदुपतिष्ठते। येनाविशेषादुभयोर्निवृत्तिः स्यादिति सकलेष्टसिद्धिः। तच्चैष तदपवादपक्षयो
रपि दूषणमुद्धर्तुं शक्यमित्युक्तमेव। तद्धिह सप्तपक्षीमध्ये पक्षत्रयं दुष्टमेव। पक्षचतुष्टयं तु साध्विति स्थि
तं। नन्वेतत्सूत्रं ऽङ्गस्येत्यादिवदधिकारार्थमेवाकिं न स्यादिति चेन्न। एवं हि सति। इको गुणवृद्धी नेति न
मासंयुज्यैव पठेत्। सर्वस्य द्वे पूर्वत्रासिद्धमित्यादिवत्। नपुतरसूत्रोपस्थितिकत्वाविशेषे किंचित्संयु
ज्य किंचित्तु विभज्य पठितुमुचितं। वैरूप्ये हेत्वभावात्। प्रत्ययः परश्चेत्यादौ तु पारार्थ्याविशेषेप्यसंयुज्य

निर्देशो विधेयभेदान्न विरुध्यते। नापीदं विधिसूत्रं। पुनर्गुणवृद्धिग्रहणसामर्थ्यात्। तस्मात् व्याख्यानपक्षे
पि विधित्वानुवृत्तिसामर्थ्यादिति दिक्॥ ॥इति श्री शब्दकौस्तुभे प्रथमस्याध्यायस्य प्रथमे पादे तृतीय
माह्निकं॥ ॥न धातुलोप आर्धधातुके॥ ॥धात्वंशलोपनिमित्ते आर्धधातुके परे तन्निमित्तिके गुणवृद्धी
इको न स्तः। लोलुवः। पोपुवः। मरीमृजः। लोलूयादिभ्यो यङः तेभ्यः पचाद्यचि कृते यङोऽचि चेति यङ्लुकि लुङ्नि
तम्लतमचमेवाश्रित्य प्राप्ते गुणवृद्धी निषिध्येते। यद्यपि कृत्स्नस्य धातोरपि लुग्विधौ लोपोऽस्ति। तथापि। दुर
णो लोपश्चाद्दुः शब्दे उपपदे इणो धातोरिक्प्रत्ययो भवति धातोश्च लोपः। दुःखेन ईयते प्राप्यते दूरमिति। त
थाप्येवं विधे विषये गुणवृद्ध्योः प्राप्तिविरहान्निषेधवैयर्थ्यं। अतोऽत्र धातुशब्देन तदेकदेशो लक्ष्यते। धातु
लोप इति च यदि बहुव्रीहिस्तत्पुरुषः स्यात् तदा आर्धधातुकग्रहणं लोपविशेषणं वा गुणवृद्ध्योर्विशेषणं वा। तत्रा

वस्थादिभिन्नरूपभयविशेषणं वेति त्रयः कल्पाः। तत्राद्यपक्षे। आर्द्धधातुकनिमित्ते धातुलोपे सतियोर्क्लिंविनि
मित्ते गुणवृद्धी न भवत इति सूत्रार्थः स्यात्। ततश्च प्रपूर्वाद्दिधेः क्तप्रत्यये तन्निमित्तके न लोपे सति प्रे[illegible]इत्य ६२
त्र प्राप्नुवन्नाकुणेपि निषिध्येत। यो हि द्वयोः षष्ठीनिर्दिष्टयोः स्थाने भवति लभते सावन्यतरतो व्यपदेशमिति
इकः स्थानि कत्वस्यापि सत्वात्। न चैवमपि इग्लक्षणत्वविरहान्न निषेधः। जैगवायने गुर्वेणस्यैति वाच्यं। वे४
न लाक्षिणस्त्रे इक इत्यस्य स्वरूपपरतायां प्रमाणमस्ति। उत्तरसूत्रे तु वकार इति शब्दार्थकः प्रमाणमित्या
हुः। अस्तु वा। आर्धधातुकारम्भणबलेनेहापि इक इति स्वरूपपरं। तथापि भेद्यत इत्यादौ गुणे न स्यादि
ति तृतीयपक्षे वक्ष्यमाणदोषः। आद्यपक्षद्वयेप्यस्त्येवेति बोध्यं। ननु उपेद्धः प्रेद्धः इत्युदाहरणसं हेत्वि
संभवएव नास्ति। तथाहि। पूर्वं धातुः साधनेन युज्यत इति मते इद्धमित्यत्र न लोपो ऽन्तरंगः। प्रथमोप

धा० कौ०
१०२
102

नतत्कप्रत्ययापेक्षत्वात्। एवं धात्वुपसर्गयोरिति दर्शनेऽपि गुणेऽन्तरंगः। उभयथापि गुणे न विध्यति।
बहिरंगस्य गुणस्यासिद्धतया निषेधायोगात्। बहिरंगस्य निषेधस्यासिद्धौ गुणप्रवृत्तेर्निर्बाधत्वा
च्चासत्वं। असिद्धं बहिरंगमंतरंगे इति परिभाषा नेह प्रवर्त्तते। नाजानंतर्ये बहिष्ट्वप्रक्लृप्तिरिति निषेधा
त्। यत्रांतरंगे बहिरंगे वा अचोरानंतर्यमाश्रीयते तत्रैषा परिभाषा नेति व्याख्यानादिति हरदत्तानुयायि
नः। किंत्वस्मिन्पक्षे एतयेदिति सूत्रे पचावेदं पचामेदमित्यादौ एतये त्वं कुतो नेत्याशंक्य बहिरंगत्वेन गुण
स्यासिद्धत्वादिति हरदत्तेन वक्ष्यमाणं विरुध्यते। तथा बहिरंगस्यासिद्धताबलेन प्रेद्धमित्यादिसिद्धिरिति
प्रतिपादनपरमिहत्यं भाष्यमपि विरुध्येत। तस्माद्यत्र उत्तरकालप्रवृत्तिके अच-ज्ञानंतर्यं तत्र बहिरं
गपरिभाषा न स्यादिति कैयटसंमत एव नाजानंतर्य इत्यस्यार्थः साधुः। पचावेदमित्यादौ हि परत्वं गुणप्रव

राम
१०२

त्तिः। तत्रवाजानंतर्याश्रयणेपि गुणेपि गुणेन तरप्रवृत्तिके एतवे इत्यत्र तदनाश्रयणे युक्त एव बहिरंग
तयोर्ह्रस्वः। उपेद्धः प्रेद्ध इत्यादौ लुगुणं प्रापय्य निषेधः कार्य इति उत्तरकालप्रवृत्तिको निषेधः। तत्राजा
नंतर्याश्रयणाभावाद्बहिरंगपरिभाषया सिद्धमेवैतत्। अतोऽत्रत्यं भाष्यमपि संगच्छते। ननु एवं तु कोरसि
द्ध इति सूत्रेऽएवा परिभाषा ज्ञापयिष्यते। तत्र वकोसिवत्कोस्येत्यादौ प्रथमप्रवृत्तिके एङः पदांतादित्यस्मि
न्नजानंतर्ये निलुउत्तरकालप्रवृत्तेपीति कथं कैयटमतं समर्थनीयं तस्माद्यत्रांतरंगे बहिरंगे वाऽचोरानंतर्य
मिति हरदत्तोक्तरीतिरेव शरणीकर्त्तव्येति चेन्न। कैयटमतेऽपचोरिति द्वित्वस्याविवक्षया सर्वसामंज
स्यात्। अस्तिहि उत्तरकालप्रवृत्तिकेषत्वे अचआनंतर्याश्रयणं। इणः परस्य सस्येत्युक्तेः। एवंच प्रथ
मपक्षे प्रेद्ध इत्यादौ दोषाभावेपि मेद्यत इत्याद्यसिद्धिरेव दूषणमिति दिक्॥ ॥द्वितीयपक्षे तु य। कि

विनिमित्तके धातुलोपे सति आर्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात् । ततश्च क्नूयीश
ब्दे इत्यस्माण्णिचि विचि पुगि यलोपे कृते पुगन्तलक्षणो गुणो निषिध्येत तथा च क्नोपयतीति न सिध्येत् । यदि
तु वेले क्नोपे इति निर्द्देशाद्गुणः स्यात् इहापि भेद्यत इत्यस्यासिद्धिरेव दोषः । तृतीयपक्षे तु आर्द्धधातुकनिमि
त्तके धातुलोपे सति आर्द्धधातुकनिमित्ते गुणवृद्धी न स्त इति सूत्रार्थः स्यात् । तत्र तन्त्रावृत्याद्याश्रयणे प्रयु
क्तं गौरवं तावत्स्पष्टमेव । लोपेन सह गुणवृद्ध्योरेकनिमित्तकत्वं वन लभ्येत । ततश्च भेद्यत इत्यत्र भिदेर्ण्यन्तात्क
र्मणि यकि भिद् इय इति स्थिते नित्यत्वाण्णिलोपे कृते प्रत्ययलक्षणेन णिचमाश्रित्य क्रियमाणो गुणो निषि
ध्येत । न च णिलोपापेक्षयान्तरंगत्वाद्गुणोऽस्त्विति वाच्यं । विभज्यान्वाख्यानपक्षे तदसंभवात् । उपजनिष्यमा राम
णनिमित्तोऽप्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधत इति न्यायाच्च । अन्यथा द्ध्यतीत्यादावंतरंगत्वाल्लो १०३

त इति ऽन्तादेशः प्रवर्त्तेत। न च श्नौ द्वित्वे च कृते ऽन्तादेशस्य स्थानिवद्भावेनाद्भ्यस्तादित्यस्य प्रवृत्तिरस्त्विति
वाच्यं। अचि विधौ स्थानिवद्भावासंभवात्। किं वा समर्थानां प्रथमाद्वेति सूत्रे ऽकृतव्यूहाः पाणिनीयाः। कृतम
पि शास्त्रं निवर्त्तयंतीति ज्ञापयितुं समर्थग्रहणमिति वक्ष्यते। द्वे एते परिभाषे समानफले तथा च इहापि सर्वगु
णे न क्रियते तत्कृतोपि वा निवर्त्तेत जग्मुष इत्यादाविडादिवत्। तस्मादन्तो जेर्लोपो यस्मिन्निति बहुव्रीहिरेव साधुः।
एवं हि सति लोपस्य गुणं वध्योश्चैकमिनिकेन्ते त्वं लभ्यत इति न कश्चित्सर्वोक्तदोषः॥ स्यादेतत्॥ आरभ्यमाणे ऽप्यस्मि
न्सूत्रे लोलुव इत्यादौ गुणो दुर्वारः। तथा हि। इह सूत्रे निषेध्यं किमित्याकांक्षायां पूर्वत्र निर्दिष्टा इकूपदोपस्थितिरेव सं
बध्येत। ध्यात्वं श्रु लोपनिमित्ते आर्द्धधातुके इकूपदं नोपतिष्ठत इति। ततश्च वेभिदो मरीमृजो भिन्नो मृष्ट इत्यादौ व्यंज
नस्य गुणवृद्धिप्राप्तिः परमेतस्य प्रवृत्तकस्य फलं स्यात्। लोलुवादौ तु स्यादेव गुणः। न च परिभाषां प्रति शेषि

भूततयाऽर्थतः प्रधानयोर्गुणत्वं अयोरेव निषेध्योस्त्विति वाच्यं। शाब्दबोधे शाब्दप्राधान्यस्यैवान्वयनियामक
तायाऽउचितत्वात्। नहि राजपुरुषमानयेत्यादावर्थतः प्रधानभूतोपि राजाऽऽनयनेनान्वेति। अपितु पुरुष एव।
प्रकृते च शाब्दप्राधान्यं वाक्यार्थभूतायाः पदोपस्थितेरेव। कारकविशिष्टाक्रियावाक्यार्थ इति सिद्धांतात्। आ
ह च। साकांक्षावयवं भेदे परानाकांक्षशब्दकं। कर्मप्रधानं गुणवदेकार्थं वाक्यमुच्यत इति। किं च। सिद्धांते प्रसज्यप्र
तिषेधे सर्वत्र क्रिययैव सह नञोन्वयः। न तु नामार्थेन। तदुक्तं। प्रसज्यप्रतिषेधोयं क्रियया सह यत्र नञिति।
अत एव पुरुषवचनयोरसंकरः। अन्यथा हि घटो नास्ति त्वं नासि अहं नास्मीति पुरुषव्यवस्था न स्यात्। घटाभा
वस्त्वदभावो मदभावश्चास्तीति व सर्वत्र प्रथमपुरुषापत्तेः। नहि परमते त्वं नासि त्वदभावोस्तीत्यनयोरर्थे कश्चि
द्विशेषः। नञर्थप्रतिप्रथमांतपदोपस्थापितस्य अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन संसर्गेण प्रका

रताभ्युपगमेपिघुष्मस्मामानाधिकरण्यविरहस्याविशिष्टत्वात्। एवं वायो रूपाणामभावोस्तीतिवद्
पाणि न संतीत्यत्रापि ऽस्तीत्येकवचनं स्यादित्यन्यत्र विस्तरः। एवं कारकविभक्तेरपि क्रियायोगेस
त्येव साधुत्वं न त्वन्यथापीति कारक इति सूत्रे वक्ष्यमाणत्वाद्भूतले घटो नास्तीत्यादौ ऽधिकरणत्वं क्रि
यान्वय्येव न तु नञर्थान्वयि। तथा च सकलकारकविशिष्टक्रियायां नञर्थान्वयः। नञ्द्योतकतेति नि
रूढपक्षे तु क्रियापदस्यैव तद्विरहपरतेति सिद्धांतः। उभयथापि इहगुणवृद्ध्योः प्रतिषेधो दुर्लभ एवेति।
अत्राहुः। क्रिययैव सह विधेयत्वेन निषेधस्यान्वयः शाब्द इति सत्यमेव। किंतु क्रियैव केति संशये त्वदुक्तरी
त्या सन्निहितापीक्पदोपस्थितिर्हि न संबध्यते। यथादिसातिदीधीवेवीटामित्यस्य व्यर्थतापत्तेः। नहि तत्र
इक्परिभाषालोत्यपरिभाषयोः फलेविशेषोस्ति। एवं स्थिते ऽपस्तिर्भवंतीपरोऽप्रयुज्यमानोपि ऽपस्ती

तिप्रातिपदिकार्थसूत्रे वक्ष्यमाणरीत्या भवत इत्यस्योपस्थितस्य गुणवृद्धी इत्यादिभिरन्वितस्य निषेधान्वये
सति गुणवृद्ध्योरभावः फलतो भवतीत्येतावता गुणवृद्धी निषेध इत्युच्यते। यथाऽऽज्ञाघाराग्निहोत्रादिकरणेप्र
तीतितः सर्वोपि विशिष्टविधिरेव तात्पर्यतस्तु कश्चिद्गुणविधिरिति सिद्धान्तितं तद्वन्निषेधेपि बोध्यं। न्यायसा
म्यात्। अत एव विधिनिषेधयोर्वाक्यार्थगोचरतेत्यभियुक्ताः। तस्मादोर्णुवः पोपुवो मरीमृज इत्युदाहरणं
सिद्धं। प्रत्युदाहरणं त्वच्यते। धातुलोप इति किं। आर्द्धधातुके विधिनिषेधाभ्यां लोपोऽपि ग्रहणग्रहणयोरिव गुण
वृद्ध्योर्विकल्पो मा भूत्। आर्द्धधातुक इति किं। तुर्वी थुर्वी दुर्वी धुर्वी हिंसार्थाः। मुर्छा मोहसमुच्छ्राययोः। एभ्यो यङ्लुगन्ते
भ्यस्तिबादेः सार्वधातुके पिति परे तोतोर्त्ति मोमोर्त्ति इत्यादेर्निषेधो मा भूत्। राल्लोप इति छ्वोर्लोपस्य गुणस्य च एक
निमित्तकत्वात्। इदं च राल्लोपे क्ङिद्ग्रहणानुवृत्तिपक्षमाश्रित्योक्तं। तदनुवृत्तिपक्षे तु तोतोर्मीत्याद्युत्तमपुरुषे

कवचनेउदाहरणं बोध्यं। अत्र नासिकादि प्रत्ययत्वेन तत्र यण्लोपप्रवृत्तेः। ननु तो तोर्त्तीत्यादि प्रागुक्त
मप्युदाहरणमस्तु। यण्लोपाप्रवृत्तावपि लोपो व्योरिति लोपादिति चेन्न। तस्य वर्णमात्रनिमित्तकतया
गुणेन सह एकनिमित्तकत्वाभावात्। न हि तत्र प्रत्ययग्रहणं तदाक्षेपकं वा किंचिदस्ति। अत एव गौ धेरा
दिषु प्रत्ययपरत्वं निर्विविपि यण्लोप इति दिक्। इक इति किं। अभाजि। रागः। भंजेश्च चिणि। घञि च भावकर
णयोरित्युपधालोपे कृते वृद्धिर्यथा स्यात्। कथं तर्हि पापचक इत्यत्र वृद्धिप्रतिषेध इति चेच्छृणु। पापच्य
तेर्ण्वुलि यस्य हल इत्यत्र अहयीदमव्यादित्यादिवारणाय यस्येति संघातग्रहणे पि आदेः परस्येति हल्मा
त्रलोपे कृते ऽतो लोप इति यगलोपे तस्य स्थानिवद्भावेन पापचकादेर्न वृद्धिः। न त्विह नध्यातु लोप इति
सूत्रस्य कश्चिदपि व्यापारः। यङ्लुगन्तात् ण्वुलि तु पापाचक इति भवत्येव वृद्धिर्लोनावेतिवत्। एतेन नध्यातु

शा॰कौ॰
१०६
106

लोपेत्यत्रेदक इत्यनुवृत्तेः पापाचक इति वदन्तन्यायात्तु सूत्रे वेभिदिता मरीमृज्जिते त्युदाहरंश्च कौमुदीकारः प
रास्तः । एवं च यङ्लोपस्य न्याय्यत्वे भाष्यादिसंमतत्वेव सति वृद्धेरसंभवात् । अत एव वृत्तिकारादयोप्यत्र सू
त्रे ऽचत्प्रत्ययांतान्येव लोलुवादीन्युदाजह्रुः । भिदिमृज्योस्तु यदि यङ्लुक् तर्हि तस्यानैमित्तिकत्वाद्गुणवृद्धी
स्त एव । वेभेदिता मरिमार्जितेति यथा । यदि तु यस्य हल इत्यवयवलोपस्तर्हि स्थानिवद्भावादेव गुणाप्रप्र
संग इत्युभयथापि नैतत्सूत्रोदाहरणत्वमित्यवधेयं ॥ भाष्यकारस्तु यस्येति लोप इव अविशेष्यपि यथग
ल्लोपमाश्रित्यैतत्सूत्रं प्रत्याचख्यौ । न च येन नाप्राप्तिन्यायेन अविशेषोऽलुग्गतो लोपं बाधेतेति वाच्यं । यस्य ह
ल इत्यत्र यस्येति योगं विभज्य अतो लोप इति वानुवर्त्य यङः स्यातो लोपविधानेन लुग्बाधनात् । अवशिष्टं
व्यंजनमात्रं तु कोऽवकाशः । ततश्चाल्लोपस्य स्थानिवत्वादेव वेभिदिता मरीमृज्जिता पापचक इत्यादिवल्लोलुवा

राम
१०६

इयोपि सिध्यंतीति किं सूत्रेण। नैवं नोनावेत्यादावपि दृष्टग ल्लोपापत्तेः। वकारानुवृत्त्यैव ऊल ग्रहणं
ज्ञायमानस्यानैमित्तिकस्य लुको ऽन्तरंगतया ऽलकारोत्पत्तेः प्रागेव समुदाये प्रवृत्तेः। नन्वेवं वेक्रियः लोलु
वः तोष्टुवदित्यादावल्लोपस्य स्थानिवत्ताप्रपगुणे न एवमियङुवङावपि न स्यातामिति चेत्। सत्यं। अवमा
श्रित्य न भवत एव। ऽत एव युक्तेः। किंतु स्थानिवद्भावलब्धमकारमाश्रित्य भविष्यतः। स हि यकारे लुप्ते प्रत्यय
संज्ञकः। स्यादेतत्। लोलुवादिषु यकारे लुप्ते यङ्लुगिति क्रमः। तत्र यकारावस्थानकाले ऽकारेण प्रत्ययत्वं
न लब्धमेव। लुप्तेपि तस्मिन्नकारो नास्त्येव। ततः प्रागेव लोपात्। सोयमसन्निकर्षं त्यैप्रेयतां लभेत। तल्लोप
स्थानिवद्भावेन प्रयत्येत्वमिति चेत्। स्थानिनिर्दिष्टं हि कार्यं तद्वदतिदेशेन लभ्यते। न तु तत्रादृष्टमपि। अत्रा
ऊः। तत्र संभावितमात्रमतिदिश्यते। यदि हि लोपस्य स्थानिभूतो ऽकार इह लुप्तेपि यकारे तिष्ठेत्तर्हि प्रत्य

श०कौ०
१०७
107

यतां लभेत तृज्वद्भावादिकं च प्रवर्त्तयेदिति कथं नातिदेशः। वरे निषेधस्य ह्रस्वे हलि गो। सहियाते यद्ग्रहणं तावदरवि
अस्य लोपयलोपयोः कृतयोः स्थानिवद्भावेनातो लोप इति वेत्यालोपो माभूदित्येतदर्थं क्रियते। स्थानिनि
दृष्टस्यैवातिदेशे तु किं तेन। न हि याया यइत्यस्यामवस्थायामातो लोपस्य प्राप्तिः। अनजादित्वादिति
दिक्। नन्वेवं वेक्षिय स्तोष्टुव इत्यत्रांतरंगानपीति न्यायेनाकृत एवाकुसार्वधातुकयोरिति दीर्घे यणो लु
क्। ततोऽल्लोपस्य स्थानिवद्भावे सत्यपि वेक्षि इ अ अ तोष्टु अ अ इति स्थान्यकारेण सह लघूपधसंगमभ्य
त्ययपरं जातमिति लघूपधगुणः स्यादेव। सत्यं। अंतरंगा वियङुवङौ भविष्यतः। यथाह वार्त्तिककारः। इयङुवङ्
भ्यां तरंगलक्षणत्वादिति। तथा वाल्लिपि गतौ। धिश्चारणे इत्येषां तु दादित्वाल्लेः कृते दियति पियति धियती
ति भवति। अधिक्षियत। यादुदुवत्स्ये स्तुस्तुवदिति वर्णिः श्रीति वद्धिः इयङुवङौ भवतः। तस्मात्पूर्ववज्ञो

राम
१०७

येनैव सकलनिर्वाहान्न ष्यात् लोप इति सूत्रं नारंभणीयं। नन्वेवं मरीमृज इत्यत्र मृजेरजादौ संक्रमे इति
पाक्षिक वृद्धिप्रसंगः। हरदत्तादिमते मुख्याज्ञादावेव तत्प्रवृत्तेः। निष्कर्षे तु यथोत्तरं मुनित्रयमाण्यादिष्टापत्तेः।
व्यवस्थितविभाषा वास्तु॥ अनिवद इति। गुणे उपधालोपयुक्तं न लोपाल्लोपयोरपि प्रसंगात्स्थगरत्रोपोल्लु
क्विवक्तुं न शक्यते। तथाहि। सर्वत्र दीर्घांतेषु हृस्वांतेषु च द्वयद्वु वङोः कृतयोर्लघूपधलक्षणो गुणः प्राप्नोति।
नचेह स्थानिवद्भावः। आदिष्टादचः पूर्वत्वात्। किं वा जंगम इत्यत्र गमहनेत्युपधालोपः स्यात्। अथाजाङे
ति प्रतिषेधस्तर्हि दरीदृश इत्यत्र ऋदृशोऽङीति गुणः स्यात्। अपि वा देप इत्यत्र दीङो युडचीति युड् स्यात्। किं
च सनीस्रंसो दनीध्वंसः। अनिदितामित्युपधालोपः स्यात्। अपि वा यायाः वावाः इत्यादिष्वाकारलोपः स्यात्।
तस्मात्समुदाये लुगेव एष्टव्यो लोलुवादिसिद्धये च सूत्रमारंभणीयमिति। अत्रोच्यते। लोलुवादिषु गुणस्था
नं न भवति। स्थानिद्वारकस्य अनादिष्टादचः पूर्वत्वस्य सत्त्वेन स्थानिवद्भावात्। अत एव हि न पदं

शा०कौ०
१०८
108

तेति सूत्रे सवर्णग्रहणं कृतं। शिण्ढीत्यादौ ऽनुस्वारस्य स्थानिद्वारकमनादिष्टादचः पूर्वत्वमाश्रित्य तस्य
सवर्णे कर्त्तव्ये श्नसोरल्लोपस्य स्थानिवद्भावो मा भूदिति। नन्वनादिष्टादचः पूर्वत्वस्य शास्त्रीयकार्यत्वाभावा
त्कथमतिदेश इति चेत्। अनादिष्टादचः पूर्वत्वापेक्षे ऽचः परस्मिन्नित्यतिदेशे कर्त्तव्ये स्थानिवदादेश इत्यस्य
प्रवृत्तिसंभवात्। सवर्णग्रहणव्याख्यावसरे सर्वैरिदमेवोपपादितत्वाच्च। ननु यो ह्यादेशस्तद्वत् सोऽनादिष्टाद
चः पूर्वतां स्थानिद्वारा कथं विलभतां न तु तस्येह किंचित्कार्यं विधीयते। येनाल्लोपः स्थानिवत्स्यात्। तथा यस्य वका
र्यं विधीयते ऽकारस्य नाशस्यावादेशः। येन स्थानिद्वारापि पूर्वतां लभेत। सत्यं। सर्वे सर्वपदादेशा इत्याश्रयणे स्था
न्यादेशिभावस्तावदर्थवति विश्राम्यति। अत एव वहरूढित्यस्य तेस्तुरिति पर्यवसितार्थमाश्रित्य स्थानिवत्सूत्रे ऽपे
वसिद्धत्वादेकदेशविकृतस्योपसंख्यानं नारब्धव्यमिति वक्ष्यते। अत एव च स्थानिवदितिसूत्रे संबंधिशब्दत्वा
देवादेशादल्यस्य लाभे सिद्धे पुनरादेशग्रहणं ऽनुमानिकस्याप्यादेशस्य परिग्रहार्थमिति वक्ष्यते। एवं वद

राम
१०८

हापि ओः त्र इत्यस्य ओत्तु वृ इत्यादेशः। स चानादिष्टादचः पूर्वः। स्थानिवद्भावात्। तस्यैव ओ ओ वृ इत्यादेशे का
र्येऽभ्यस्तोपः स्थानिवदिति युक्तमेव। किंवा हाजनोऽर्जे तिह्वाङ् स्तत इति वस्त्रे दीर्घोच्चारणेन अंगवृत्ते पुनर्वृत्ताव
विधिर्निष्ठितस्येति परिभाषा ज्ञापयिष्यते। तेन ऊवङि कृते गुणेन भविष्यति। दरीदृशाङ् इत्यत्र गुणस्तु न भव
ति। प्रतिपदोक्तस्या ङो ग्रहणात्। अदर्शदिति यथा। यङ् स्तु अकार उपदेशे वेलायां न प्रत्ययः किंतु तदवयवः प्यका
रे तु प्ते तु नासौ ङकारविशिष्टो न वाश्रूयते। किंतु तर्कैकगोचरत्वात् आक्षणिकवद्धिलंबितो पस्थितिकः। नन्वेव
मनङीति पर्युदासेप्यस्याग्रहणाद् ङो गम इत्यत्राऽल्लोपस्यादिति चेन्न। अनङीति पर्युदासे नाङः सदृशोश्रूयमाण
जादेरुपधालोपविधानात्। अर्थवानेवाङ् गुणवियोगस्तत इति तु न सम्यक्। विकरणग्नामनर्थकत्वात्।
यत्तु देव इत्यत्र युङ् स्यादिति। तन्न। अनुबंध निर्देशात्। तदुक्तं। श्तिपा शपानुबंधेन निर्दिष्टं यङ्गणेन चायत्रै

काऽग्रहणं चैवं च पंचैतानि न यङ्लुकीति। दाधोर्घ्वितीति सूत्रे दाधा इत्यनुवर्त्य निर्देशो यङ्लुङ्निवृत्त्यर्थ इति त्वयैवो
क्तत्वाच्च। अत्र च ज्ञापकं एकाच उपदेश इति सूत्रे यङ्लुङ्निवृत्तिमुद्दिश्य क्रियमाणमेकाज्ग्रहणं। नहि कृतेपि त
स्मिन्नुक्तपरिभाषां विना बेभिदितेत्यादि सिध्यति। बिभित्सतीत्यादिसिद्धये तं त्वावृत्त्याप्याश्रयणेनोपदेशग्रह
णस्य च नयविशेषणतायाः सिद्धांतयिष्यमाणत्वात्। नचैवमपि श्निपाशयेत्याद्यंशांतरे कथं ज्ञापकमिति वा
च्यं। एकदेशानुमतिद्वारा पूर्वाचार्यपठितपरिभाषाज्ञापनस्य गतिकारकोपपदानामित्यादौ बहुशो दृष्टत्वा
त्। नचैवमेकाच इति विधीयमानं द्वित्वमपि यङ्लुकि न स्यादिति वाच्यं। गुणो यङ्लुकोरिति ज्ञापकेन तत्प्रवृत्तेः।
यङ्लुकि बेभिदितेत्यादौ इडागमे तु दृष्टं तत्परिभाषैव शरणं। द्विःप्रयोगो द्विर्वचनं षाष्ठमिति वक्ष्यमाणतयाभ्या
त्वं तरत्वस्य वक्तुमशक्यत्वात् बेभिदितेति यङः तेलुक्यपगच्छोपाभ्युपगमात्तस्य च स्थानिवद्भावाल्लिनिषे

यः। पूर्वस्मादपि विधौ स्थानिवद्भावस्य वक्ष्यमाणत्वात्। किं वा यस्येति लोपस्य तयाप्यवयवलोपत्वं स्वी-
कृतं। तत्र यद्यपि देधक इत्यत्र युट् स्यादिति नापादनार्हं। हलः परत्वाभावेन हयलोपाप्रवृत्त्या देदीयक
इति रूपाभ्युपगमात्। सनीस्रसक इत्यादौ नलोपोपि सर्वसंमतत्वादेव नापाद्यः। यायायको वावायक
इत्यादावाल्लोपोप्यनापाद्यः। यलोपविरहेण णादिङिति दीर्घस्यानुकपरत्वाभावात्। तथापि। गमेर्यङ्-
तादेवुलि जंगमक इत्यत्राल्लोपस्य स्थानिवद्भावाद् हल्भावद्वोपधालोपः स्यात्। अथात्रानङीति प्रति-
षेधस्तर्हि दरीदृशक इत्यत्र ऋदृशोङीति गुणः स्यात्। अथ यदि हंगवृत्तपरिभाषया संज्ञापूर्वको विधि-
रनित्य इति वा समाधीयते तर्हि यङ्लुक्यपि सनीस्रंस इत्यत्र नलोपो यायवावाइत्याल्लोपश्च न शंक्यः।
समाधानस्य तुल्यत्वादिति दिक्॥ ॥ङिति च॥ ॥इक इति शब्दमुच्चार्य विहिते गुणवृद्धी गितं कितं ङितं

२॥श्युकः।कितीत्यत्रापिचर्त्वेनगकारप्रश्लेषमाश्रित्यतन्निषेधात्।नचैवंचर्त्वस्यासिद्धतयाविसर्जनीयोनस्यादोरुत्वंचप्रव
र्त्तेतेतिवाच्यम्।नमुनर २

वनिमित्तयाश्रित्यये प्राप्नुतस्तेन स्तः।गित्।जिष्णुः।ग्लाजिस्थश्चग्स्नुः।नचायंकिदेवास्त्विति वाच्यं।स्था
स्नुरित्यत्र घुमास्थेतीत्वप्रसंगात्।नचैवंभूष्णुरित्यत्रददूप्रसंगः ईत्यत्रनेतियोगविभागात्।सो त्रत्वाद्वा
तथा च ग्लाजिस्थेति सूत्रे स्रो क वार्त्तिकं।ग्स्नोर्जित्वान्नस्थईकारः क्ङितोरीत्वशासनात्।गुणाभावस्त्रि
षु स्मार्यः श्र्युको निट्त्वं कगोरितो रिति।नयादित्योप्येवं।वामनस्तुग्लाजिस्थश्चेत्यत्रस्थाग्लाद्याकारं
प्रश्लिष्य क्लुप्रत्ययांतस्यतिष्ठतेराकारएवनतुईत्वमितिव्याख्यानादेवस्थास्नोःसिद्धौनक्लापिगकार
प्रश्लेषः कार्यइत्याह।नन्वेतन्मते दंशेश्छंदस्युपसंख्यानमितिक्स्नोदंक्ष्णवः पश्चावइत्यत्रानिदितामिति
नलोपः स्यात्।सत्यं।क्नकइतिकिं।कामयते।शब्द्व्यापाराश्रयणं किं।जैगवायनः।उगुर्गुणोहिद्विकएवप्रवर्त्त
तेनलु तत्रैकपदोपस्थितिः।उदितिनिर्दिष्टस्थानिकत्वात्।तदुक्तं।तद्धितकाम्योरिकत्वाकरणादिति।ननुक्ङि

२ च्छांदसत्वात्समाधेयः।कित्।चितं।स्तुतं।मृष्टं।ङित्।।चिनुतः।सुनुतः।मृष्टात्।।निमित्तसप्तम्याश्रयणं किं।व्यवहितेपियथास्यात्।।छिन्नं।भिन्नम्।२

तीति सप्तमीनिर्देशात्तस्मिन्निति निर्दिष्टे पूर्वस्येति परिभाषोपतिष्ठेत। तत्र निःशब्दस्यानेरं तर्यपरत्वाद्द्विशे
ष्यो वारणक्रियत्वाद्व्यवहितो ऽविहितस्य निषेधः स्यान्न तु हि नं भिन्नं भिस्यादेरपातीति चेत्। भवेदेवं यदि द्वि
तीयेतन्निषेध्यया क्रियया साक्षात्संबध्येत। इह तु गुणवृद्धिभ्यां संबध्यते। यस्य च भावेनेति सप्तमी। क्रियां
तरापेक्षणे हि सार्गिकसत्तापेक्षेपः। ततश्चेक इति सति प्राप्ते ये गुणवृद्धी इति संबंधे कृते सिद्धसाध्यसमभिव्या
हारन्यायेन तद्रूपलक्षणीभूतसत्ताश्रयणस्य निमित्तत्वमुत्सर्गतः फलति। न त्विह विशिष्य निमित्ततायां स
प्तमीविधानमस्ति। न चात्र निर्दिष्टपरिभाषासंभवति। विध्यंगभूतानां परिभाषाणां साक्षाद्विधेयनिषेध्य
क्रियान्वयिन्येव प्रवृत्तेः। इदं तु क्रियान्वयिनो विशेषणं न तु क्रियायाः। अतोऽत्र न परिभाषाप्रवृत्तिः। अन्यथा
वृद्धिर्यस्याचामादिरित्यत्र इकः परिभाषोपस्थाने शालीयादि न सिध्येत्। न ह्यत्रेकः स्थाने वृद्धिः। अतएवो

दीर्घा मातः स्थान इति सूत्रे स्थानग्रहणं कृतं। आतः स्थाने यो ऽकार इति। अनुपमानस्य विशेषणे ऽसात इ
त्यस्मिन्षष्ठी स्थाने योगेति परिभाषाया अप्रवृत्तेः। गुणानां च परार्थत्वाद संबंधः समत्वात्स्यादिति न्या
योप्यत्रानुसंधेयः। ननु तर्हि अनेनैव न्यायेन क्ङितीत्येतत्प्रधानभूतया क्रियया संबध्यतां न तु तद्विशेषभूता
भ्यां गुणवृद्धिभ्यां। प्रधानान्वयस्य संभवतस्त्यागायोगादिति चेन्न। यत्र हि गुणः कृतात्मसंस्कारः प्रधा
नोपकाराय महते प्रभवति तत्रात्मनोपि संस्कारमनुभूय प्रधानेन संबध्यते। यथा पानीयमेवोदिसंस्कृ
तं पुरुषेण। उक्तं च। गुणः कृतात्मसंस्कारः प्रधानं प्रतिपद्यते। प्रधानस्योपकारे हि तथा भूयसि वर्त्तत इति।
इह गुणवृद्ध्योः क्ङिद्ग्रहणेन विशेषितयोः प्रधानस्य महानुपकारो भवति। व्यवहितस्यापि प्रतिषेधप्रसिद्धेः।
क्नोः कित्करणं चात्र ज्ञापकं। अन्यथा प्रधानेनैवान्वये निर्दिष्टपरिभाषया श्नोपस्थितौ सत्यां व्यवहिते नि

षेधस्याप्रवृत्तौ व्यर्थमेव क्ङोः कित्वं स्यात्तस्माच्चरितार्थ्याख्यानमेव साधु न तु यदीयं न परस्मैपदमीतर्हि श्रवङ्
ते दोषः। लघूपध लक्षणे गुणे प्राप्ते इति चेन्न। अंतरंगत्वादियङ्वङ् प्रवृत्तेः। धियि धारणे। पिपि गतौ। तुदा
दयः। धियियति। पियति। णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्। अशिश्रियत्। अदुद्रुवत्। असुस्रुवत्। इत्यादि प्रमाश्रित्य प्रा
प्तो गुणो बहिरंगः। श्रवङ्। श्रयावियङ्वङौ। अंतरंगौ। नन्वेवं श्रवङ् तस्यांतरंग लक्षणत्वादिति। मृजेरजादौ
संक्रमे वृद्धिर्वक्ष्यते। इति काशिकायां। इदं च इको गुणवृद्धी इति सूत्रप्रसंगाद्व्याकरणं। तत्र मतलेनोक्तं भा
ष्ये। अस्यार्थः। संक्रामतोपक्रामतो गुणवृद्धी अस्मादिति व्युत्पत्त्या गुणवृद्धिप्रतिषेधनिमित्तभूतः क्ङित्प्र
त्ययोऽत्र संक्रमशब्देनोच्यते। योगरूढेः। तेन मरामृजु इत्यत्र चात्वं श्लोकोपनिमित्ततया वृद्धिप्रतिषेधहेता
वप्यक्प्रत्यये नासौ विकल्पः प्रवर्त्तत इत्यवधेयं। अत एव क्ङित्यजि वेति वचनं तत्र भाष्ये कृतं। मृजंति मार्जंति।

शू०कौ०
११२

अत्र हरदत्तः। अब्रीत्सु ऽयमानेपि यस्मिन् विधिस्तदादावल्ग्रहणे इति सिद्धे ऽजादिग्रहणं मुख्याजादिग्र
हणार्थं। तेन व्यपदेशिवद्भावेनाजादौ यूयं ममृज। त्वया ममृजे इत्यादौ न भवतीति। तच्चिंत्यं। मुख्याजादिपरि
ग्रहे प्रमाणाभावात्। नहि भाष्ये ऽजादिग्रहणं कृतं। येन त्वदुक्तार्थो लभ्येत। किंतु क्ङित्यविवेति वचनं पठि
तं। यत्तु ततः प्रागुक्तं भाष्ये। इहान्ये वैयाकरणा मृजेरजादौ संक्रमे विभाषा वृद्धिमारभंत इति। तत्तु तदादि
परिभाषाबलेन लब्धवाक्यार्थानुवादमात्रं न तु परकीयविधिवाक्यशरीरमिदं। येन त्वदुक्तमर्थं ज्ञापयेत्। अ
त एवात्र यो मृजेति मिदादिपाठात्। अङ् गणपाठादेव वृद्ध्यभाव इत्याह। अत एव रक्षितेनापि धातुप्रदीपे
तुंदपरिमृजस्तुंदपरिमार्ज इत्युभयं दर्शितं। दुर्घटवृत्तौ तु तुंदपरिमृज इत्यत्र व्यवस्थितविभाषा वृद्धिर्नेत्यु
क्तं। अत एव धातुवृत्तिषु यूयं ममृज ममार्जेति रूपद्वयमुदाहृतं। यत्तु मुख्याजादिग्रहणवादिनोपि मते

राम
११२

ऽत्र वृद्धिविकल्पो दुर्वार एव। तथाहि। मध्यमपुरुषबहुवचनस्य थस्य परस्मैपदानामिति सूत्रे णवि
धीयमानोऽकारादेशोऽजोत्यस्य प्राप्नोति। न चैवं निर्दिश्यैव यथार्थ्यं। णलादीनां यथासंख्यसंपादनेन चरि
तार्थत्वादित्याशंक्यं वच्यं। भाष्य एव बद्ध्या समाधास्यति। अकारद्वयात्मकोयमनेकाल्त्वात् सर्वादेशः। यद्वा। धातोरि
त्यधिकारादादेः परस्येति थकारमात्रस्याकार इति। तत्र पक्षद्वयेपि अतो गुण इति पररूपस्याचः परस्मिन्नि
ति स्थानिवद्भावात् गुरुत्याजादित्वमप्यस्येवेति केचित्। तद्रत्नमिश्रमते दूषणमुक्तं। तन्न। आद्यंतवदित्यतिदेश
द्वयस्थानिवद्भावेपि गुरुमत्वाभावस्य सुवचत्वादिति दिक्। स्यादेतत्। अविनोदमार्ड्ढ इत्यादौ स्थानिवद्भावेन तिपो
ङित्वात्क्ङिति चेति गुणवृद्धिनिषेधः स्यात्। न चाल्विधित्वात् स्थानिवद्भावासंभवः। अनुबंधकार्येष्वनल्विधाविति
ति निषेधस्याप्रवृत्तेः। अन्यथा अविनवं अमार्जमित्यादावपि त्वेन सार्वधातुकमपिदिति ङित्वापत्तेः। इह वा

पकं नल्यपीति सूत्रं। अन्यथा ल्यपः कित्वाभावादेवईत्वाप्राप्तौ किं तन्निषेधार्थेन सूत्रेण। यत्तु सेर्ह्यपिच्चेति
ऽसिद्धवनं ज्ञापकमिति। तन्न। स्वरेण हि विघ्नतः प्रतीत्यादेः स्थानेऽन्तरतमपरिभाषया पित्वादनुदात्तस्य सि
पः स्थानेऽनुदात्तस्यैव हेः प्राप्तौ उदात्तसंपादनेन चरितार्थत्वात्। अपित्वसामर्थ्याद्धि तत्रान्तरतमपरिभा
षा बाध्यते। प्रतिपत्तिलाघवार्थमनुदात्तमिति वक्तव्ये ऽसिद्धवनं ज्ञापकमिति वास्तु। न्यायसिद्धोऽयमर्थः।
ऽपत्तु बंध्यानामनेकांतत्वेन स्थानिकोटावप्रविष्टतया स्थान्यलाश्रयविधिविषयकस्यानल्विध्याविति नि
षेधस्याप्रवृत्तेः। अनुबंधा एकांता इति मतेपि स्थानित्वप्रतीतेः प्रागेवांतरंगेण लोपेन तेषामपहारात्। त
स्मात् धञ्जडाद्यादेशानां तिवादीनां स्थानिवद्भावेन ङित्वं दुर्वारमिति। अत्राहुः। यासुट् परस्मैपदेष्विति सूत्रे ङि
द्ववनं ज्ञापकं लादेशानां स्थानिवद्भावेन ङित्वं न भवतीति। तथा च वार्त्तिकं। लकारस्य ङित्वादादेशेषु

स्थानिवद्भावप्रसंग इति चेद्यासुटोऽङित्वनासिद्धमिति। ननु स्तुयादित्यादौ ऽनिट्लक्षणवृद्धिप्रतिषेधार्थं
विनुयुरित्यादौ जुसि चेत्यस्य प्रतिषेधार्थं च यासुटोऽङित्वमस्तु। उतो वृद्धिर्लुकि हलीत्यत्र हि उत इति निर्दिश्य
स्थानिकतया इक्परिभाषा नोपतिष्ठते। जुसि चेति तु क्ङिति चेत्यस्यापवाद एव। तथा च स्थानिवद्भावं लब्ध्वा
ङित्वं स्तुयाद्विनुयुरित्यत्र वृद्धिगुणौ निषेद्धुं नालं। पुनर्ङित्वसामर्थ्यात्तु तदुभयनिषेधो भविष्यति। तथा च
वृद्धिगुणनिषेधे चरितार्थं यासुटो ङित्वं कथं लादेशेषु लाश्रयङित्वस्य विरहं ज्ञापयेदिति चेत्। उच्यते।
उत औदिति वक्तव्ये वृद्धिग्रहणं संज्ञापूर्वको विधिरनित्यो यथा स्यादित्येवमर्थं। तेन स्तुयादित्यत्र न वृद्धिः।
तथा विनुयुरित्यत्र न गुणः। क्सस्याचीत्यतो ऽचीत्यनुवर्त्य ऽजादौ जुसि गुणविधानात्। मिदेर्गुणो जुसि चेत्यका
रं प्रश्लिष्य ऽजुसौ सावुसश्चेति कर्मधारयाश्रयणेन ऽजादौ जुसि गुणविधानाश्रयणे तु चक्रुर्जह्रुरित्यादावति

श०कौ० कङिः त्वेनांतरंगेण स्थानिवदातिदेशिकस्य बहिरंगस्य पित्वस्य बाधात् । प्रतिषिद्धात् उपदिष्टं बलीय इति न्यायात् । स्विनोदित्यादौ तु अपदेशि ४

११४ प्रसंगः । गुणेति लुप्तविभक्तिकं उत्तु सीति च छेदः । उकारादौ तु सीति वार्थः । तुसि गुणे यासुट् प्रतिषेध इति वा

114 र्तिकमपि उक्तरीत्या सिद्धार्थकथनपरमिति तावद् वार्तिककारस्य हृदयं । भाष्यकारमते तु सार्वधातुकमपि

दिति सूत्रे अपिदिति योगं विभज्य ङिदिति वानुवर्त्य आर्द्धधातुकं वा पित्त्यङित् च पिन्न भवति । पिच्च ङिन्न भवती

ति वाक्यार्थद्वयं वर्ण्यते । इद्धवहलः अद इति सूत्रे भाष्ये स्पष्टं तेन अभूतादित्यत्र भुवई ण । नातङ अपदेशिं केन

ति वादीनां पित्वेन लाश्रयमातिदेशिकं ङित्वं बाध्यते । तेन गुणादिसिद्धिः । अस्मिंश्च पक्षे यासुटो ङित्ववचनं

न ज्ञापकं किंतु मृज्यादित्यादावप्राप्त ङित्वविधायकं । तेन च पित्वस्य विनोतीत्यादौ सावकाशस्य बाधः । अतः स्तु

यादित्यादौ पित्ति हलीति विधीयमाना वृद्धिर्न प्रवर्त्तते । विनुयुरिति तु प्रागेव देवसमर्थनीयं । पूर्वोदाहृतवार्त्तिक

मते तु ब्रूयादित्यत्र ईट् न प्राप्नोति । आगमशासनमनित्यमिति तु कथंचित् समाधेयः । वस्तुतस्तु । हलः श्नः शानज्झौ राम

११४

विति श्नानवः श्लिक्करणेन क्वचिदनुबन्धकार्यमनल्विधाविति निषेधः प्रवर्त्तत इति ज्ञाप्यते । तेन ब्रूञादित्यादे
न कश्चिद्दोष इति । अत एव भाष्यमते न विणीष्टेत्यत्र ङित्वं न । करिष्यमाणे त्वत्रोगि च्लेक्सणे च्लेक्सणे स्यङी
मेतिदिक् ॥ ॥**दीधीवेवीटां**॥ ॥दीधीवेव्योरिटश्च गुणवृद्धी न स्तः । आदीध्यनं । आदीध्यकः । आवेव्यनं । आ
वेव्यकः । अकणिषं । अरणिषं । कणिता श्वो रणिता श्वः । इह अमं प्रति स्त्रिजंतमेगं तिपोऽदेशं प्रति तु कणितृ इति
तौ तमेगं तस्य अमं ऽदेशं च सार्वधातुकं निमित्तीकृत्य लघूपधगुणः प्राप्नो नेन निषिध्यते । वृद्धिस्तु इटो न
संभवत्येव । लुङं ततो स्फोरयितुं च इत्यस्य प्रयोगः । न हि तञ्जंते तन्नंते वा इटो गुणप्राप्तिः । अवयवप्रसिद्धये पे
क्षया समुदायप्रसिद्धेर्बलवत्त्वात् । किं वा वर्णग्रहणे निर्देशः संदेहार्थं दीवेव्योर्वीटां इत्येव ब्रूयात् । इड् वात्र
आगम एव गृह्यते न तु इडागताविति धातुः । ननु धातुसाहचर्याद्धातुरेव गृह्यतां मैवं । साहचर्यस्य सर्वत्रानियमा

प्रत्ययावयवत्वात्तस्य । अपदादेः क्षये । धीङ् अनादरे । वेञ् तंतुसंताने । वागस्यादिषु । एतेषामिह ग्रहणं कुतो नेति चेत् । ना ३

मकत्वात् । अन्यथा द्विस्त्रिश्चतुरिति कृत्वोऽर्थे इति सूत्रे कृत्वोर्थग्रहणं न कुर्यात् । द्विस्त्रिरिति सूत्रं ताभ्यां सा
हचर्येण चतुरित्यस्यापि सूत्रं तस्य ग्रहणसंभवात् । अत एव आगमापेक्षया प्रकृतेरभ्यर्हितत्वाद्द्व्यचोऽउः पू
र्वनिपातः सूत्रे कृतः । इटोपि धातुत्वेन प्रकृतित्वाविशेषेप्यभ्यान्तरत्वात्तस्यैव पूर्वनिपातः स्यात् । अत्रेदमव
धेयं । दीध्यको वेव्यक इति यदुदाहृतं तद्दीधीवेवीभ्यां शुद्धाभ्यामेव ण्वुलि रूपं न तु ण्यन्ताभ्यामपि । यस्तु यीवर्णयो
रिति सूत्रे हरदत्तेनोक्तं । वर्णग्रहणं वर्णविस्तारे इति धातोः पचाद्यजन्तः । श्रूयमाण एव इवर्णे यथा स्यात् । लुप्ते मा
भूदित्येवमर्थः । तेन ण्यन्ताभ्यां ण्वुलि णिलोपस्य पूर्वविधौ स्थानिवत्त्वेपि श्रूयमाणत्वाभावादिलोपाभाव यणि
कृते दीध्यको वेव्यक इत्येव शुद्धेन समानाकारं रूपं भवतीति । तदेतन्नाम्नोपि शास्त्रदितामित्येतस्मिन् सूत्रे भाष्य
कारैरेव ण्यन्तस्य दीध्यक इति रूपं शुद्धस्य तु दीध्यक इति व्युत्पादितत्वात् सिद्धान्तविरोध्यादुपेक्ष्यं । तत्र हि वर्णग्रह

णं तुमेपीवर्णे यथा स्यादित्येवमर्थमित्याशंक्य स्थानिवद्भावेन सिद्धेरंतरंगत्वाल्लोपात्प्राग्यीवर्णयोरिति लोप
सिद्धेश्च। वर्णग्रहणं प्रत्याख्यातं। ननु वर्णग्रहणं कुर्वतः सूत्रकारस्याशयो भाष्यकारोक्तादन्यमेवानुसृत्य श्रम
इति चेत्। सत्यं तथापि यथोत्तरं मुनीनां प्रामाण्याद्रूपासिद्धिस्तदवस्थैवेति दिक्। स्यादेतत्। दीधीवेव्योर्ङित्त्वात्क्ङि
तिचेति सूत्रेणैव निषेधोस्तु। किमिह दीधीवेवीग्रहणेन। मैवं। इग्लक्षणयोर्हि स निषेध इत्युक्तं। न च जवोऽस्तीती
ति वृद्धिरिग्लक्षणा। किंचाकार्यिणो निमित्तत्वे पूर्वेणासिद्धिः संभवेदपि। न च कार्यीनिमित्ततयाश्रीयते। व्यवहितेऽप्यव
तेऽत्यादावपि गुणनिषेधापत्तेः। अत्र च लिंगं कुटादिमध्ये कूङ् शब्दे इत्यस्य पाठः। स ह्यङिच्छयितरीतिनिर्देशश्च।
यत्तु प्रकृतसूत्रे दीधीवेव्योर्ग्रहणमेवैतत्परिभाषाज्ञापकमिति। तन्न। अनिग्लक्षणवृद्धिनिषेधेन चरितार्थत्वा
त्। भाष्यमते एतत्सूत्रस्य प्रत्याख्यायमानतयोक्तपरिभाषायां लिंगांतरस्यैवानुसर्तव्यत्वाच्च। स्यादेतत्।

यदि कार्यीनिमित्तत्वेन नाश्रीयते कथं तर्हि ऊर्णुनविषतीत्यत्र द्विर्वचनेचीति नुशब्दस्य द्वित्वं। इष इत्यस्य अजादि
त्वेपि द्वित्वं प्रति कार्यिमध्ये प्रविष्टतया निमित्तत्वासंभवात्। सन्यङोरिति षष्ठीमाश्रित्य सनंतस्य द्वित्वविधानात्।
अन्यथा प्रतीषिषतीति सनो द्वित्वं न स्यात्। यत्तु सन्यङोरिति सप्तम्याश्रयणेपि सन्यङोरकारोच्चारणसामर्थ्या
त् द्वित्वं भविष्यतीति। तन्न। आदिसंधिसूत्रादिभ्यो यङुत्पत्तिप्रतिबंधेन अवोयदिति यत्स्यस्य योत्पादनेन वाकारोच्चार
णस्य चरितार्थत्वात्। अन्यथा अरिरिषतीत्याद्यसिद्धेश्च। यदि हि तत्रापि स्थानिवत्स्यात्तदासौ द्विर्वचने कृते अरीष
तीति स्यात्। अत्रोच्यते। कार्यमनुभवन्नेव कार्यी निमित्ततया नाश्रीयत इति परिभाषार्थः। अरिरिषतीत्यत्र हि अ
जादेर्द्वितीयस्येति रिस्शब्दे द्वित्वप्रवृत्तिः। तदंतर्गतस्य इस्शब्द इति नासौ द्वित्वं प्रति निमित्तं। कार्यभाक्त्वात्। ऊ
र्णुनविषतीत्यत्र तु नवुशब्दस्य द्वित्वं प्राप्तं। तदंतर्गतस्य इस्शब्द इति भवत्येव निमित्तं। तद्भावभाविता मात्रेणेह निमि

ततेति सन्ध्यङ्गोऽरिति सूत्र भाष्यकारैरेव स्फुटीकृतत्वात्। तथा च द्विर्वचनेऽचीति स्थानिवद्भावान्नुशब्द
स्य द्वित्वमुचितमेव। यत्तु द्विर्वचनेऽचीति सूत्रेऽविकिंजेग्रीयते यते दध्मीयत इति प्राचां ग्रन्थे उदाहरणं
तदपातत:। ग्रीयूध्मीयू इत्यस्य द्वित्व भाक्तया ईग्राध्मो ऽदितीत्वं प्रति निमित्तभूतस्य यङो द्वित्वं प्रत्यनि
मित्तत्वात्। तस्मात्तत्र ऽप्रवीत्यस्य ऽपिजगदित्येतदेव व्यावर्त्यं बोध्यं। गाङ्कुटादिति द्विजकारक निर्देश
माश्रित्य नावस्थायामेव गाङादेशविधानात्। ऽजग्रहणं तु ज्ञापकं रूपस्थानिवद्भावस्येति तत्रत्यवार्त्तिक
मपि ऽपिजगदित्येतस्मिन्नुदाहरणे कार्यातिदेशाश्रयणे ऽजग्रहणवैयर्थ्यं स्यादित्येवं योऽज्यमिति दिक्।
यत्तु ऽसिद्धवत्सूत्रे वक्ष्यते ऽत्रग्रहणं समानाश्रयप्रतिपत्त्यर्थमिति तत्र ऽआश्रयत्वं स्थानितया निमित्तत
या वा कथंचिदाश्रयणमात्रेण न तु निमित्ततयैवेत्याग्रहः। तेन शाहि विति शाभावो हेर्धित्वे कर्त्तव्ये ऽसिद्धो

र० कौ०
११७
117

भवति। अन्यथा ध्रिल्वेहेः कार्यितया निमित्तत्वाभावादसिद्धत्वं न स्यात्। अत एव समानाश्रयमाभीयमाभीये
ऽसिद्धमित्येवाऽऽर्नतु समाननिमित्तमिति। इदं च सूत्रभाष्यवार्त्तिकयोः प्रत्याख्यातं। तथाहि। दीधीवेव्योश्छन्द
सो भाषात्त्वात्। न तु लोके प्रयोगाहौ। छन्दसि वानयोर्गुणो दृश्यते। हे आयवः तः रूपयन्नदीधेत्। आदीध्युर्दाशुषा
इवतासइत्यादौ। न चायं बाहुलकेन समाधेयः। तथा सति निषेधसूत्रानारंभस्यैव लाघवेनोचितत्वात्।
तथा इटोपि ग्रहणं व्यर्थं। आर्द्धधातुकस्येडित्यत्र हि नेड्वशि कृतीति सूत्रादिड्ग्रहणमनुवर्त्तते। तच्च इटो वि
काराभावार्थं। इट् इडेव न तु विकृत इति व्याख्यानात्। ततो लघूपधगुणाभावासिद्धं कणिता श्व इत्यादि।
न चैवंपि पठीरित्यत्र दीर्घो न स्यादिति वाच्यं। तस्य नियमं प्रत्यसिद्धत्वात्। अपाठीदित्यत्र सवर्णदीर्घस्तु न बा
ध्यते। सिज्लोपएकादेशे सिद्धो वक्तव्य इति ज्ञापकात्। यद्वा। अंगाधिकारे क्रियमाणो नियमः अंगमेव वि

राम
११७

कारं व्यावर्त्तयति। तेनवोरिति ऽकः सवर्णे इति वा दीर्घो भवत्येव। अहोतेत्यत्र तु अहो इति इत्यारंभसामर्थ्याद्दी
र्घो भवत्येव। इदं तु वक्ष्यते। पिपठीषिभ्यां लण्कुत्वानीत्यत्र सांतमहतः संयोगस्येति दीर्घत्वं न स्यात्। असि
द्धत्वादांगत्वात्तेजांसीत्यादौ चरितार्थत्वाच्च पिपठीरपाठीः अहोतेत्यादि पूर्वोदाहृतेभ्यो ऽस्य वै लक्षण्यादि
ति। अत्राहुः। पिपठीषीति प्रयोगो ऽसाधुरेव। न ह्यत्र नुमागमो लभ्यते। अदन्तोपदस्य स्थानिवद्भावेनाऽ
जंतत्वात्। नन्वेवमजंतत्वप्रयुक्तो नुम्स्यादेवेति वाच्यं तस्य सकारादुत्तरत्र प्रसक्त्यादीर्घस्य तथाप्यप्रव
र्त्तेः। सांत संयोगाभावात्। वस्तु तस्तु अजंतत्वप्रयुक्तो नुमत्र न भवत्येव। स्थानिवद्भावासंभवात्। अनादिष्टा
द्वः पूर्वस्य विधौ हि सः। न च तस्मिन्कर्त्तव्ये स्थानिवद्भावः शंक्यः। क्वौ लुप्तं न स्थानिवदिति निषेधात्। अन्य
था सरवीयतेः क्विपि सरवीः स्तुतीयतेः स्तुतीं त्यादि न स्यात्। अदन्तोपदस्य स्थानिवद्भावेन यणादेशप्रसंगात्। अत्रो

व्यते। क्विलुगुपधात्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानमिति तावद्वार्त्तिकशरीरं। तत्र क्वौ लुप्तमित्यंशो यद्यपि द्विधा
व्याख्यास्यते। क्वौ लुप्तं न स्थानिवदिति। क्वौ विधिं प्रति न स्थानिवदिति च। देवयतेः क्विपि दय्योरित्यादेरन्यतर
व्याख्यानाश्रयणेन सिद्धावपि सखीयतेः। सखीरित्यस्याद्यव्याख्यानं विनाऽसिद्धेः। एवमाचक्षाणेऽजौ
रित्यस्य द्वितीयव्याख्यानं विनाऽसिद्धेश्चात एवापि क्वौ विधिं प्रतीति द्वितीयव्याख्यानमेव सार्वत्रिकं। क्वौ लु
प्तमिति तु क्वाचित्कं। रव्यत्यादित्यत्र मपर्यन्तस्येत्यत्रैव भाष्यादेराश्रितं न तु सार्वत्रिकं। अत्र च ढ्रूग्रहणप्र
त्याख्यानपरमत्रत्यभाष्यमेव प्रमाणं। कथमन्यथापि पठिष्यत्यादेर्दीर्घस्येष्टत्वे सूत्रारम्भावत एवाभे
ढ्रूग्रहणं प्रत्याचक्षीत। तस्मात्पिपठिषिभ्यामल्ग्रहणे कुल्वानीत्येव रूपं भवतीति॥ ॥हलोऽनन्तराः संयोगः॥ ॥
अज्भिरव्यवहिताः हलः संयोगसंज्ञाः स्युः। संज्ञाप्रदेशाः संयोगान्तस्य लोप इत्येवमादयः। इह अनन्तरशब्देन छिद्र

वाविनाबहुव्रीहेर्निश्छिद्राः इत्यर्थलाभादवग्रहे संज्ञया न भाव्यं। आध्येयप्रधानेनांतरेत्यव्ययेन सह बहुव्रीहे
तु आध्येयनिषेध्यप्रतीतेरवग्रहेपि भाव्यमेव संज्ञया। नहि तत्रांतरामध्ये किंचिदस्ति किंतु मध्यमात्रं वर्त्त
ते। मात्राह्रस्वत्वावदवग्रहांतरमिति प्रातिशाख्यबलेन तत्र मात्राकालावसानाभ्युपगमात्। यत्तु प्रातिशा
ख्यांतरं अर्द्धमात्रोवग्रह इति तत्तु सर्वत्र संहितायां अर्द्धमात्राकालस्य सत्वात्ततोतिरिक्तोर्द्धमात्राकालोवग्र
हे स्तीत्येवंपरं अतः प्रातिशाख्ययोरविरोधः। तर्हि हकतरः पक्षो ग्राह्य इति चेत् उभयथाप्यदोष इति भाष्यकाराः।
नन्वपूस्तु इत्यादौ सत्यां संयोगसंज्ञायां संयोगे गुर्विति गुरुत्वाद्गुरोरन्त इति प्लुतेन भाव्यं। नत्वन्यथेति महा
न्फले विशेषः। तत्कथं पक्षद्वयाभ्युपगम इति चेन्न। अप्लुतस्याधिकरणत्वे दूराद्धूतसंबंधाभावात्। विचा
र्यमाणानामित्यादौ तु वाक्यस्य टेरित्यनुवर्त्तते न तु गुरोरन्त इति। नन्वप्सु भवो प्सव्यः। दिगादिषु पाठाद्यत्।

शु० कौ०
११९
119

॥ अपो योनिय न्मतुष्णु वेति सप्तम्या अलुक्। ततः संबुद्धौ हे अप्सव्येत्यत्र स्यादेव फलेनेद इति चेत्। अत्राहुः। नैवं
विध्येविषये अवग्रहं पदकाराः कुर्वन्तीति। अत्र च संप्रदाय एव शरणमिति बोध्यं। युक्तं चैतत्। गोभ्यो गातुं। गो
भिर्मदाय। चित्र इद्राजा राजका इदन्यके। इत्यादौ गोभ्यो गोभिः राजका इत्यादीनां सत्यपि पदत्वे अवग्रहाकरणात्।
ईयिवांसमति स्रिधः इत्यादौ ईयिवांसमिति विनापि पदसंज्ञां वसोः पूर्वमिडागमान्तेऽवग्रहकरणाच्च एतेन स्रि
सासन्नो उत्क शासः दिदिव इत्यादौ पदकाले सत्वरुत्वादयोपि व्याख्याताः। यत्तु मानो महान्तमिति मंत्रे वेदभा
ष्यकारैरुक्तं छान्दसः पदकालीनो रुत्व इति तदपि संप्रदायमात्रपरतया कथंचिन्नेयं। न लक्षणेन पदकारा
इति भाष्ये पदविभागः पौरुषेय इति वैदिकसंप्रदायात्। अत एव मप्सुर रोमभिरित्यत्र भिसः पूर्वमवग्र
हः। न मरुत्किभिरित्यत्राप्येवं। इदं प्रणः पुर एतेवेत्यत्र वे वशब्दाभ्यागिति दिक्। महासंज्ञाकरणं मन्वर्थसं राम
११९

ज्ञाविज्ञानार्थं। संयुज्यंतेऽस्मिन्समुदाये वर्णा इति। तेनात्र समुदाये वाक्यपरिसमाप्तिर्न्नतु गुणवृद्ध्यादिसंज्ञाव
त्प्रत्येकं। तथाहि सति निर्यायादित्यादौ यकारः संयोग इति वान्यस्य संयोगादेरित्येत्वं स्यात्। सिद्धांते तु ऽनयोरह
न्यामिति द्वित्वे सत्यपि तस्यासिद्धतया निर्यायादित्यादावेत्वं न भवति। किं च प्रत्येकं संज्ञेति पक्षे संहृषीष्टेत्यत्र
सतश्च संयोगादेरितीट् स्यात्। संह्रियतइत्यत्र गुणोर्त्तिसंयोगाद्योरिति गुणः स्यात्। दृषत्करोतीत्यत्र कका
रसन्निध्योदकारस्य संयोगत्वात् संयोगांतलोपः स्यात्। श्चा वस्तेत्यत्र न्लितकारे परतः स्कोरिति लोपः स्या
त्। निर्यातइत्यादौ संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वं स्यात्। जातोऽचं दंबक्रुवचनं हलइति। जात्याख्या
यामेकस्मिन्निति वचनात्। तेन द्वयोरपि संयोगसंज्ञा भवति। अतः शिक्षेत्यादौ गुरोश्च हलइत्यप्रत्ययः सिध्य
ति। यत्र तु बहवो हलः संश्लिष्टास्तत्र द्वयोर्बहूनां वाविशेषेण संज्ञा। न च एकाज्झ्द्विर्वचनन्यायेन समुदायस्यैव स्या

दितिवाच्यं। वैषम्यात्। तथाहि। द्विर्वचनं समुदायावयवैकार्वो र्युगपत्कर्त्तुमशक्यं। संज्ञा तु शक्या। तथा समुदा
ये द्विरुक्ते ऽवयवा ऽपि द्विरुक्ता भवंति। वृक्षः प्रचलन्सहावयवैः प्रचलतीति न्यायात्। इह तु समुदाये प्रवर्त्तमाना सं
योगसंज्ञया नावयवानां तत्कार्यसिद्धिः। अतो ऽविशेषेण द्वयोर्बहूनां च संज्ञेति स्थितं। यदि तु बहूनामेव स्यात्त
र्हि संस्कर्यत इत्यत्र गुणोर्त्तीति गुणो न स्यात्। गोमान्करोतीत्यत्र संयोगांतलोपो न स्यात्। निर्गुनं इत्यादौ निष्ठा
नत्वं न स्यादिति दिक्। ननु यदि द्वयोरपि संज्ञा तर्हि दंड्यते सनिदंदिड्यिषतीति न स्यात्। इह हि संयोगौ द्वौ। न
दोदरौ वा। तत्र नकारस्येव दकारस्यापि नन्द्राः इति द्वित्वनिषेधः प्राप्नोति। नैष दोषः। तत्र हि अज्ञादेरित्यनुवर्त्तते।
सा च कर्मध्यारयात्संवमी। तेन ऽजादेरच्चः परे न दराः संयोगादयो न द्विरुच्यंत इति सूत्रार्थः। एवं च पूर्वसूत्रे
द्वितीयस्येति न कर्त्तव्यमेवेति वक्ष्यते। हलः किं। तितउच्यां। अत्र तनोतेर्डउः सन्वच्चेति डउप्रत्ययः। सन्वद्भावाद्द्वि

त्वं सन्न्यत इती त्वं च। यस्तोच्चारणसामर्थ्यात्फुणाभावः। यदि हि ञयोरपि अनंतरयोः संयोगसंज्ञा तर्हीह संयोगां
तस्येत्युकारलोपः स्यात्। अनंतरा इति किं। पनसम्। यदा ह सकारमकारयोः संयोगसंज्ञा स्यात्तर्हि स्कोरिति
सूत्रेण सकारलोपः स्यादिति दिक्॥ ॥मुखनासिकावचनोऽनुनासिकः॥ ॥मुखसहिता नासिका मुखना
सिका। तयोच्चार्यमाणोऽनुनासिकसंज्ञः स्यात्। संज्ञाप्रदेशाः। आङोऽनुनासिकश्छंदसीत्यादयः। अभ्र आँ अ
पो वरुणेना। गभीर आँ उग्रपुत्रे। इह न व्यत इति वचनः। कृत्यल्युटो बहुलमिति बाहुलकात् कर्मणि ल्युट्। राज्ञो
ज्ञानाशनलयमिति वदिति वत्स्यनुसारिणः। भाष्यकैयटयोस्तु न व्यते नेनेति वचनं। करणे ल्युट् सामान्येन पुंसकं।
शाकं वस्तु दुपहंतुमिति वत्। तेन लुंप्यं क्रियावेत्। संस्कृतं भक्षाः इति वच्च। इदं च विशेषणानां वा जातेरित्यत्र वक्ष्य
माणेन पदसंस्कारपक्षे गुणवचनानामित्यादिना वा निकमित्यनेन सह यथा न विरुध्यते तथा तत्रैव वक्ष्यामः। त

तो मुखनासिकावचनं यस्येति बहुव्रीहिः। मुखेति किं। यमानुस्वाराणामेव मा भूदिति भाष्यं। तत्र वर्गैर्व्यादितस्य
तुर्णां पंचमे परे तन्मध्ये पूर्ववर्णसमानाकारं वर्णांतरं प्रातिशाख्ये आगमत्वेन विहितं। तद्यमसंज्ञं। यम इव य
मः। यमौ हि लोके प्रायेण समानाकारौ भवतः। यथा पलिक्नीः। चख्नतुः। अग्निः। अघ्नन्। इत्यत्र कखगघ इत्येभ्यः
परभागेन तत्तत्सादृश्यो यमागमः। यत्तूक्तं विवरणे। वर्गपंचमयुक्ताः प्रथमादयो यमा इति। तच्चिंत्यं। अयोगवाह
त्वप्रतिपादके न हयवरट्सूत्रस्थभाष्येण सह विरोधात्। केवलनासिक्यत्वपरेण यमानुस्वाराणामेवेति
भाष्येण सह विरोधाच्च। अथेदं भाष्यं न केवलनासिक्यत्वपरं किंतु अं इत्यादीनां भागमात्रं नासिक्यं यमानुस्वा
राणां तु मुखनासिक्यत्वेपि प्रासादवासिन्यायेन नासिक्यत्वमप्यस्ति न तु तदीयं भागमात्रं तथेत्येवंपरं तथापि
ऽपादितश्चतुर्णां तद्संभव एव। किंचैवं नैव दोषो नैव प्रयोजनमिति तदुत्तरभाष्यग्रंथविरोधः। यद्वा नीत्यादेः प

रोनुनासिक इत्यस्य प्रवृत्त्यापत्त्या त्वत्पक्षे दोषस्योद्धृतत्वात्। अत एव प्रातिशाख्ये। स्पर्शयमाननुनासिकाः स्वा
न्परेषु स्पर्शेष्वनुनासिकेष्वित्युपक्रम्य। प्रदेष्वध्युवध्म सुद्धित्यत्र यमं निषेद्धुमारब्धे। न स्पर्शस्योष्मप्रकृतेः परस्ता
घमापत्तिमिति सूत्रे परस्ताच्छब्दः प्रयुक्तः। यमः प्रकृत्यैव सदृक्श्रुतिर्वा यमेन मुख्यास्ति समानकाले त्यादि सूत्रां
तरे अपि स्पष्टमेव यमस्य वर्णान्तरत्वं। तथा नारदीयशिक्षायामपि। अनंत्यश्च भवेत्पूर्वो ह्यंतश्च परतो यदि।
तत्र मध्ये यमस्तिष्ठेत्सवर्णः पूर्ववर्णयोरिति। सवर्णः सदृशः। अत्र पूर्ववर्णयोरिति द्वित्वमविवक्षितं। यद्वा द्व
त्यादौ जकारद्वयसत्वेपि मया। अत्र वस्तवोरंतदेवाद्यत्यादौ जकारद्वयाभावादिति तद्व्याख्यातारः। तथा सूत्रं
त्र व्याकरणस्थस्यच्छांदोग्यलक्षणस्य प्रणेता उद्भ्राजिष्णुः सूत्रयत्। अनंत्यो त्वसंयोगे मध्ये यमः पूर्व
स्य गुण इति। पूर्वस्य गुण इत्यस्य पूर्वभक्त इत्यर्थः। एतेनागमत्वं स्फुटीकरोति। तथा संयोगमध्ये खरव्याख्यायां

गौतमशिक्षायामपि। अथ चतुरक्षराणामुदाहरणं सयमायमाभ्यां सयमास्ताव यथाग्निरिति द्वौ गकारौ यम
नकारौ। ग्न इति द्वौ ञकारौ यम ञकारावित्यादि। तथा तत्रैव ग्रंथारंभे। अयस्पिंडो दारुपिंड ऊर्णपिंडश्चेति त्रे
धा संयोगं विभज्य यमसहितमयस्पिंडमित्युक्तोऽन्तस्थयमसंयोगो विश्लेषो नोपलभ्यते। अशरीरं यमं प्रा
हुरन्तस्थः पिंडनायक इत्युक्तंऽन्तस्थोत्र वर्गपंचमः अशरीरमिति स्वरभक्त्यादिवद्व्यंजकलिपिविशेषशून्यमि
त्यर्थः। लक्षणवशेनैव तदीयस्थलविशेषनिश्चयसंभवाल्लिपिसंप्रदायप्रवर्त्तकाचार्यैः स्वरभक्तेरिव यम
स्यापि व्यंजकीभूता लिपिर्न कल्पितेत्यर्थः। रलयोरूष्मणि परे मध्ये स्वरभक्तिरिति हि प्रसिद्धं शिक्षादौ। यत्र
तु नैवंविधेन लक्षणेन स्थलावधारणं कर्तुं शक्यते तत्रागत्या लिप्यंतरं प्रवर्त्तितं यथा विसर्गादौ। पाणिनी
यशिक्षायामपि। त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः संभवतो मताः। प्राकृते संस्कृते वापि स्वयंप्रोक्ताः स्वयंभुवा। स्व

रविंशतिरेकश्च स्पर्शानां पंचविंशतिः। यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः। अनुस्वारो विसर्गश्च ᳵ
कᳶपौ चापि पराश्रयौ। दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव चेति। अत्र हि यमानां पृथग्गणनास्पष्टमेव वर्णा
न्तरत्वं। गणना त्विच्छा। अइउऋऌ इति चतुर्णां ह्रस्वदीर्घप्लुतभेदात्त्रैविध्ये द्वादश। ऌकार एकः। एचां दीर्घप्लुतभेदा
दष्टौ। इत्थं स्वरा एकविंशतिः। स्पर्शाः पंचविंशतिः। यरलवशषसहेत्यष्टौ। यमाश्चत्वारः। प्रथमयमद्वितीयय
मादिभेदेन विभजनात्। अत एव कुं खुं गुं घुं इति यमचतुष्टयं न्यासादावुदाहृतं। कचटतपाः। कुः खछठथफाः
खुरिं ᳶ चत्वारः। दुःस्पृष्टश्च वक्तृवानां प्रसिद्धः। ईऌने चो ह्रेति। इत्थं त्रिषष्टिः। ऌकारस्य प्लुतसंभवात्तेन सह च
तुःषष्टिः। तदेतदुक्तं। संभवत इति। हयवरट् सूत्रे क्षीरोदकारे प्याह। वर्गात्ये नं त्यात्परे तयोर्मध्यवर्ती नासि
क्यस्थानो यम इति। यत्तु कश्चिदाह। यमा आदेशाः। न चतेषामानुनासिक्यपक्षतद्भूतेत्यादौ यरो नुनासिक इत्य
त्यादिपरिभाषा नाश्रित्य न तत्दुतरस्याशरीरस्यापि कथं विद्वद्दर्शनतात्पर्यकं वेदमिति ध्येयं। अनुस्वारविसर्गᳵकᳶपूर

व्यवस्थितविभाषाश्रयणादिति। तदुक्तं। प्रागुक्तप्रातिशाख्यनारदीयशिक्षादिसकलग्रन्थविरोधेनादेशपक्षस्य गर्भस्रावेणैव गतत्वात्।१

नुनासिकादेशापत्त्या नैव दोषो नैव प्रयोजनमिति भाष्यं विरुध्येतेति वाच्यं। व्यवस्थितविभाषाकल्पनस्य निर्मू-
लत्वात्। एतेन एतदीयलेखनप्रामाण्यभ्रमेणानुपसर्गादित्यादेर्वर्णाभावं दधीत्यस्य मुखाभावं साधयं-
तस्तदनुगामिनोपि परास्ताः। नारदेन यदिदं त्यज जकारद्वयस्य स्फुटमभिधानात्। तस्यैतस्य त्रयस्याम्नोमतां
पर्वणामितीत्यारण्यकप्रयोग इव सजातीयसमभिव्याहारान्नस्याघोभेद इति तु प्रसिद्धं शास्त्रे। अत एव न व्यंज-
न परस्यैकस्यानेकस्य वा विशेषोस्तीति भाष्यं। व्यंजनात्परस्य व्यंजनं परं यस्येत्येवं भूतस्य वदुर्लक्षो भेदेवि-
स्था भाग इत्येवं परतया तत्र तत्र कैयटेन व्याख्यातं। अत एव बहुषु पुस्तकेषु तत्तापयत्यावार्य इति भाष्यग्रंथः। अनुप-
सर्गादिति सूत्रेपि केषांचित् मुखपाठः संमत एव। पाठांतरं तु अन्याभूतरं आलुब्धूतदसहनेद इति वसोत्रत्वादसं-
हितया वा समाधेयमिति दिक्। तदेतत्सकलमभिसंधाय प्रक्रियाप्रकाशे गुरुचरणै रुक्तं। तद्धानमित्यादौ तु स्थु

त्वं भवत्येवेति। यमस्य मुखनासिक्यः केवलनासिकास्थानो वेति मतद्वयं। नासिक्या नासिकास्थानाः। मुखनासि
क्या वेति तैत्तिरीयप्रातिशाख्यात्। अनुनासिकविषये तु दर्शनत्रयं। एकस्मिन् वर्णे मुखेन नासिकया चोच्चार्यत इत्ये
कं। पूर्वो भागो मुखेन। परो नासिकयेति द्वितीयं। तद्वैपरीत्यात्तृतीयं। द्वितीयतृतीययोर्भागमात्रस्य नासिक्यत्वे
पि तदुपरागाद्भागांतरमपि तद्वदवभासते। तथा च नासिकान्वयस्य भागमात्रविषयतया नासिकावचनग्रहणे
न मुखनासिक्यो वर्णो निगृह्येत। किंतु मतविशेषे केवलनासिकास्थानतया यमादय एव गृह्येरन्। ततश्च विधि
प्रदेशेऽङ्गोऽनुनासिक इत्यादौ यमानुस्वारा एव विधीयेरन्। विद्गुनो रनुनासिकस्यादित्यादौ त्वनुवादेऽप्रति
पत्तिरेव स्यादित्युदाहृतभाष्याशयः। तस्माद्दर्शनद्वये मुखपदोपादानं सार्थकमिति स्थितं। प्रथमदर्शने तु प्रासाद
वासिन्यायाश्रयणेनोभयवचनानामपि सिद्धा संज्ञा। आंतरतम्याच्च विधिप्रदेशेषु यमानुस्वाराणामप्र

वृत्तिः। तथा च मुखशब्दोपादानं न कर्तव्यमिति भाष्ये स्थितं। मुखं च वचनं इत्येवोक्ते तु कचटतपादीनामपि स्या
त्। ततश्चक्षक्त इत्यत्र कलोपः स्यात्। पक्क इत्यत्र वकारलोपः स्यात्। तप्तमित्यत्र यलोपः स्यात्। उदनप इत्या
दावनुनासिकस्य क्विझलोरिति दीर्घः स्यात्। अनुपश्चान्नासिका व्याप्रियते यस्मिन्नासिकायाः पश्चान्मुखं
व्याप्रियते यस्मिन्निति वाऽन्वर्थसंज्ञेयं तेन नासिकाव्यापारस्य भागविषयकत्वस्त्वना त्मासादवास्मिन्ना
यस्याविषयोयमिति ध्वनितं। एतच्च सूत्रं प्रत्याख्यातुं शक्यं। प्रदेशवाक्येष्वेव प्रागुक्तस्य नासिकामनुगत
इत्यस्य वा योगस्याश्रयणेन सकलेष्टसिद्धिरिति दिक्॥ ॥तुल्यास्यप्रयत्नं सवर्णं॥ ॥ताल्वादिस्थानमा
भ्यंतरप्रयत्नश्चेत्युभयं यस्य वर्णस्य येन वर्णेन सह समानं स तस्य सवर्णो बोध्यः। संज्ञाप्रदेशाः अकः सव
र्णे दीर्घ इत्यादयः। यद्यपि तुल्यशब्दं मितं तुल्यमित्यवयवार्थः। नौवयोधर्मविषमूलमूलसीतातुलाभ्यस्ता

ऽप्रसृक्षेपणे। वाकुलकात्करणे ल्यत्। यद्वा। आस्यंदते अन्नं अस्माद्द्रवी भवतीत्यास्यं। अन्येष्वपीति ड प्रत्ययः। अथवा अन्नेन द्रवीक्रियत इत्यास्यं। २

र्यं तुल्यप्राप्यव्याख्यानाम्य सम समित सं मितेषु। इति सूत्रेण तुला शब्दात् संमितेय ह्विप्रख्यानात्। तथाप्ययं सदृशमा
त्रे रूढः शब्दः। अस्यंति उच्चारयंत्यनेन वर्णानित्यास्यं। अंतर्भावितण्यर्थात्कर्मणि ड्यः। परितः स्वातापरि स्वेति
वत्। तत्र भवमास्यं। ताल्वादिस्थानं। शरीरावयवाद्यत्। यस्येति लोपे हलो यमामिति यलोपः। न वा ऽल्लोपस्य
स्थानिवद्भावः शंक्यः। यलोपे कर्तव्ये तन्निषेधात्। प्रकृष्टो यत्नः प्रयत्नः। प्रकर्षश्चाभ्यंतरत्वं। प्रारंभे यत्नो वा
प्रयत्नः। आभ्यंतरप्रयत्नो हि वर्णप्रारंभकाल एव व्याप्रियंते। तथा च तुल्यौ स्थानप्रयत्नौ यस्येति द्वंद्वगर्भो बहु
व्रीहिः। यद्वा। तुल्यः आस्ये प्रयत्नो येषामिति त्रिपदो बहुव्रीहिः। आस्ये इति विशेषणं बाह्यप्रयत्नव्युदासः। आस्ये इ
त्येकत्वं विवक्षितं। तद्धितांतास्य शब्दोपादान सामर्थ्यात्। तेन भिन्नस्थानानामपि व्युदासः। यद्वा। तुल्यः आस्ये तुल्या
स्यः। मयूरव्यंसकादित्वात् साधुः। तुल्यास्यः प्रयत्नो यस्येति विग्रहः। यद्वा। आस्ये प्रयत्नः आस्यप्रयत्नः स तुल्यो य

श्रि॰ कौ॰
१२५
125

स्येति। एकत्वविवक्षादिकं प्राग्वत्। तदेवं समासचतुष्टयमपि भाष्ये स्थितं। द्वंद्वगर्भो बहुव्रीहिः। त्रिपदो वा। पूर्व
भागे तत्पुरुषगर्भः। उत्तरभागे वेति। तुल्यशब्दस्य संबंधिशब्दत्वाद्येन सह तुल्यस्थानप्रयत्नं तेन सह सवर्ण
मिति लभ्यते। नहि माता पूज्येत्युक्ते स्वसुतमाता भार्या पूज्यते किंतु पूजकस्यैव मातेति दिक्। तुल्यस्थानमिति किं।
तुल्यप्रयत्नानामपि कवर्गतपानां मा भूत्। तेन तर्प्तेत्यत्र झरो झरीति पकारलोपो न भवति। यत्नग्रहणं किं। चकार
शकारयोर्मा भूत्। सति हि सावर्ण्ये वाक्श्चोततीत्यत्र शकारलोपः स्यात्। आभ्यंतरत्वविशेषणमप्येतदर्थमेव।
अस्ति हि श्वासाघोषविवाराख्यबाह्यप्रयत्नसाम्यं चशयोरपि। ननु अल्पप्राणत्वमहाप्राणत्वकृतो भेदोस्तीति
चेत्। किं ततः। नहि सर्वप्रयत्नसाम्यं विवक्षितुं शक्यं। ऋदूकितद्रत्याद्यसिद्धिप्रसंगात्। कङयोरपि बाह्यप्रयत्न
भेदात्। सर्वप्रयत्नसाम्यं हि स्वस्य स्वेनैवायातीति न तु परेण। तथा च सवर्णसंज्ञाप्रणयनमपि व्यर्थं स्यात्। अण् राम
१२५

दित्तुल्यास्यप्रयत्नस्येत्युक्तौ सामंजस्यात्। ऊरो ऊरीत्युक्ते हलो यमां यमीत्यत्रैव यथासंख्यप्रवृत्त्या माहात्म्यमित्या
दैमकारस्येव भ्रिण्ढी त्यादेउकारस्यापि लोपो न स्यादिति हि सिद्धांते सवर्णग्रहणं कृतं। स चाव्याप्तियोग्यो यावत्स्व
यत्नसाम्याविवक्षायां तु दवस्थ एव स्यात्। अथया बद्धा स्यसाम्यं यावदाभ्यंतरसाम्यं वा विवक्ष्येत एवमपि
मधुलिट् स्थानामि सत्र ऊरो ऊरीति सलोपः स्यात्। सकारथकारयोः श्वासाघोषविवारमहाप्राणत्वरूपबा
ह्यप्रयत्नचतुष्टयेनापि साम्यात्॥ अथ स्थानप्रयत्नविवेकः। अकुहविसर्जनीयाः कंठ्याः। इचुयशास्ता
लव्याः। ऋटुरषा मूर्द्धन्याः। लृतुलसा दंत्याः। उपूपध्मानीया ओष्ठ्याः। ए ऐ कंठतालव्यौ। ओ औ कंठो
ष्ठ्यौ। वकारो दंतोष्ठ्यः। जिह्वामूलीयो जिह्वामूलस्थानः। अनुस्वारो नासिक्यः॥ यत्नो द्विधा। आभ्यंतरो
बाह्यश्च। तत्राभ्यंतरश्चतुर्धा। स्पृष्टता ईषत्स्पृष्टता संवृतता विवृतता चेति। तत्र स्पृष्टता स्पर्शानां। ई

शि०कौ०
१२५
126

षत्स्पृष्टतां तस्थानां। ह्रस्वस्यावर्णस्य प्रयोगे संवृतता। शास्त्रीयकार्ये तु विवृतता प्रतिज्ञाय
ल इति त्र्यश्इउण्सूत्रे प्रतिपादितं। यत्नः संवृतता इति तु प्रातिशाख्योक्तत्वानु सर्वसाधारणं। ऊष्म
णां स्वराणां च विवृतता। एषां चतुर्णामिप्याभ्यंतरत्वं वर्णोत्पत्तिप्राग्भावित्वात्। तथा हि। नाभिप्र
देशात्प्रयत्नप्रेरितो वायुः प्राणो नाम ऊर्ध्वमाक्रामन्नुरः प्रभृतीनि स्थानान्याहंति। ततो वर्णस्य तदभिव्यं
जकध्वनेर्वोत्पत्तिः। तत्रोत्पत्तेः प्राग्यदा जिह्वाग्रोपाग्रमध्यमूलानि तत्तद्वर्णोत्पत्तिस्थानं ताल्वादि सम्यक्
स्पृशंति तदा स्पृष्टता। ईषद्यदा स्पृशंति तदा ईषत्स्पृष्टता। समीपावस्थानमात्रे संवृतता। दूरत्वे विवृतता। अ
त एव इचुयशानां तालव्यत्वाविशेषेपि तानुस्थानेन सह जिह्वाद्यादीनां वर्णोच्चारणे कर्तव्ये सम्यक् स्पर्शः। य
कारे ईषत्स्पर्शः। शकारेकारयोस्तु दूरे वस्थितिरित्यादि। अनुभवं शिक्षाकारोक्तिं वानुसृत्य विवेचनीयं। भाष्यका राम
१२५

रास्तु नाज्झलावित्यस्य प्रत्याख्यानावसरे ऊष्मणां स्वराणां च ईषद्विवृतत्वं विवृतत्वं चेति वैलक्षण्यं वक्ष्यंति। तदप्य
नुमतानुसार्येवेति सहृदयैराकलनीयं। बाह्याः प्रयत्नाः पुनरेकादश। विवारः संवारः श्वासो नादो घोषोऽघो
षोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति। एते च वर्णोत्पत्तेः पश्चान्मूर्ध्नि प्रतिहते निवृत्ते प्राणाख्ये वा
यौ उत्पद्यंते। अत एव बाह्या इत्युच्यंते। गलबिलस्य संकोचात्संवारः। तस्यैव विकासाद्विवारः। एतौ च संवृतविवृ
तत्वरूपाभ्यामाभ्यंतराभ्यां भिन्नावेव। तयोः समीपदूरावस्थानात्मकत्वादित्यवधेयं। तत्र वर्गाणां प्रथमद्विती
याः शषसविसर्जनीयजिह्वामूलीयोपध्मानीया यमौ च प्रथमद्वितीयौ विवृतकंठाः श्वासानुप्रदाना अघोषा
वर्गयमानां प्रथमेऽल्पप्राणा इतरे सर्वे महाप्राणाः। वर्गाणां तृतीयचतुर्थाऽन्तस्था हकारानुस्वारौ यमौ च तृ
तीयचतुर्थौ संवृतकंठा नादानुप्रदाना घोषवंतो वर्गाणां तृतीयाऽन्तस्थाश्चाल्पप्राणा यथा तृतीयास्तथा पंचमा

ऽऽनुनासिक्यमेषामपरो गुणः इति शिक्षासु स्थितं। संग्रहश्च। खयां यमाः खयः ᳵकᳶपौ विसर्गः शर एव च। एते
श्वासानुप्रदाना अघोषाश्च विवृण्वते। कंठमन्ये तु घोषाः स्युः संवृता नादभागिनः। अयुग्मा वर्गयमगा यणश्चा
ल्पासवः स्मृताः। यद्यप्येते बाह्याः प्रयत्नाः सवर्णसंज्ञायामनुपयुक्तास्तथापि आंतरतम्यपरीक्षायामुप
योक्ष्यंत इतीह आभ्यंतरत्वविशेषणं व्यावर्त्यतयाऽव्युत्पादिताः। नन्विह सूत्रे प्रयत्नग्रहणं व्यर्थं। तद्धितांतास्य
शब्दबलादेव ताल्वादिस्थानस्य प्रयत्नस्य च लाभादिति चेन्न। प्रत्येकव्यापारनिरासार्थमुभयोरुपादाना
त्। तेन स्थानप्रयत्नोभयसाम्ये सत्येव संज्ञा न त्वन्यतरसाम्येति। एवं स्थिते यत्फलितं तत्स्पष्टत्वार्थमुपन्यस्य
ते। अष्टादश अवर्णाः परस्परं सवर्णाः। एवमिवर्णोवर्णौ। ऋकारा अष्टादश। ऌवर्णस्तु द्वादशेति त्रिंशन्मिथः स
वर्णाः। ऌवर्णस्य दीर्घा न संतीत्युक्तत्वात्। ऋऌवर्णयोर्मिथः सावर्ण्यस्योपसंख्यानात्। एवं तु द्वादश द्वादशमि

यः सवर्णः। ननु एकारैकारयो उकारौकारयोर्वा मिथः सवर्णौ। यथा वैतत्तथा अइउण् इत्यत्रैव प्रतिपादितं। अकारेण ए
चां न सावर्ण्यं। प्रयत्नभेदादिति इहैव सूत्रे भाष्ये स्पष्टं। अत एव एदैतोरपि इकारेण न सावर्ण्यमिति तेषां नाज्झला
विति सूत्रे उदाहरणं त्वं नास्ति। न चात्र स्थानभेदेन निर्वाहः। एवमकारेण सह कंठस्थानसाम्यात्। एदैतोः इकारे
ण सह तालुस्थानसाम्यात्। न हि यावत्स्थानं तत्साम्यं विवक्षितं। अमङणनानां स्ववर्ग्यैः सह असावर्ण्यापत्तेः।
यवलानां सानुनासिकनिरनुनासिकानामसावर्ण्यापत्तेश्च। न हि निरनुनासिकानामपि नासिकास्थानं। ये
न सर्वसाम्यं स्यात्। यं कंठमणिरित्यावक्ष्यते। तत्कथं नासिकास्थानभेदेनासवर्णत्वमापद्यत इति चेत्। नासि
का न हि न बाह्या वर्णोत्पत्तौ निमित्तं। तत्र जिह्वाग्रादिव्यापारविरहात्। किंतु अंतरास्ये विततं वर्मास्क्लिपणं वचर्मव
वृतसंबद्धो देहचाविशेषो नासिका। सैव वर्णोत्पत्तौ निमित्तमिति सिद्धांतात्। तस्या अथ उष्मादिभ्योऽविशेषात्।

ननु तद्धितांतास्य शाह्वलोत्ताऽच्यादि साम्यमात्रं लभ्यते। उष्मा त्वमतिप्राक्का कजकाद्वि आस्यो का कजकं वर्गाबायाउन्तप्रदेशः। २

शा०कौ०
१२८
128

वर्ग्यो वर्ग्येण सवर्णः। तुल्यास्यप्रयत्नात्। रेफस्य रेफ एव सवर्णः। एवमूष्मणामपि ऊष्माण एव सवर्णः। न
त्वन्यो। तुल्यास्यप्रयत्नत्वाभावात्। धूष्मसहानां यथाक्रमं दकारसकारऌकाराकाराः सूत्रकारमते यद्यपि
तुल्यास्यप्रयत्नास्तथापि न सवर्णाः। नाज्झलाविति निषेधात्। भाष्यकारमते तु प्रयत्नभेद एवेति वक्ष्यते। इह स्था
नभेदादप्राप्तां सवर्णसंज्ञां विधातुं वार्त्तिकमारभ्यते। ऋकारऌकारयोः सवर्णविधिरिति। होतृऌकारः होतृ
कारः। उभयान्तरतम ऌकारान्तरतमस्य दीर्घो न संभवतीति परिशेषादृकारः। स्यादेतत्। अकः सवर्णे दीर्घ
इत्यत्र ऋति सवा वचनं ऌति ऌवा वचनमिति वक्ष्यति। तस्यायमर्थः। अकः सवर्णे ऋति परे पूर्वपरयोः स्था
ने वा ऋ अयमादेशो भवति। द्विमात्रोयं। मध्ये द्वौ रेफौ। तयोरेका मात्रा। अभितोऽज्भक्तेरपरा। ईषत्स्पृष्टश्चायं। राम
त ऋप्रयत्नभेदादृकारेण ग्रहणादनच्त्वाद्दीर्घसंज्ञाया अभावादप्राप्तोऽयं विधीयते। ऌति ऌवेति। अयमपि १२८

द्विमात्रः। ईषत्स्पृष्टश्च। मध्ये द्वौ लकारौ तयोरेका मात्रा। अभितोऽभक्ते ऋपरः। पूर्ववद् आप्नोति दीर्घो विधीयते। तत्र वा
वचनमिति वा शास्त्रे दीर्घ समुच्चयार्थो भविष्यति। वाक्याद्वि वाक्योपमयोरेवार्थेपि समुच्चये इत्यभिधानात्। तेना
प्राप्त एव दीर्घो भविष्यति। तत्किं सवर्णसंज्ञया। नन्वृति ऌ वेत्यत्र सवर्ण इत्यनुवर्तते न वा। आद्ये हि तदृ
कार इत्यत्र सऌवर्णयोः सवर्णसंज्ञाविधानं विना नेष्टसिद्धिः। अन्त्ये दृकारो मध्ये ऌकार इत्यादावतिप्रसं
गः इति चेत्। न। प्रथमवार्तिके सतीत्यपनीय सत इति पंचम्यन्तपाठे नैव सर्वसामञ्जस्यात्। सवर्ण इति च पूर्ववा
र्तिकेऽनुवर्तते। तेन ध्यात्रंशादित्यादौ नातिप्रसंगः। द्वितीयवार्तिके तु सवर्ण इति निवृत्तं। सत इत्यनुवर्तते। तस्मादकः
सवर्ण इत्यत्र अवश्यकर्तव्ये न वचनद्वयेनैव सकलनिर्वाहे ऋकार ऌकारयोः सवर्णविधिरिति हत्यं वार्तिकं
व्यर्थमिति। मैवं। इहत्यमेकं वार्तिकमाश्रित्य भाष्य वचनद्वयप्रत्याख्यानस्यैव न्याय्यत्वात्। तथा हि। तद्वचन

द्वयं कुर्वतापि रेफद्वयलकारद्वयगर्भयोस्तद्विधेययोरच्त्वं तावदेष्टव्यं। तन्निर्वाहार्थं वर्णसमाम्नाये तौ पठ
नीयौ। अन्यथा हि विधानमात्रमनयोः स्यात् न त्वच्कार्यं प्लुतः। तद्विधाने हि अच्चश्चेति परिभाषया अच इत्युप
तिष्ठते। ननु ईषत्स्पृष्टस्यान्तस्थामात्रस्य प्लुतः। विवृतस्य तु सकारस्यात्वेन प्लुतः सिद्ध एवेति चेत्। सत्यं विवृ
तः प्लुतः सिद्धः। ईषत्स्पृष्टौ तु प्लुतौ रेफद्वयलकारद्वयगर्भौ न सिध्यतः। अत एवाच्संज्ञामात्रेणापि न निस्ता
रः। ग्रहणशास्त्रप्रवृत्तेस्तावन्मात्रेणानिर्वाहात्। किन्तु अणसु पाठ एव कर्तव्य इत्युक्तं। सति त्वणसु पाठे ताभ्यां त्रिमा
त्रयोरपि ग्रहणात् प्लुतसंज्ञायां सत्यां पक्षे ईषत्स्पृष्टौ प्लुतौ भवतः। एवं स्थिते षाष्ठं वचनद्वयमास्तां। तद्विधेययोरपि
दीर्घतया अकः सवर्णे दीर्घ इत्यनेनैव सिद्धेः। ननु स्थानेऽन्तरतमपरिभाषया विवृतस्य स्थानिनो विवृतावेव दीर्घौ स्या
तां न त्वीषत्स्पृष्टाविति चेत्। न। रेफद्वययुक्तस्य स्थानिनो रेफद्वययुक्त एवादेशः सुसदृशः इत्यपि हि संभवति।

तथा च किं रेफद्वययुक्तत्वमादर्तव्यं किं वा विवृततत्वमित्यत्र विनिगमकाभावेन पर्यायेणोभयत्र वक्तौ सिषाध
यिषितस्य रूपद्वयस्य निर्वाहात् । ऋकारेपि कदाचित्कारांतरतमो विवृततदीर्घः कदाचित्कारांतरतमा ऌका
रद्वयगर्भदीर्घस्पष्ट इति सकलेष्टसिद्धेः । तदेवं पाष्ठवचनद्वयं न कर्तव्यमिति स्थितं । ननु तदेवास्तु संज्ञाविधानं
तु मास्त्विति चेन्न । वचनद्वयारंभे गौरवस्य स्पष्टत्वात् । किं वा संज्ञाभावे सत्यकः उपसर्गादृति उरण् रपर इत्या
दिषु सकारेण ऌकारग्रहणं न स्यात् । न चैवं सिद्धांतेपि तवल्कार इत्यादौ रपरत्वप्रसंगः । रग्रहणेस्यो रपरत्वस्य
वक्ष्यमाणतया लपरत्वसिद्धेः । ऋदिता ऌदितां च ध्यातॄनामनुबंधकार्येषु संकरस्तु न भवति । ध्यातूपदेशे पृथ
गनुबंधकरणसामर्थ्यात् । विधिवाक्येष्वपि पृथगनुवादसामर्थ्यात् । अन्यथा हि सर्वत्र ऋदित एव ऌदित एव
वा पठित्वा विधावपितेनैव रूपेणानुवदेत् । संभवत्येकरूप्ये वैरूप्याश्रयणायोगात् ॥ ॥नाकृतौ॥ ॥ऋऌ

लौ मिथः सवर्णौ न स्तः। अकारहकारयोरिकारशकारयोः ऋकारषकारयोः ऌकारसकारयोश्चेति स्थलचतु
ष्टये पूर्वसूत्रेण प्राप्तं सावर्ण्यमनेन निषिध्यते। तेन आनडुहं चर्मवैपाशो मत्स्य इत्यत्र यस्येति चेति हकारशकार
योर्लोपो न। अन्यथा हि यस्येत्यनेन दीर्घाणामिव हकारशकारयोरपि ग्रहणं स्यात्। तथा दण्डहस्तः दधिशीतं क
र्तृषड्कुं इत्यादौ सवर्णदीर्घः स्यात्। दधिसान्द्रमित्यादौ यणादेशश्च स्यात्। इह अज्झलौ कस्यापि न सवर्णौ स्त इ
ति वाक्यार्थो न ग्राह्यः। संज्ञारंभवैयर्थ्यापत्तेः। विहितप्रतिषिद्धत्वेन विकल्पे तु। लाघवात् तुल्यास्यप्रयत्नं सव
र्णं वेत्येव सूत्रयेत्। नाप्ययमज्भिर्हलां हल्भिः सावर्ण्यं निषिध्यते। नाज्झलावित्यत्रैव सूत्रे सवर्णदीर्घस्यायो
ह इति पूर्वसवर्णदेशस्य च निर्देशात्। ननु अऌ त्वेवात्र निर्दिष्टो न तु हल्। तावतैवेष्टसिद्धेरिति चेन्न हि दीर्घनिर्देश
एव ज्ञापको ऽस्तु। तेन हि अचामज्भिः सावर्ण्यमनिषिद्धमिति ज्ञापिते परिशेषादज्झलोर्मिथो निषेध्य एव पर्यवस्य

ति। ऋरो ऌरि सवर्णे इति ज्ञापकाश्चापयत्नेनाणुदित्सूत्रेणावित्येव कुतो न सूत्रितमिति। तन्नाकर्त्तव्यं षड्कं दध्यि सांद्रमित्याप

त्तिव्याप्तेः। सकारलकारयोरणत्वात्। ग्रहणसूत्रातिरिक्ते पूर्वएवाणित्युक्तत्वात्। अस्तु वा परेणणत्वथापि लु

अपेक्षयाव्यक्तिगौरवमेवस्यादिति। अत्र ग्रहणमपनीयाणग्रहणं क्रियतामिति शंकायागर्भस्त्रावेणैव गतत्वा

त्। शलं शे तु व्यक्तिलाघवे सत्यपि वर्णोच्चारणे विशेषो नास्तीत्येवोत्तरं॥ वस्तुतस्तु नाकुशलावित्येव सूत्रयितुमु

चितं। स्यादेतत्। शरां शर्भिरपि सावर्ण्यं निषिध्येत। ते हि इकारादिभिर्गृहीतत्वादवुसंज्ञकाः। हल्त्वं पूपदेशाद्बलेन्स्वा।

न वास्मादेव निषेधादिकारादयो न सवर्णा इति वाच्यं। एतद्वाक्यार्थबोधात्प्राक् पदार्थोपस्थितेरावश्यकतया तस्या

मवस्थायामिकारादिभिः शरामुपस्थापनस्य दुर्वारत्वात्। ततश्च परस्परं शराः। रामव्यष्ठः। यशस्सारमित्यादौ ऋरो

ऌरीत्यस्य प्रवृत्तिर्नस्यात्। ततश्चैकैकत्र शरद्वयं श्रूयेत। इष्यते तु द्वयं। तथा च पूर्वपक्षवार्त्तिकं। ऋऌ लोः प्रतिषे

ध्ये शकारप्रतिषेधोऽज्झल्त्वादिति। अत्र शकारग्रहणं शरामुपलक्षणं। किं वा अवर्णस्याष्टादशधा भिन्नस्य
परस्परं सावर्ण्यं न स्यात्। तत्तथ्यदंडाग्रमित्यादौ दीर्घो न स्यात्। तथा हि। हकारेण ग्रहणं दकारो हल्। अक्षुपाठशा
वृ। न वास्मिन्नेव सूत्रे एतस्य प्रवृत्तिः। येन ग्रहणेकशास्त्रमसावर्ण्यान्न प्रवर्त्तेतेति। अत्रासिद्धांतं वार्त्तिककार एवा
ह। सिद्धमनच्त्वात्। वाक्यापरिसमाप्तेर्वेति। तत्र सूत्रप्रत्याख्याने नोत्तरं प्रथमवार्त्तिकेऽभिप्रेतं। तथा हि। ऋक्त्वावाक्ये वि
वृतमूष्मणां। इति योगो विभज्यते। तत्र चर्ईषदित्यनुवर्त्तते। स्वराणां चेति विवृतमित्यनुवर्त्तते। ईषदिति निवृत्तं। तथा च प्र
यत्नभेदादूष्मस्वरयोः सावर्ण्याप्राप्तौ किं सूत्रेण। तथा च शषसमनच्त्वादेव सिद्धमित्यर्थः। उपलक्षणं चेदं। अकार
स्याहल्त्वादित्यपि बोध्यं। सूत्रारंभमभ्युपेत्येदं। वस्तुतस्तूक्तरीत्या सूत्रमेव नारंभणीयमित्यर्थः। ईषदित्यस्यान
नुवृत्तिं समानप्रयत्नतां च स्वीकृत्य सूत्रारंभपक्षेऽप्याह। वाक्यापरिसमाप्तेर्वेति। अयमाशयः। इह पूर्वं वर्णाना

मुपदेशः। ततइत्संज्ञा। ततः आदिरन्त्येन सहेतेति प्रत्याहारसिद्धिः। ततो नाज्झलावित्यतद्वाक्यार्थबोधः। ततोपवादवि
षयपरिहारेण सवर्णसंज्ञानिश्चये सति ग्रहणकशास्त्रप्रवृत्तिः। नत्वेतत्सूत्रनिष्पत्तिसमये। अन्यथा एतत्सूत्रे ऐ
वइकारशकारादीनां सावर्ण्यनिषेधादिकारेण शकाराग्रहणे सति अज्झल्त्वादिति हेतोरसिद्ध्या तदीयः पूर्वपक्षो
ऽसंभवदुक्तिकएव स्यात्। अथ पदार्थज्ञानस्य वाक्यार्थबोधहेतुतया एतद्वाक्यस्थपदार्थबोधकाले एतद्वाक्यार्थ
ग्रहाभावादिह सूत्रे इकारेण शकारग्रहः स्यादेव इतः पूर्वं सावर्ण्यनिषेधाग्रहादिति ब्रूषे तर्हि इतः पूर्वं ग्रहणकशास्त्र
मेव न निष्पन्नमित्यपि कथं न पर्यालोचयेः। नन्वेवं तुल्यास्यप्रयत्नं नाज्झलावित्यादौ अकः सवर्णे इति दीर्घेपि न प्रवर्त्ते
तेति चेन्न। सवर्णसंज्ञापुत्तरकाले प्रवर्त्तमानस्य दीर्घशास्त्रस्य दण्डाटकादाविवेहाप्यप्रतिबद्धप्रवृत्तिकत्वात्। उद्दे
श्यतावच्छेदकरूपाक्रांतत्वाविशेषात्। न च सवर्णदीर्घविधानात् प्रागेतत्सूत्रार्थबोधानुपपत्तिरिति वाच्यं। पदार्थो

पश्यतीति प्रभृतिसामग्रीसंपत्तौ सत्यां साधुत्वबोधकवाक्यार्थज्ञानविलंबेन शास्त्रबोधे विलंबादर्शनात्। अन्य
था व्याकरणशास्त्रपरिशीलनविकलानां क्वापि शाब्दबोधो न स्यात्। तथा। वैयाकरणानामपि व्याकरणस्वत्रघ
टकशब्देषु व्याकरणादेव साधुत्वबोधे तदुत्तरकालेव वाक्यार्थावगतौ आत्माश्रयान्योन्याश्रयचक्रकाणां दुर्वार
त्वादिति दिक्। साधुत्वज्ञानं तु न शाब्दबोधहेतुः। अस्तु वा अभियुक्तवाक्यत्वेन साधुत्वानुमितिः। ततः शाब्दबोधे
जाते लक्ष्यांतरेष्विव लक्षणवाक्यांतर्गतेष्वपि लक्षणप्रवृत्तिरिति दिक्। वस्तुतस्तु शरांपरस्परं सावर्ण्यनिषेधे
सत्यपि न क्षतिः। परः शतादिषु हि रूपद्वयं सिद्धांते पाठ्यते। शतात्परा एणीति विग्रहे कर्तृकरणे कृता बहुलमिति
बहुलवचनाद्वा सुप्सुपेति वा समासे कृते पारस्करादित्वात् सुडिति सकारस्य श्चुत्वं। ततो न विवेति द्विर्वचनं। ननु श
रोऽचीति अनचीति वा द्वित्वनिषेधोऽस्त्विति चेन्न। तत्र नाऽक्रलाविति निषेधादिकारेण शकारग्रहणात्। ततोऽरो

झरीति लोपविकल्पाद्द्विशकारं त्रिशकारं वा रूपमिति। सावर्ण्यनिषेधेपि सिद्धत्येवेदं रूपद्वयं। अनचिचेति द्वित्व
स्यापि वैकल्पिकत्वात्। तत्र द्वित्वस्य वैकल्पिकत्वं यरोऽनुनासिकेऽनुनासिको वेत्यतो वेत्यनुवर्त्तनात् सर्वत्र शाकल्य
स्येति पाक्षिकनिषेधाद्वा। लोपस्य वैकल्पिकत्वं तु झयो होऽन्यतरस्यामित्यतोऽन्यतरस्यांग्रहणानुवृत्तेरित्यवधेयं।
तस्मात्सावर्ण्ये सत्यसति वा परश्शाता इति द्विशकारकत्रिशकारकरूपयोरविशेषः। परश्शताद्यास्ते येषां परासं
ख्या शतादिकादित्यमरः। एवं रामष्षष्ठो यशस्मारमित्यादावपि। अत एव भाष्ये अपर आहेत्युपक्रम्य वार्त्तिकद्व
यमपि एकहल्तया व्याख्याय अस्तु वा ग्रहणमिकारादिभिः शकारादीनामिति वा कश्शेषव्याहारेण प्रतिज्ञा
विकल्पार्थो वाशब्द इति व्याख्यातं। तत्र अपर आहेत्यपरितोषोद्भावनं। तद्बीजं तु उक्तरीत्या शर्षु सावर्ण्यनिषेधानि
षेधयोः फलाविशेषेपि प्राग्उक्तरीत्या दंडाग्रमित्यादि न सिध्येत्। तदर्थं च सूत्रप्रत्याख्यानस्य वा क्वापदिसमाप्तिन्या

यस्य वा ऽनाश्रयत्वे ऽनावश्यके शरां शर्भिः सावर्ण्याभावाभ्युपगमो निर्मूल एवेति। स्यादेतत्। अगृहीत सवर्ण
नामेव नाज्झलाविति निषेध इति तावस्थितं। तथा च ईकारादीनां शकारादिभिः सावर्ण्यनिषेधात् कुमारी शे
त इत्यादौ सवर्णदीर्घः स्यादित्याशंक्य अचीत्यनुवृत्त्या समाहितं। एवं स्थिते। मालासु इत्यादौ षत्वं स्यात्। हका
रेण ऽकारग्रहणे सति गोरक्षि स्यादिवदिणः परत्वान्न प्राप्नुयात्। किं वा विश्वपाभिरित्यत्र हो ढ इति ढत्वं स्यात्।
वागाशीरित्यत्र रुयोरन्यतरस्यामिति आकारस्य धकारः स्यात्। गासीध्वमित्यत्र इणः षीध्वमिति मूर्धन्यादेशः
स्यात्। दासीष्टे इत्यादौ दादेर्धातोर्घ इति घत्वं स्यात्। राम आयातीत्यादौ हशि चेत्युत्वं स्यात्। देवा आयान्तीत्यादौ हलि
सर्वेषामिति यलोपः स्यात्। वास्वायितेत्यादौ यस्य हल इति यलोपः स्यात्। श्येनायितेत्यादौ क्यस्य विभाषेति लो
पः स्यात्। निवाय्येत्यादौ हलो यमां यमि लोप इति यलोपश्च स्यादिति बहूपप्लवप्रसंगः। अत आह। अकारो न हकारस्य

सवर्णः। ततोऽप्याकारः अइउण् सूत्रोपदिष्टतच्छिक्षारीत्याभिन्नप्रयत्नत्वात्। सवर्णेऽण्ग्रहणमपरिभाष्यमा
कृतिग्रहणादिति वार्त्तिकमते तु हकाराकारयोरेकजात्यनाक्रान्तत्वादेव नातिप्रसंगः। यद्वा आकारसहितो
वृ आवृ सवहत्वे अ आ आविति सूत्रे आकारप्रश्लेषो व्याख्येयः। तेन आकारस्य अवां वहत्वभिः सहसा
वर्ण्यं निषिध्यते। आकारप्रश्लेषे लिंगं तु कालसमयवेलासु तुमुन् इत्यादि निर्देशाः। अत्र पक्षे आ अ आ अ इति
द्वंद्वेन सवर्णदीर्घेण वा आ अ आविति सूत्रे दीर्घात्परः प्लुतोऽपि निर्दिष्ट इति व्याख्येयं। तेन यियाउ सोऽद्यत्यादौ गु
रोरनृत इति प्लुतादाकारात्परस्य मनःसस्य षत्वं नेत्यवधेयं। भाष्यमते तु ऊष्मणामीषद्विवृततान्युपगमे
न सावर्ण्यप्रसक्तिरेव नास्तीति सूत्रप्रत्याख्यानासकलमन्वाविलं॥ ॥इति श्रीशब्दकौस्तुभे प्रथमस्या
ध्यायस्य प्रथमे पादे चतुर्थमाह्निकं॥ ॥ईदूदेद्द्विवचनं प्रगृह्यं॥ ॥ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात्।

हरी एतौ। विष्णू इमौ। गंगे–अमू। तपरकरणमसंदेहार्थमिति वृत्तिकारः। अन्यथा हि यणादेशे कृते ह्रस्वस्या
यं निर्देशः इत्यपि संभाव्येत। ततश्च अकुर्वन्नत्रेत्यादावतिप्रसंगः स्यादिति भावः। भाष्ये तु व्यक्तिः पदार्थो
भेदकाश्च गुणा इति पक्षमाश्रित्य गुणान्तरयुक्तानां दीर्घाणां संग्रहार्थं तपरकरणमित्युक्तं। इदं च ईदिति
प्रथमतकारस्यैव फलमित्यवधेयं। तावतैव ऊकारेऽपि सिद्धेः। तात्पर इति पंचमीसमासपक्षस्यापि
स्थितत्वात्। एकारस्य तु अणत्वादेवाणुदित्सूत्रेण सवर्णग्राहकतासिद्धेः। ईदूतोः परमनणत्वात् गुणा-
न्तरयुक्तसंग्रहाय युक्तो यत्नः। तस्मादाद्यमतेऽपि ऊदेतोस्तपरकरणमसंदेहार्थमेवा गुणा नाम भेद
कत्वेऽतु ईदित्यपि तथेत्यभिप्रेत्यैकरूप्यं वृत्तिकृद्भिरुक्तं। इह तपर इति सूत्रे पंचमीसमासो माऽस्त्वित्य
भिप्रेत्य अदिति तथा च तपर एव एकारो निर्दिष्ट इत्यपि सुवचं। स्यादेतत्। असंदेहायापि क्रियमाणं त

परत्वं प्लुतं व्यावर्त्तयेदेवाद्यणायोर्मीलितं चक्षुः पटं न हि न पश्यतीति न्यायात्। अथायं दकारः स्तुदे इवेति
वदिवेत्। एवमपि एकारो गृह्यात्तु प्लुतो। असत्त्वात्। नत्वीदूतौ। वाक्यापरिसमाप्तिन्यायेन। नएत्वात्। जाति
परो निर्देश इति चेत्। तर्हि ह्रस्वेप्यतिप्रसक्तिः। दीर्घव्यक्तिरपि विशेषणीभूता विवक्षितेति चेत्कथं तर्हि प्लुत
संग्रहः। न वप्लुतव्यावृत्तिरिष्टैवेति वाच्यं। अग्नी३ इती त्यत्र अप्लुतवदुपस्थित इति सूत्रेण प्लुतत्वप्रयुक्ते प्रकृति
भावे निषिद्धेपि प्रगृह्यत्वप्रयुक्तस्य तस्येष्यमाणत्वात्। अप्लुतवदित्यस्य तु देवदत्तेतीत्यादौ चरितार्थत्वाद्
यथ्र्यं न शंक्यं। तथा च षष्ठे वार्त्तिकं। वद्वचनं प्लुतकार्यप्रतिषेधार्थं प्लुतप्रतिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसं
गोन्येन विहितत्वादिति। अत्राह भाष्यकारः। यथोद्देशं संज्ञापरिभाषमित्याश्रयणात् प्रगृह्यसंज्ञां प्रति प्लुतो
ऽसिद्धः। तथा च द्विमात्रत्वबुद्धेरप्रतिघातात्सिद्धा संज्ञा। कार्यकालपक्षेपि परं प्रगृह्यसंज्ञाया अप्पणे प्रगृह्य

स्येत्येतद्देशतया तां प्रति प्लुतस्यासिद्धत्वेनानुनासिकः प्रवर्त्ततैवेति स्यादेव दोषः। एतेनाग्नी३इतीत्यादौ प्र
कृतिभावोपि व्याख्यातः। प्लुतप्रगृह्या अचीति ज्ञापकात् स्वरसंधिषु प्लुतस्यासिद्धत्वेपि संज्ञां प्रति सिद्धत्वानपा
यात्। यथोद्देशपक्ष एवेहाश्रीयत इत्युक्तत्वात्। वस्तुतस्तु अनुनासिकप्रवृत्तिभयेनैवेह यथोद्देशपक्षाश्रय
णं। प्रकृतिभावस्तु कार्यकालपक्षेपि सूपपादः। न च प्रगृह्य प्रकृत्येत्यनेन एकवाक्यतापन्नां संज्ञां प्रति प्लु
तस्यासिद्धतया त्रिमात्रस्य संज्ञा दुरुपपादेति वाच्यं। प्लुतस्यासिद्धतायां बीजाभावात्। यत्तूक्तं प्लुतः प्रकृत्येत्येतदेव ज्ञा
पकमिति। तन्नः प्लुतिः तस्य न तत्स्थानिनो लक्षणया सर्वसामंजस्यात्। न चैवं लक्षणैव दोष इति वाच्यं। प्लुताश्रयप्रवृत्तिमू
लकवाक्यान्तरकल्पनापेक्षया लक्षणाया एवाभ्यर्हितत्वात्। अस्तु वा विशेषापेक्षं ज्ञापकं। सिद्धः प्लुतत्वप्रयुक्ते प्रकृतिभा
व इति न तु प्रगृह्यत्वप्रयुक्तेपि। तस्मात् कार्यकालपक्षमाश्रित्य प्रकृतिभावस्य समर्थयितुं शक्यत्वेपि अनुनासिकप्रवृत्तिवा

रणा यैवेह यथोद्देशपक्षाश्रयणमिति स्थितं । अत्र हरदत्तः । यद्यपि संज्ञायामसिद्धः प्लुतस्तथापि अनुनासि
कपर्युदासे सिद्ध एव । ततश्च यस्यानेन संज्ञा कृता द्विमात्रस्य भसो ऽनुनासिकविध्यौ स्थानी । किं तु त्रिमात्रः । न च स्थानि
वद्भावात्तस्यापि ग्रहणत्वं अल्विधित्वात् । किं च । अवश्यं सिद्धः प्लुतः स्वरसंधिष्वित्याश्रयणीयं । देउ ज्ञाटकमिति
प्लुतस्य दीर्घेण निवृत्तिर्यथा स्यात् । अत एव सुश्लोका३ इति सुश्लोकेत्यत्र गुणे भवन् प्लुतमेव निवर्तयति न तु स्थानि
नो ऽन्यथा ह्यादेशरूपे प्लुतः श्रूयेत । ननु इह यथोद्देशे ऽपि संज्ञापरिभाषे कथमिवेष्टसिद्धिः कथं वा अथ पेषुन पूर्वापरविरोध
इति विप्रतिषिद्धः प्रष्टव्या इति । अत्राहुः । यद्यपि द्विमात्रत्रिमात्रे ऽणप्रहृतः तथापि पूर्वत्रासिद्धमिति शास्त्रासिद्धत्वबोधना
त्रिमात्रे ऽपि द्विमात्रत्वं वा यमिति बुध्या प्रगृह्यसंज्ञा क्रियते । अत एव अमुनेत्यत्र मुत्वे कृते तदुपजीवनेन नाभावे च कृते सुपि चे
ति दीर्घो मुरणहृ एव दशद्धियमिति बुध्या प्राप्नोति तत्परिहाराय यतं ज्ञारव्र साध्याश्रयणेन नाभावे कर्तव्ये कृते च सत्तिमुभा

वोनासिद्ध इत्यष्टमे व्याख्यातं। रूप्मेजंत सूत्रे च संनिपातपरिभाषया समाहितं। न त्विह द्विमात्रे कृतां संज्ञाभावानिव
ज्ञावेन त्रिमात्रे ऽत्रान्तयामः येनानन्विधावितिनिषेधः। अंकोत। न हि रजत भ्रम प्रयुक्ता प्रवृत्तिः शुक्तिं न गोचरयती
ति युक्तं। एतावानेव परं विशेषः रजत भ्रमो ऽत्र नाहार्यः प्रवर्त्तकः इह तु शास्त्रप्रामाण्यादाहार्य आरोपो ऽपि तत्त्व शास्त्र
प्रवृत्तावप्रवृत्तौ च नियामक इति। तदेतत्कैयटेनैव स्फुटीकृतं। यदाह। शास्त्रासिद्धत्वाश्रयणाद्वा सुतरांतु द्रवस्यांग
ग्रहणे विधीयमाने द्विमात्रत्वबुद्धिः प्रवर्त्तते। तथा च वक्ष्यति। असिद्धवचनमुत्सर्गलक्षणभावार्थमादेशलक्षण
प्रतिषेधार्थं चेति। षत्वतुकोरसिद्ध इत्येतत्सूत्रस्थं वार्त्तिकमिदं। उत्सृज्यते निवर्त्यते ऽनेनेत्युत्सर्गः स्थानी। स
लक्षणं निमित्तं यस्य कार्यस्य तुगादेः तस्य प्रवृत्त्यर्थमित्यर्थः। तथा चैकरूप्यार्थं सर्वत्र शास्त्रासिद्धत्वमेवेति भावः।
एतेन यस्यानेन संज्ञा कृता तस्योत्तु नासिकविधौ स्थानीति प्रथम दूषणमुद्धृतं। यदपि दंडाकं टे सु ज्ञोके तीत्यादौ ऽत्रादेशे